समश्लोकीचूर्णिकास्थविषयानुक्रमणिका

प्रथमोऽध्यायः।

१. मंगलाचरणम्।

२. मातापितृवंदनम्।

३. श्रीगुरुकथामहत्त्ववर्णनम्।

४. नामधारकस्य गुरुदर्शनार्थं गमनम्।

५. गुरुदर्शनाभावात् नामधारकस्य शोकः।

६. स्वप्ने गुरुदर्शनम्।

द्वितीयोऽध्यायः।

१. सिद्धदर्शनम्।

२. सुष्ट्युत्पत्तिवर्णनम्।

३. विधेः कलिना संवादः।

४. दीपकगुरूपाख्यानकम्।

५. दीपककृतगुरुसेवावर्णनम्।

तृतीयोऽध्यायः।

१. गुरुकथाश्रवणात्पठणाद्वा सर्वार्थसिद्धिः।

२. हरेरवतारकारणनिरूपणम्।

३. अंबरीषकथानिरूपणम्।

४. दुर्वाससः शापः।

५. हरेः शापः।

चतुर्थोऽध्यायः।

१. ब्रह्मविष्णवीशानां अनसूयागृहे गमनम्।

२. अनसूयया तेषामिच्छानुसारेण अन्नसमर्पणम्।

३. तेषां बालभवनम्।

४. दुग्धप्राशनम्।

पञ्चमोऽध्यायः।

१. द्विजांगनया दत्ताय दत्तमन्नदानवर्णनम्।

२. तत्प्रसादात् श्रीपादाभिधः दत्तावतारः।

३. स्वान्धपंग्वादिभ्रातृरोगनिवारणम्।

४. श्रीपादगुरोः गोकर्णक्षेत्रगमनम्।

षष्ठोऽध्यायः।

१. गोकर्णक्षेत्रवर्णनम्।

२. रावणभक्त्या संतुष्टेन शिवेन तस्मै स्वलिङ्गार्पणम्।

३. दंभात्तल्लिङ्गं गणपतिना भूमौ स्थापितम्।

सप्तमोऽध्यायः।

१. मित्रसहराजकथावर्णनम्।

२. गौतमेन वर्णितं गोकर्णमाहात्म्यम्।

३. गोकर्णक्षेत्रगमनेन ब्रह्महत्यानाशवर्णनम्।

४. चाण्डाल्याः कथा।

अष्टमोऽध्यायः।

१. स्वाज्ञसुतेन सह मर्तुकामायाः विधवायाः आत्महत्यायाः वारणम्।

२. प्रदोषकथानिरूपणम्।

३. अज्ञपुत्रस्य विबुधकरणम्।

४. चन्द्रसेनराजकथा।

५. जन्मांतरे त्वत्पुत्रो भविष्यामि इति तस्यै वरदानम्।

नवमोऽध्यायः।

१. परमभक्तराजकथा।

२. रजकाय जन्मान्तरे राज्यदानम्।

३. श्रीपादश्रीवल्लभावतारसमाप्तिः।

दशमोऽध्यायः।

१. वल्लभेशविप्रकथा।

२. भक्तघातितस्करमारणम्।

३. गुप्तरूपेण वर्तमानस्याऽपि अद्भुतमाहात्म्यवर्णनम्।

एकादशोऽध्यायः।

१. नृहर्यवतारकथावर्णनम्।

२. प्रदोषव्रतं कुर्वाणायाः अंबायाः नृहरेर्जन्म।

३. जन्मनः प्रभृति ॐकारोच्चारणम्।

४. नृहरेरुपनयनान्तरं वेदज्ञानवर्णनम्।

५. चतुर्थाश्रमस्य महत्त्ववर्णनम्।

६. मात्रम्बायाः कृतं गृहस्थाश्रममहत्त्ववर्णनम्।

द्वादशोऽध्यायः।

१. शरीरस्य नश्वरत्ववर्णनम्।

२. धर्ममहत्त्ववर्णनम्।

३. मातुः पुत्रद्वयजननान्तरं स्वस्य संन्यासग्रहणप्रतिज्ञा।

४. मातुर्दत्तात्रेयरूपदर्शनम्।

५. श्रीगुरोः काशीक्षेत्रे गमनम्।

६. कलौ संन्यासः शास्त्रमतो न वा इति विचारः।

७. नृहरेः संन्यासग्रहणम्।

८. गुरुपरंपरावर्णनम्।

त्रयोदशोऽध्यायः।

१. श्रीगुरोः शिष्यवर्णनम्।

२. पुनः स्वग्रामं प्रत्यागमनम्।

३. स्वभगिन्या रत्नया संवादः।

४. गौतम्या उत्पत्तिकथा।

५. मर्तुं समागतस्य द्विजस्य रोगशमनम्।

६. स्वशिष्यैः सह भिक्षाग्रहणम्।

चतुर्दशोऽध्यायः।

१. सायंदेवस्य म्लेच्छभीतिवर्णनम्।

२. गुरुकृपया म्लेच्छभीतिवारणम्।

पंचदशोऽध्यायः।

१. गुरोरन्तर्धाने कारणवर्णनम्।

२. तीर्थयात्रावर्णनम्।

३. शिष्याणां तीर्थयात्रार्थं गमनम्।

षोडशोऽध्यायः।

१. उद्धतात्मने धौम्यशिष्यचरितोपदेशः।

२. गुरुद्रोहिणे ब्राह्मणाय ज्ञानोपदेशः।

३. श्रीगुरोः कृष्णातटगमनम्।

सप्तदशोऽध्यायः।

१. विद्याप्रशंसा।

२. विद्वद्ब्राह्मणसुतस्य विद्यार्थं जिह्वाछेदनम्।

३. श्रीगुरुकृपया सुजिह्वत्वं विद्वत्त्वं च।

अष्टादशोऽध्यायः।

१. श्रीगुरोः अमरापुरे ब्राह्मणगृहे भिक्षार्थं गमनम्।

२. तदङ्गणस्थ लताछेदनम्।

३. लतामूले द्विजस्य धनप्राप्तिः।

४. श्रीगुरोः कृष्णापंचनदीसंगमवासवर्णनम्।

५. कृष्णातीरस्थतीर्थवर्णनम्।

ऊनविंशोऽध्यायः।

१. औदुम्बरमहत्त्वर्णनम्।

२. गङ्गानुजायैश्वर्यदानम्।

३. गङ्गानुजेन सह त्रिस्थलीकरणम्।

४. उदुम्बरमूले योगिनीजाह्नवी-सहितपादुकास्थापनम्।

५. अश्वत्थ(?उदुम्बुर)पूजाफलवर्णनम्।

विंशोऽध्यायः।

१. विप्रस्त्रियः पिशाचपीडापरिहारः।

२. तस्याः सुतद्वयजननम्।

३. ज्येष्ठपुत्रस्य रोगान्मरणम्।

४. स्त्रियः पुत्रशोकः।

५. ब्रह्मचारिवेषेण श्रीगुरोस्तत्र गमनम्।

एकविंशोऽध्यायः।

१. जीवस्य नश्वरत्ववर्णनम्।

२. वेदान्तविचारः।

३. श्रीपादुकानिकटे प्रेतस्य नयनम्।

४. स्वप्ने श्रीगुरोर्दर्शनम्।

५. गुरुकृपया मृतपुत्रोज्जीवनम्।

द्वाविंशोऽध्यायः।

१. दीनद्विजगृहे श्रीगुरोर्भिक्षार्थं गमनम्।

२. वंध्यां वृद्धां महिषीं दृष्ट्वा दुग्धयाचनम्।

३. तदाज्ञया वंध्यामहिषीदोहनम्।

४. वंध्यामहिषीदुग्धप्राशनम्।

त्रयोविंशोऽध्यायः।

१. श्रीगुरुमहिमा राज्ञा श्रुतः।

२. गुरुं स्वपुरीमानयद्राजा।

३. रक्षसे सद्गतिदानम्।

४. राजदत्ते मठे श्रीगुरोर्वासः।

चतुर्विंशोऽध्यायः।

१. निन्दाकर्तृयतित्रिविक्रमं प्रति श्रीगुरोर्गमनम्।

२. संन्यासिरूपदर्शनम्।

३. त्रिविक्रमयतेः क्षमायाचना।

पञ्चविंशोऽध्यायः।

१. मत्तयोः श्रुतिनयविज्ञयोर्म्लेच्छाज्ञया विजिगीष्वोर्विप्रयोर्भ्रमणम्।

२. तयोः श्रीगुरुसमीपे नयनम्।

३. तौ प्रति श्रीगुरोः प्रबोधः।

षड्विंशोऽध्यायः।

१. वेदतदङ्गानां विवरणम्।

सप्तविंशोऽध्यायः।

१. मत्तद्विजयोर्मातङ्गद्वारा पराभवः।

२. मत्तद्विजयोः राक्षसत्वम्।

३. अन्ते च तयोः सद्गतिनिरूपणम्।

अष्टाविंशोऽध्यायः

१. कर्मविपाकनिरूपणम्।

२. पातकनिवृत्तये प्रायश्चित्तादिनिरूपणम्।

३. पतितस्य अज्ञकरणम्।

एकोनत्रिंशोऽध्यायः।

१. वामदेवब्रह्मराक्षससंवादः।

२. विभूतिमाहात्म्यवर्णनम्।

त्रिंशोऽध्यायः।

१. गुरोर्भजनाद्गोपीनाथाय सुतप्राप्तिः।

२. उद्वाहानन्तरं सुतस्य व्याधिः।

३. सुतस्य गाणगापुरगमनम्।

४. पुत्रस्य पुरोपकण्ठे मरणम्।

५. सावित्र्याः शोकः।

६. तन्निकटे श्रीगुरोर्गमनम्।

एकत्रिंशोऽध्यायः।

१. विंध्याद्रिचरितसहितागस्त्यर्षिसतीचरितम्।

२. स्त्रीधर्मनिरूपणम्।

द्वात्रिंशोऽध्यायः।

१. विधवाचारनिरूपणम्।

२. प्रणतायै सावित्र्यै सौभाग्यवती स्याः इति वरदानम्।

३. तस्याः मृतस्य पत्युः उत्थापनम्।

त्रयस्त्रिंशोऽध्यायः।

१. सावित्र्यै रुद्राक्षधारणमाहात्म्यकथनम्।

२. सतीवेश्योपाख्यानम्।

चतुस्त्रिंशोऽध्यायः।

१. रुद्राभिषेकमाहात्म्यनिरूपणम्।

२. रुद्राभिषेकतीर्थसिञ्चनाद्राज्ञो मृतपुत्रस्य पुनरुज्जीवनम्।

पञ्चत्रिंशोऽध्यायः।

१. स्त्रीणां मन्त्रोपदेशानर्हत्वंनिरूपणम्।

२. सुरहितदकचकथा।

३. सोमवारव्रतमाहात्म्यम्।

४. सीमन्तिन्युपाख्यानम्।

षट्त्रिंशोऽध्यायः।

१. परान्नग्रहणाद्दोषदर्शनम्।

२. परान्नग्रहणाग्रहणविचारः।

३.आह्निकाचारनिरूपणम्।

सप्तत्रिंशोऽध्यायः।

१. देवपूजनादिसकलाह्निकनिरूपणम्।

२. अशनादिधर्मनिरूपणम्।

३. शयनादिविधिनिरूपणम्।

अष्टत्रिंशोऽध्यायः।

१. भास्करविप्रकथा।

२. स्वल्पभोजनसामग्र्यां बहुब्राह्मणभोजनम्।

३. भास्करब्राह्मणाय वरदानम्।

एकोनचत्वारिंशोऽध्यायः।

१. स्थविरवंध्यायै सुतप्रदानम्।

२. अश्वत्थार्चननिरूपणम्।

चत्वारिंशोऽध्यायः।

१. कुष्ठविनिवृत्त्यै शुष्ककाष्ठार्चनम्।

२. कमण्डलुस्थजलसिञ्चनाच्छुष्ककाष्ठे पल्लवप्रादुर्भावः।

३. नरहरिकवेः गुरुकृपया कुष्ठनाशः।

४. नरहरिकविकृतं श्रीगुरुस्तोत्रम्।

एकचत्वारिंशोऽध्यायः।

१. सायंदेवस्य श्रीगुरोर्दास्ययाचना।

२. सायंदेवभावपरीक्षा।

३. गुरुभक्तिप्रकारनिरूपणम्।

४. काशीयात्रनिरूपणम्।

द्विचत्वारिंशोऽध्यायः।

१. काशीयात्रानिरूपणम्।

२. यात्रया तुष्टस्य शिवस्य ब्रह्मपुत्राय वरदानम्।

३. सदारसुतस्य सायंदेवस्य गुरुदर्शनार्थमागमनम्।

४. सायंदेवकृतं श्रीगुरुस्तोत्रम्।

५. अनन्तव्रतकथनम्।

त्रिचत्वारिंशोऽध्यायः।

१. सायंदेवाय अनन्तव्रतनिरूपणम्।

२. अनन्तव्रताकरणे हानिनिरूपणम्।

३. व्रतकरणे च युधिष्ठिरादीनां सुगतित्व-निरूपणम्।

चतुश्चत्वारिंशोऽध्यायः।

१. तन्तुकभक्तकथा।

२.स्थानमाहात्म्यवर्णनम् ।

३. विमर्षणराजकथा।

पञ्चचत्वारिंशोऽध्यायः।

१. कुष्ठिनन्दिनामद्विजकथा।

२. तेन कृतं गर्भावस्थातः वृद्धावस्थापर्यन्तं जीवस्य वर्णनम्।

षट्चत्वारिंशोऽध्यायः।

१. श्रीगुरोः हिप्परगिग्रामे गमनम्।

२. शिवलिङ्गे श्रीगुरुं स्वप्नेऽपश्यत् नरकेसरी।

३. श्रीगुरोर्गन्धर्वनगरे गमनम्।

सप्तचत्वारिंशोऽध्यायः।

१. दीपावल्यां गुरोः सप्तशिष्यग्रामान्प्रति गमनम्।

२. गाणगग्रामेऽपि शिष्यप्रार्थनया वासः।

३. अष्टरूपधारणम्।

अष्टचत्वारिंशोऽध्यायः।

१. कृषीवलस्य शूद्रस्य कथा।

२. श्रीगुरुकृपया शूद्राय बहुधान्यप्राप्ति-निरूपणम्।

एकोनपञ्चाशत्तमोऽध्यायः।

१. गाणगग्रामे त्रिस्थलीयात्रावर्णनम्।

२. क्षेत्रमाहात्म्यमुक्त्वा तीर्थस्नानात्स्वभगिन्या रत्नायाः पापनिवृत्तिः।

पञ्चाशत्तमोऽध्यायः।

१. यवनराजकथा।

२. गुरुकृपया तदङ्कगतस्फोटकनिवृत्तिः।

३. गुर्वनुग्रहार्थं दृष्टान्तेन राजकथावर्णनम्।

४. श्रीगुरोर्यवनराज्ये गमनम् तद्राज्येक्षणं च।

एकपञ्चाशत्तमोऽध्यायः।

१. राजपुराद्गाणगपुरगमनम्।

२. गुप्तवासार्थं विचारः।

३. स्वभक्ताश्वासनम्।

४. गन्तुं पुष्पासनकरणम्।

५. मद्भजनाद्वः सुगतिरिति आशीर्वाददानम्।

६. श्रीगुरोः श्रीशैलगमनम्।

श्रीगुरुदेव दत्त।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

ज्ञानकाण्डम्।

प्रथमोऽध्यायः।

अध्यायसारसंग्रहश्लोकोऽयम्-

अध्याये प्रथम इहेष्टवन्दनाख्यं प्रोक्तं मंगलमथ नामधारकाख्यम्।
प्राप्येष्टं स्तुत इह धाम हर्षणीयं दत्तोऽदर्शयदुत नुः प्रहर्षणीयम्।।१।।

श्रीगणेशाय नमः।। श्रीगुरुदत्तात्रेयाय नमः।। हरिः ॐ।। ॐ नमो विघ्नहर ते गजास्य गिरिजासुत। जय लम्बोदर जय शूर्पकर्णैकदन्त भोः।।१।। त्वं कर्णौ चालयसि। ततो निःसृतवातेन विघ्नाः पलायन्ते अतस्त्वं विघ्ननाशकोऽसि।।२।। हे गजानन तप्तस्वर्णवत्प्रभातार्कवद्वा तव मुखं भाति।।३।। विघ्नवनं छेत्तुं त्वया परशुः करे धृतः। यस्य ते सर्पोपवीतं कटौ नागबन्धश्च।।४।। हे विशालाक्ष चतुर्भुज विघ्नान्निवार्य लोकान्रक्षसि।।५।। ये त्वद्ध्यानं कुर्वते तान्विघ्नो न बाधते। ते च शीघ्रमिष्टं लभन्ते।।६।। स्वामिन्सर्वमङ्गलेषु त्वं वन्द्योऽसि। भो लम्बोदर त्वं चतुर्दशविद्या ददासि।।७।। वेदशास्त्रादिकं तव शासनम्। ततो ब्रह्मादयोऽपि त्वां स्तुवन्ति।।८।। त्रिपुरं जेतुं त्वां शिवो दैत्याञ्जेतुं विष्णुश्चापूजयत्।।९।। विष्ण्वाद्याः कार्यादौ त्वां नत्वा लब्धेष्टार्था अभूवन्।।१०।। हे गणेश त्वं कृपाब्धिर्दैत्यहा विघ्नहरो भयहरश्चातो मे मतिप्रकाशं कुरु।।११।। हे विघ्नान्तक गणेश त्वन्नमनात्कार्यसिद्धिः।।१२।। हे गौरीकुमार त्वं कार्याधारः कृपाब्धिश्च। ते नमोऽस्तु। मे बुद्धिं प्रकाशय।।१३।। हे गजानन मद्वासनाः पूरय विद्यां देहि। तुभ्यं साष्टाङ्गं नमोऽस्तु।।१४।। मम गुरुचरित्रकथनेच्छाऽस्ति। त्वं कृपया तत्सिद्धिं कुरु।।१५।। अज्ञानो हीनमतिश्चाहं ततस्ते पादौ धृतौ। त्वं विद्यानिधिः शरणागतेष्टदोऽसि।।१६।। अथ ब्रह्मपुत्रीं वागीशां वन्दे। या पुस्तकवीणाधरा हंसवाहना।।१७।। वेदशास्त्राधिकारदा शारदा तस्या वन्दनाज्ज्ञानाप्तिः।।१८।। हे स्वामिनि प्रसन्ना भव। मे जिह्वाग्रे स्थित्वा ग्रन्थसिद्धिकरी भव।।१९।। मातः मे प्रार्थनां शृणु। ते नमोऽस्तु मे सन्मतिं प्रकाश्य गुरुचरित्रं विस्तारय।।२०।। वेदशास्त्रादि तव लेखनमिह जयति।।२१।। हे मातः वेदादिकं षड्दर्शनादि च त्वत्तो जातम्। तैस्त्वत्प्रकाशनमशक्यम्।।२२।। श्रीनृसिंहसरस्वतीगुरुनाम्नि ते स्थितिः। ततस्तदङ्किते मयि ते प्रीतिरस्तु।।२३।। यथा सूत्रधारेच्छया काष्ठपुत्तलिका नृत्यन्ति न स्वातंत्र्यात्।।२४।। तथा त्वं मे वाणीं प्रेरय। भो कृपाब्धे वाग्देवते बालोऽहं त्वां प्रार्थये।।२५।। हे भारति प्रसन्ना भव। ते पादौ धृतौ। यथा ग्रंथप्रकाशो भूयात्तथा विद्यां देहि।।।२६।। अथ त्रिमूर्तीन्नत्वा क्रमेण विद्यां याचे।।२७।। सृष्टिकर्ता यश्चतुर्मुखः यन्मुखेभ्यो वेदा जाताः स मे त्राता।।२८।। यः क्षीराब्धौ लक्ष्म्या सहास्ते स विश्वनाथो हृषीकेशः।।२९।। शङ्खचक्रगदाधरः पद्मनाभो मुरारिर्नृहरिः स ममेष्टदः।।३०।। स च पीताम्बरो वैजयन्तीमालाधरः स त्वं शरणागतकामदोऽसि।।३१।। देवर्षियक्षगन्धर्वकिन्नरसिद्धसाध्यान्वन्दे।।३२।। वाल्मीकिपराशरव्यासप्रभृति कविकुलं वन्दे।।३३।। कवित्वरीतिं व्युत्पत्तिं च न जानेऽथापि मां दासं मत्वा सर्वे ज्ञानदाः सन्तु।।३४।। ग्रन्थरचनां शास्त्रविचारं महाराष्ट्रभाषां च न जानेऽतो नमामि।।३५।। सर्वैः

कृपां कृत्वा साहाय्यं कार्यम्। अकाव्यव्युत्पत्तिं मां कविकुलं पायात्।।३६।। अथ पूर्वजाञ्जननीं जनकं च ध्याये।।३७।। आपस्तम्बशाखीयः कौण्डिण्यगोत्रजः साखरे इत्युपाह्वयो गुरुप्रियो यः सायन्देवः।।३८।। तज्जो नागनाथः तत्सुतो देवरावः तत्पुत्रो गङ्गाधरो मे पिता।।३९।। तत्पदे नत्वा य आश्वलायनशाखीयः काश्यगोत्रजः।।४०।। स मे मातामहः गङ्गाजनकतुल्यः।।४१।। तस्य दुहिता भवानीव पतिव्रता चम्पेति ख्याता मम जननी।।४२।। तयोः पदवन्दनान्मतिप्रकाशो गुरोः स्मरणं कीर्तनं चाभूत्।।४३।। यतो मे जन्म स गुरोः नैष्ठिकभक्तो गङ्गाधरो मे पिता।।४४।। तत्सुतोहं सरस्वतीसंज्ञो मां क्षमापयन्तु सन्तः। यतः सज्जनपदरजोऽस्मि।।४५।। ये वेदाध्यायिसंन्यासियोगितापसाः प्रेम्णा गुरुं भजन्ति तेभ्यो नमः।।४६।। सर्वे विमत्सराः बालवाक्यवन्मे वाक्यं स्वीकुर्वन्त्वित्यल्पमतिरहं सर्वान्प्रार्थये।।४७।। काव्यरचनक्षमा मतिर्व्युत्पत्तिश्च मे नास्ति किन्तु गुरुप्रेरणयोद्युक्तः।।४८।। अस्मत्कुले परम्परया दत्तप्रसादः। तेन स्वचरितामृतघटो मे दत्तः।।४९।। गुरुवाक्यं कामधेनुरिव नात्र संशयः। स आरब्धं सिद्धिं नयेत्।।५१।। यस्त्रिमूर्त्यवतारो नृसिंहसरस्वती तच्चरितान्तं को यायात्।।५२।। क्वानन्तं तच्चरितं क्वाहं मन्दधीः। अथापि तत्प्रेरणया वक्तुं प्रवृत्तोऽस्मि।।५३।। य ऐहिकामुष्मिकफलमिच्छेत्तस्य रुचिदेयं कथा। तद्द्वारि श्रीस्तिष्ठेत्।।५४।। यद्गृहेऽसौ कथा श्राव्यते पठ्यते सुशीलं तत्कुलं श्रीयुतं नन्दते।।५५।। यत्र गुरुकृपा तत्र रोगपीडादि नैव। सप्ताहश्रवणात्सर्वपापनाशः।।५६।। ईदृशी कथा पावनीष्टं ददाति। अनायासेनेयं सद्यः फलसिद्धिः।।५७।। अनायासान्निधिलाभे श्रमेणालम्। मद्वाक्ये विश्वासवानिदमनुभवतु।।५८।। मयाऽनुभूतं गुरुस्मरणं फलं श्रोतारः सद्योऽनुभवन्तु।।५९।। भुक्तस्तृप्तो यथोद्गारं दत्ते तथाऽनुभूतं कथामृतं वक्ष्ये।।६०।। अल्पे मयि नौदासीन्यं कार्यम्। मक्षिकामुखादपि मधु लभ्यते।।६१।। शुक्तेर्मौक्तिकं, कदल्याः कर्पूरः, काकविष्ठातोऽश्वत्थ उपलभ्यो हेयः किम्।।६२।। वक्रकृष्णेक्षुरस इव मद्ग्रन्थे दृष्टिर्देया।।६३।। येषां गुरुप्रीतिस्तेऽमुं कथां स्वीकृत्यानुभवन्तु।।६४। एतद्ब्रह्मरसास्वादफलं सद्य एव मद्वाक्ये यो भक्तिमान्सोऽनुभवेत्।।६५।। ज्ञानदा कामदा च गुरुकथेयं कामधेनुरिवेदं वृथा न वच्मि। अतः सावधानाः शृण्वन्तु।।६६।। गन्धर्वपुरे श्रीनृसिंहसरस्वती अस्ति। अद्भुतस्तन्महिमा लोके प्रसिद्धः। तमाकर्ण्य भाविका लोका दूरत आयान्ति।।६८।। यदाराधनात्स्त्रीपुत्रधनादिलाभोऽचिरेणैव।।६९।। गुरुदर्शनसङ्कल्पादपि कार्यसिद्धिः। पादुके दृष्ट्वा गृहमेत्यापि पुरुषार्थान्लभन्ते।।७०।। इति श्रुत्वा गुरुदर्शनाकाङ्क्षी नामधारकद्विजः।।७१।। चिन्ताव्याकुलो गृहान्निर्गत्य निर्विण्णः साक्षाद्गुरुदर्शनार्थमेत्य।।७२।। स्वकार्यं साधये। देहं वा पातये। किं कार्यं जडदेहेन।।७३।। इति निश्चित्य गुरुपदं ध्यायन्क्षुधं तृषं च विस्मृत्य गुर्वाश्रमं ययौ।।७४।। यन्नामस्मरणात्सद्यो दैन्यहानिस्तन्नाम स्मरतो मे दैन्यं कुतः शिष्टम्।।७५।। दैवादिति चेत्त्वद्भक्तेः किं प्रयोजनम्। हीनोऽहं चेत्स्पर्शाल्लोहस्य स्वर्णत्वं न किम्।।७६।। पापोऽहं चेत्पापहारिणि ते नाम्नि मयि स्थिते कथं कष्टम्।।७७।। हे कृपालो गुरुमूर्ते इदं मनस्यानीय मे दर्शनं देहि।।७८।। इति व्याकुलो नामधारको गुरुमस्तौत्।।७९।। पाण्डुरङ्गं गणेशं शारदां च नत्वाऽस्तौत्।।८०।। कलौ गुरुस्त्रिमूर्तिरिति श्रुतिस्मृत्युक्तः स त्वं भक्तसारथिः कृपानिधिर्दीनबन्धुश्च।।८२।।८३।। त्रिगुणात्मकस्त्वं सङ्कटं निवार्य भक्तान्पासि।।८४।। दयाब्धे श्रीपते तं त्वां प्रार्थये। चञ्चलं मे मनो भक्तिं न गृह्णाति। ततस्त्वं समाश्वासय।।८५।।८६।। बालं मातेव त्वरया मामेहि।।८७।। त्वमेव मे माता पिता सखा कुलदैवतं च।।८८।। त्वं सर्वगतरिति निर्धार्य त्वां भजे।।८९।। सरस्वतीति ते नाम्ना विक्रीते त्वदाश्रिते मयि कुतो दैन्यं कष्टं च।।९०।। कृपानिधे भक्तवत्सल कुतश्चिन्तां रासि।।९१।। भो परमात्मन्दीनबन्धो

दयाब्धे कृपालुतां मा त्यज।।९२।। भो त्रिमूर्ते विश्वपालक त्वं देवानामपि दाता।।९३।। त्वां विहायान्यं कं याचे।।९४।। त्वं सर्वपोषकः सर्वज्ञश्चेति श्रुतेर्नः उपेक्षां मा कुरु।।९५।। ९६।। कः कथं क्वेति वेत्ता सर्वसाक्षी तादृशस्त्वं कथमुपेक्षसे।।९७।। भो सर्वज्ञ क्षुधितं मां न वेत्सि।।९८।। माताऽपि क्षुधितं बालमुपेक्षते किम्।।९९।। मया किमपि न दत्तमिति बलेरिव मत्तः किञ्चिदादाय दित्से चेत्त्वया बिभीषणाय लङ्का दत्ता। तेन पुरा किं ते दत्तम्।।१००।। १०१।।२।। ध्रुवपदं वा गृह्णतो ध्रुवेण किं दत्तम्।।३।। निःक्षत्रिया भूर्विप्रेभ्यो दत्ता। तैः किं दत्तम्।।४।। भो सृष्टिपालक श्रीपते मशकोऽहं किं ते दास्ये।।५।। यद्द्वारि श्रीर्नन्दते स त्वं क्व। रङ्कोऽहं क्व।।६। अतस्ते किं देयम्। बालः क्षीरकाङ्क्षया मात्रङ्के स्थित्वाऽऽस्यं प्रसारयति।।७।८।। तदा माता तं बालं किं याचते।।९।। सेवामपेक्ष्य किञ्चिदादाय वा यो दाता स किं दाता?।।११०।। अद्य दातुमशक्तश्चेत्कथं चतुर्दशलोकान्पासि।।११।। प्रभो सेवामिच्छसि चेत्कथं वदान्याग्रणीर्भवसि। सेव्यसेवकभावे दातृत्वं न गण्यते।।१२।।१३।। आकाशस्थो मेघः कूपादौ वर्षति।।१४।। कूपाद्यास्तत्सेवां कुर्वन्ति किम्। किञ्चिदादाय दातुर्दातृत्वं श्लाघ्यं किम्। मत्पूर्वे तु त्वत्सेवकाः ।।१५।।१६।।१७।। तद्वंशजं मां विद्धि। राजाऽपि सेवकान्वयं पाति तथा मां पाहि।।१८।।१९।।१२०।। मत्पूर्वसेवित त्वं मे ऋणं देहि। यदि न दास्यसि, तर्हि सद्भ्यो निवेद्यैवादास्यामि।।२१।। तथाऽपि न दास्यसि चेद्व्यवहारे त्वां नियोजयिष्यामि।।२२।। भो गुरो सेवके काठिन्यं कुतो धृतम्।।२३।। नायं धर्मस्त्वं तु भक्तवत्सलः। दैत्येन प्र-हादे पीडिते त्वच्चित्तं मृदुतरं ज्ञातम्।।२४ ।।२५।। स्वदासापराधे दयालोः काठिन्यं शोभते किम्।।२६।। अपराधेन क्रुद्धोऽसि चेल्लत्तया ताडयन्तं निष्ठुरवाचं बालं दृष्ट्वा माता तस्मै क्रुद्ध्यति किं प्रत्युत लालयति।।२७-२९।। प्रभो केनापराधेन न ब्रूषेऽहं तु बालकः।।१३०।। यदा पिता कुप्यति तदा माताऽऽश्वासयति, माता कुप्यति चेत्पिताऽऽश्वासयति।।३१।।३२।। उभयं त्वमेव। त्वयि रुष्टे दुःखं कस्मै विज्ञाप्यम्। अतो दीनवत्सल, दयां कुरु। तवाग्रे पतितं मां पाहि।।३३।३४।। अनाथपालक त्वं मामनाथं पाहि। भो कृपालो मे विलापं कर्णे न गृह्णासि यतः पाषाणा अपि द्रवन्ति।।३५-३८।। कुतस्ते कारुण्यं गतम्। त्वं करुणाकर इति सत्यं चेद्दयां कुरु।।३९।। प्रभो कृपां कुर्वित्युक्त्वा मूर्च्छितोऽभूत्तदा धेनुर्वत्समिव स्वप्न एत्य दर्शनं ददौ।।१४०।४१।। स चोत्थाय दण्डवन्नत्वा पादौ धृत्वा केशैर्ममार्जानन्दाश्रुभिरभ्यषिञ्चत् ।।४२।४३।। गन्धादिभिरापूज्य मुमोद। तमानन्दपूर्णं वीक्ष्य गुरुनाथस्तच्चित्तेऽवसत्।।४४।४५।। निजभक्तहृदम्बुजे मुदा गुरुनाथो विभुरावसद्यदा। मुदमाप सरस्वती तदा मुदसौ मय्यपि चास्तु सर्वदा।।१४६।।

।।इति प्रथमोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

द्वितीयोऽध्यायः

श्रीदत्तात्रेयाय नमः।। अध्यायसारसंग्रहश्लोकोऽयम्।।

***सिद्धः सृष्टियुगस्थितीरिह जगौ सर्गे द्वितीये विधेः संवादं कलिना च दीपकगुरूपाख्यानकं सद्विधेः।।**

यच्चाकारि हि दीपकेन गुरुसत्सेवाख्यविक्रीडितम् कुर्यात्कोऽत्र तथा करोत्यपि शशः शार्दूलविक्रीडितम्।।*।।

त्रिमूर्तिराजः श्रीगुरुर्ममाजः कृष्णातटे योऽस्ति सुदीप्तिपुञ्जः।। आनन्दलीलां दधतेऽत्र भक्ताः स्वर्गे सुरास्तां स्पृहयन्त्यभक्ताः।।१।। ततो नामधारकः स्वप्नादुत्थाय गुरुपदं ध्यायन्खिन्नो वृक्षमूले मूर्च्छित इवाभूत्।।२।। तत्स्वप्ने श्रीगुरुः स्वरूपं दर्शयामास।।३।। जटिलो भस्मलिप्तो व्याघ्रचर्माम्बर एत्य तल्ललाटे भस्मालेप्य मूर्ध्नि करं दधौ।।४।।५।। इति दृष्ट्वा बुध्वा दिश आलोक्य विस्मयेन स्वप्नदृष्टं मनस्यानीयाग्रतो गच्छंस्तथैव योगीशमालोक्य साष्टाङ्गं नत्वा प्राह। भो दयाब्धे कृपां कुरु। त्वं मे माता पिताऽज्ञानतमहरो ज्ञानज्योतिः कृपाब्धिर्योगी सिद्धोऽसि। ते दर्शनादेव पापं नष्टम्। त्वं सङ्कटे तारकः प्राप्तोऽसि। कुत आगतोऽसि, किं ते नाम। क्व च स्थानम्।।६-११।। स प्राहाहं सिद्धो योगी तीर्थाटनपरः।।१२।। गन्धर्वपुरे भीमाऽमरजासङ्गमे त्रिमूर्त्यवतारो योगिध्येयः कृपाब्धिर्भक्तवरदः यो नृसिंहसरस्वतीसंज्ञः श्रीदत्तः।।१३।।१४।। यो भक्तशिष्येभ्यः श्रियं सौख्यं च दत्ते।।१५।। यद्भक्तगृहे न दैन्यं तत्र गोधनादिपूर्णाऽखण्डा साष्टसिद्धिश्रीः सदा तिष्ठति।।१६।। इति श्रुत्वा नामधारक आह। तस्य भक्तोऽहं तद्बिरुदं कीर्तिं च श्रुत्वा तं भजेऽथापि स कष्टार्तं मां न पश्यति। मयि कुतो न गुरोः प्रसादस्त्वं निःसंशयं कथय।।१७-१९।। सिद्ध उवाच। सावधानः शृणु। स सर्वत्र कृपां वर्षति।।२०।। यत्र तत्कृपा तत्र क्व दैन्यम्। स देवान्वशीकृत्य कलिकालं जयति।।२१।। तमासेव्य दैन्यं भाषसे; त्वं संशयाविष्टोऽतः कष्टभाक्।।२२।। य एकभक्तिस्तस्मै त्रिमूर्तिश्रीगुरुः सर्वं दत्ते।।२३।। हरो हरिर्वा कुपितश्चेद्गुरुः स्वभक्तं रक्षति गुरौ कुपिते न कोऽपि रक्षति।।२४।।२५।। इति श्रुत्वा तत्पदे धृत्वा नामधारक आह।२६।। स्वामिन्नयं संशयः। गुरुः कथं त्रिमूर्त्यात्मा। देवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कोऽपि चेति कस्य वचनं, इत्युक्त्वा ननाम। तमभिनन्द्य सिद्ध आह।।२९।। साधु पृष्टं आदितस्ते कथयामि।।३०।। विष्णोर्नाभेर्ब्रह्माऽभूत्। तन्मुखेभ्यश्चत्वारो वेदाः। अष्टादशपुराणानि चाभवत्। तत्र प्रसिद्धं ब्रह्मवैवर्तम्।।३२।। द्वापारान्ते विष्णुर्व्यासो भूत्वा प्रकाशयामास तच्छिष्यादिद्वाराऽत्र प्रसिद्धं तत्रत्यकलिब्रह्मसंवादं वच्मि। कलिना पृष्टो ब्रह्मा गुरुमहिमानं प्राह।।३३-३५।। नामधारको विनयेन नत्वोवाच। कृपाब्धे, भवतारक, सिद्ध, जय,। महायोगिन्। किमर्थं ब्रह्मणा कलये गुरुमहिमा वर्णितः ।।३६-३८।। सिद्ध आह। हे आर्य शृणु। यदा नैमित्तिकः कल्पोऽभूत्तदा कल्पसागरे विष्णुर्वटपत्रमधिशिश्ये।।३९।।४०।। वराहकल्पेऽव्यक्तमूर्ति- र्नारायणो मयि लीनान्सानुशयान् जीवांस्तत्कर्मभुक्त्यै पुनः स्रक्ष्य इति प्रपञ्चरचनां कर्तुं मनस्यानीय योगनिद्रां त्यक्त्वा पूर्वसृष्टिज्ञो जगदुत्पादनेच्छुः स पुरुषो नाभिपद्मं विकसितं चक्रे।।४१।।४२।। ततो जातश्चतुर्मुखो ब्रह्मा दिशो विलोक्य स्वगतमाह। मत्तोऽन्यः परो बली न। ततः समर्थोऽस्मि। तदा प्रहस्य नारायण आह। अहं महाविष्णुस्ते पिता। मां भज।।४३-४५।। इति श्रत्वाऽधो

विलोक्य विष्णुं प्रक्ष्य नत्वा ब्रह्मा तं तुष्टाव।।४६।। तेन तुष्टो नारायण आह। ममाज्ञया सृष्टिं रचय।।४७।। ब्रह्मा आह। विष्णो। सृष्टिरचनां न जाने। कथं स्रक्ष्ये वदेति।।४८।। विष्णुराह। वेदान्गृहाण। वेदे सृष्टिरचनरीतिरस्ति तथा रचय। वेदोऽनादिर्दर्पण इव सृष्टिदर्शकस्तमादाय सावधानः सन्सृज।।४९-५१।। वेदोदितमार्गेण स्रक्ष्यामीति प्रजापतिः विष्णोराज्ञयोद्भिजाण्डजस्वेदजजारजान्ससर्ज। यथा व्यासेन वर्णितम्। नारायणावतारेण व्यासेनाष्टादशपुराणान्युक्तानि।।५२-५५।। तत्र ब्रह्मवैवर्तपुराणं सूतेनर्षिभ्य उक्तम्। तत्रायं गुरुकथाक्रमः।।५६।। ब्रह्मा ब्रह्मिष्ठसनकादीन्सृष्टिवर्धकान्मरीच्यादीन्देवादीन् वर्णाश्रमादिसहितान्ब्राह्मणा- दींश्च सृष्ट्वा कृतं त्रेतां द्वापारं कलिं चोत्पाद्यैकैकं पृथिव्यै प्रेरयत्।।५७-५९।। पूर्वं कृतयुगमाहूयाह। ममाज्ञया भूमिं गत्वा स्वगुणान्प्रकाशयेति। तत्तथेत्युक्त्वा भुवं गन्तुं प्रतस्थे। तल्लक्षणं शृणु। सत्यवाक्, वैराग्यज्ञानयुक्, यज्ञोपवीताभरणाक्षमालाकङ्कणधृगेवंरूपं कृतमेत्य नत्वा प्राह। ब्रह्मन्कुतः प्रेरयसि। प्रायो महीतले मिथ्याभाषणाः निन्दापवादरताः शठास्तेभ्यो बिभेमि।।६०-६४।। ब्रह्माऽह। त्वं १७२८००० वर्षपर्यन्तं भुवि तिष्ठ। कष्टं ते न दास्यामि। सावधानतया तिष्ठान्यं युगं प्रेरयिष्यामीति तं प्रैरयत्।।६५।।६६।। नियते तत्काले व्यतीते सति ब्रह्मा त्रेतां प्रैरयत्। तल्लक्षणं शृणु। यत्तनुर्भोगैः पुष्टा, यत्करे यज्ञसामग्री, धर्मशास्त्रप्रवर्तकं, तत्प्रैरयत्। तत् १२९६००० वर्षपर्यन्तं भुवि तस्थौ। तदा कर्ममार्गरता धर्मशास्त्रज्ञा नरा आसन्। ततो मिश्ररूपं द्वापरं प्रैरयत्तल्लक्षणं शृणु।।६७-७१।। खड्गखट्वाङ्गचापबाणधरं उग्रताशान्तिदयानैष्ठुर्यपुण्यपापयुतम् द्वापरं आहूय कञ्चित्कालं भुवि वसेति ब्रह्माऽऽदिदेश। स च ८६४००० वर्षपर्यन्तं तस्थौ। ततो ब्रह्मा कलिं प्रैरयत्। ब्रह्मणोऽग्रे प्राप्तस्य तस्य लक्षणं शृणु।।७२-७५।। विचारहीनः पिशाचवदनोऽधोमुखोऽशुद्धः, गतौ पदे पदे स्खलनयुक्, क्रूरो, विरागहीनः, कलहद्वेषयुक्, वामहस्तेन लिङ्गं दक्षिणेन जिह्वां च धृत्वा मुदा नृत्यन्दोषपूर्वस्तुतिकरः पापयुक्, हसन् रुदन्मर्कटवच्चेष्टां चरन्ब्रह्मणोऽग्रे स्थित्वा किमाज्ञापयसीत्याह।।७६-७९।। पिशाचाभं तं दृष्ट्वा ब्रह्माऽऽह। किमर्थं लिङ्गजिह्वे धृते इति।।८०।। कलिराह। लिङ्गजिह्वाभ्यां सर्वजनाञ्जेष्यामीति प्रतिज्ञातम्। अयं मे स्वभावः ।।८१ ।।८२।। ब्रह्मोवाच। कञ्चित्कालं भुवं गत्वाऽऽत्मानं प्रकाशय। कलिराह किमर्थं मां प्रेरयसि। मत्स्वभावं दुर्गुणांश्च शृणु।।८३।।८४।। अहं धर्मच्छेत्ता निस्त्रपो निरंकुशो निद्राकलहशोकाद्या मेऽग्रतः सन्ति। परस्त्रीद्रव्यहरो मे भ्रातरौ। प्रपञ्चदम्भमात्सर्यकर्ता मे प्राणसखः। बका इव दाम्भिका यतयस्ते मे प्राणाः। यश्छलेन भूतद्रोही स ममात्मा।।८५-८७।। एभ्यः परं मम जीवसमं मित्रं न। ये पुण्यकारिणः ते मम शत्रवः। ब्रह्मा प्राह। हे कले ममाज्ञां धारय। कलौ नृणां शतवर्षमायुः।।८९।। युगान्तरे बह्वायुः तदा नरैः कतिपयवर्षैः कष्टेन तपोऽनुष्ठानादिना मोक्षो लब्धः।।९०।। एवं कले त्वयि न। इह स्वल्पायुषां शीघ्रमीश्वरभजनमात्रेणापि कृतकृत्यत्वम्।।९१।। अन्ययुगेषु बह्वायुषां दीर्घकालेन कष्टेन च तपोऽनुष्ठानसिद्धिस्त्वयि न तथा।।९२।। ये ज्ञानिनः पुण्यकारिणो देवभक्तास्तेषां विघ्नं मा कुरु। हे शीघ्रफलद, कले, तेषां साहाय्यं कुरु।।९३।। इति श्रुत्वा कलिर्नमस्कृत्य प्राह। ब्रह्मन्ये कथितास्ते मम वैरिणः।।९४।। यत्र मम वैरिणस्तत्र कथं मम गतिः। येषां श्रवणेनापि दुःखितोऽहं भृशं बिभेमि।।९५।। भूमण्डले तत्रापि भरतखण्डे पुण्यजनाः सन्ति, ते मां घ्नन्ति। कथं तत्र मे गतिः।।९६।। इति श्रुत्वा हसन्ब्रह्मा प्राह। त्वां कालात्मानं अङ्गीकृत्य भूतले चिरं तिष्ठ। स स्वगुणेन सर्वेषां धर्मवासनां छिनत्ति। ततः पुण्यवतोऽपि पापे मतिर्भवेत्।।९७।। कलिः प्राह। भो ब्रह्मन्। विशेषतो मम वैरिणः शृणु। भूमण्डले तीर्थादौ ये वसन्ति ये शिवविष्णूपासकाः, धार्मिकाः, ते

मामुपद्रवन्ति। तेषु न मम कृपा। अन्येऽपि वैरिणः ये गङ्गातीरस्थाः, धर्मरताः काशीवासिनश्च तीर्थाटनशीलाः, पुराणश्रवणदानरताः ध्याननिष्ठास्ते वैरिणः ये शान्ता अदाम्भिकाः, पुण्यशीलास्तान्दृष्ट्वा मे कम्पो भवेत्।।९९-१०३।। नासाग्रदृष्ट्या ये जपन्ति तान्दृष्ट्वा मम प्राणाः यास्यन्ति।।४।। स्त्रीपुत्रस्नेहबद्धाः मायाजालवेष्टितास्ते ममेष्टास्तदुपरि मे प्रीतिः।।५।। वेदशास्त्रदूषका हरिहरयोर्निन्दका भेददर्शकाश्च ते ममाप्ताः।।६।। ये हरिहरभक्ताः जितेन्द्रिया रागद्वेषहीनास्तेभ्यो बिभेमि।।७।। ब्रह्मा प्राह। कलौ भूमौ त्वत्प्रकाशो भविष्यति। ते गमनमात्राल्लोकास्तवेच्छया स्थास्यन्ति।।८।। तेषां मध्ये केचित्पुण्यवन्तो भविष्यन्ति। तेषां विघ्नं मा कुर्वेवं सञ्चर।।९।। इति श्रुत्वा कलिर्नत्वा पुनर्विनयेनाह। दुर्वृत्तेर्मे स्वभावः कथमेवं भविष्यति। कथं धर्मेण मम सङ्गतिः।।११०-११।। ब्रह्मा प्रहस्य प्राह। हे कालमल कले निवासोपायं शृणु। त्वं अधर्मसाहाय्येन भुवं गच्छ। ततो लब्धमार्गः सन्निर्भयं सञ्चरिष्यसि। ये निर्मलास्ते त्वद्वैरिणः मलदुष्टास्तवेष्टा भविष्यन्ति।।१२-१४।। कश्चित्पुण्यवांस्त्वां जेष्यति। प्रायो लोकास्ते वशा भविष्यन्ति। इति श्रुत्वा नत्वा कलिः पुनराह। एवं श्रुत्वा मे मनो गन्तुं नोत्सहते।।१५।।१६।। एवं साशङ्कं कलेर्वचः श्रुत्वा ब्रह्माऽऽह। हे नामधारक तत् शृणु।।१७।। धैर्यं धृत्वा ये शुद्धबुद्धाश्चरन्ति तान्निर्लोभांश्च त्वद्दोषा न स्पृशन्ति। अभेदेन ये हरिहरगुरुसेवकाः कपिलधेन्वर्चकास्तेषां त्वद्दोषो न। ये काशीवासिनो ब्राह्मणमातृपितृसेवकास्तेषां त्वद्दोषो न। शैववैष्णवतुलसीपूजकान्मा पीडय। गुरुसेवापुराणश्रवणस्वधर्मरतान् श्रुतिस्मृतिपुराणधर्मज्ञान्विशेषतो गुरुभक्तान्मा पीडय। कलिः प्राह। ब्रह्मन्को गुरुः, किंस्वरूपः, तन्मे कथय। इति श्रुत्वा प्रसन्नो ब्रह्मा प्राह। कले गुरुमाहात्म्यं वक्ष्यामि। शृणु।।११८-२५।। गकारः सिद्धिदः रकारः पापदाहकः उकारो विष्णुर्गुरुस्त्रिमूर्तिः। गणेशाग्निविष्णुयुक्तः द्विवर्णमन्त्रश्चतुर्वर्गप्रदः। गकारो गणेशसंज्ञः रकारो वह्निसंज्ञः विष्णुरुकारसंज्ञ एवं गुरुः।।२६-२८।। गुरुर्माता पिता शिवश्च। ईश्वरे कुपिते गुरुस्त्राता। कदाचित् गुरौ कुपिते न कोऽपि त्रातुं शक्यः।।२९।।१३०।। गुरुर्ब्रह्मा विष्णुरीशश्च गुरुरेव परं ब्रह्मोपास्यम्।।३१।। ब्रह्मत्वेनोत्पादनात् अज्ञानादिकारणाद्भवसंहाराच्च त्रिमूर्त्यात्मा गुरुः।।३२।। विष्णौ प्रसन्नेऽपि भक्ता गुरुभक्तिं याचन्ते। गुरौ प्रसन्ने सर्वसिद्धिदो विश्वेशस्तुष्यति।।३३।। ईशे तुष्टे गुरुर्न तुष्यति। गुरौ तुष्टे ईश्वरः स्वाधीनः स्यात्।।३४।। ततः शास्त्रतः यो भक्त्या गुरुं भजेत् स तीर्थव्रततपोयोगमोक्षभाक्।।३५।। गुरुर्वर्णाश्रमधर्माचारक्रियाविवेकभक्ति- वैराग्यमुक्तिमार्गदर्शयिता।।३६।। इति श्रुत्वा कलिः पप्रच्छ गुरुः सर्वदेववरः कुतो जातः।।३७।। ब्रह्मा प्राह। विस्तरेण वक्ष्ये। ऐकाग्र्येण शृणु। गुरुं विना पारो न लभ्यः।।३८।। गुरुं विना कस्यापि श्रवणं न। श्रवणं विना कथं भयमुक्तिः। गुरुं विना स्वबुद्ध्या श्रवणे शास्त्राणि न सुलभानि।।३९।।१४०।। शास्त्रतत्त्वे ज्ञाते स्वतः संसारान्मुक्तिः मैव। तस्मादुपदेष्टा गुरुर्ब्रह्मदर्शकः। गुरसेवनया सर्वसिद्धिर्जायतेत्यत्र गुरुशिष्यकथां शृणु। पुरा गोदातीरेऽङ्गिर आश्रमे पुण्यारण्यनानावृक्षमृगान्विते सुव्रता ब्रह्मर्षयः स्थिताः तत्र वेदधर्माख्यः पैलपुत्र आस।।४१-४४।। तत्परास्तच्छिष्याः श्रुतिशास्त्रपाठकाः तेषां मध्ये शिष्याग्र्यो दीपकाख्यः।।४५।। तद्भक्तिं ज्ञातुं तं शिष्यमाहूय गुरुः संतोषेणाह ।।४६।। भोः शिष्याः। किञ्चिद्वः पृच्छामि। यदि मयि प्रीतिरस्ति तर्हि मद्वाक्यं शृणुत।।४७।। शिष्या ऊचुः। भवान्नः तारकः भवदाज्ञां शिरसाङ्गीकरिष्यामः ।।४८।। गुरुवाक्योल्लङ्घनाद्रौरवो नरकः। गुरुवाक्यमकुर्वाणा मायाब्धौ मज्जन्ति।।४९।। ततो नोर्ध्वगतिरधोगतिरेव। तस्माद्भक्तस्य गुरुस्तारकः ।।१५०।। इति श्रुत्वा हृष्टो गुरुः दीपकादिशिष्यानाह। मद्वाक्यं शृणुत। जन्मांतरसहस्रेषु पूर्वमर्जितं महापापमस्ति।।५१।।५२।। तपोऽनुष्ठानधर्मैर्बहु क्षालितम्। शिष्टं प्रारब्धं भोग्यमेव।

तपसोपेक्षितं चेन्मोक्षविघ्नकरम्। अतः घोरपापस्योपेक्षा न कर्तव्या।।५३।।५४।। स्वदेहेन न भुक्तं चेत्तन्न नश्येत् अतस्तन्निष्कृत्य वाराणसीं गत्वा पापं भोक्ष्ये। तत्र प्रयत्नात् युष्माभी रक्षणं कार्यम्।।५५।।५६।। सर्वपापहंत्री वाराणसी पुराणप्रसिद्धा तां मां शीघ्रं नयत ।।५७।। युष्माकं मध्ये सद्रक्षणे कः समर्थः। दुःखोत्तरं मद्वचः कोऽङ्गीकरिष्यति।।५८।। इति श्रुत्वा गुरुसेवापरो गुरुमान्यः सच्छिष्यो दीपकः गुरुं नत्वा प्राह। भोः स्वामिन्पापशेषो न स्थापितव्यः। शीघ्रं प्रतिक्रियां कार्या। गुरुराह सत्यमेव यावद्देहो दृढस्तावत्क्षयः कार्योऽन्ते पापं विषवद्भवेत्।।५९ -६१।। तीर्थसेवाकृच्छ्रप्रायश्चित्तादिना स्वदेहे रोगा भोगेन च पापनिष्कृतिर्नान्यथा।।६२।। स्वपापं स्वयं भोग्यम्। देवर्षिज्ञानिनामपि भोगं विना न पापक्षयः।।६३।। दीपक आह। सत्यमेव शक्त्या सेवां करिष्ये स्वामिन् आज्ञापय।।६४।। गुरुराह। अहं पापेन गलत्कुष्ठी पङ्गुरन्धश्च भविष्यामि।।६५।। हे पुत्रक ईदृशं मां एकविंशतिपर्यन्तं रक्षितुं शक्तश्चेदङ्गीकुरु।।६६।। दीपक आह। भवत्पापक्षयार्थं तावत्कालं अहमेवान्धः कुष्ठी च स्याम्। भवत्पापक्षयं स्वदेहेन करिष्य। मामाज्ञापयितु भवानिति तच्चरणेऽग्रहीत्। तदा हृष्टो गुरुः पापगतिं प्राह। स्वयमेव स्वपापं भोग्यम्। शिष्यादिद्वारा तन्नाशो न। अतोऽहमेव भोक्ष्ये। यदि रोचते तर्हि तावन्मा रक्ष। रोगिणोऽप्यधिकं सेवकस्य कष्टं तत्त्वं कष्टी भविष्यसि।।६७-७२।। इदं पूर्वमेवोक्तम्। शक्तोऽसि चेत्काशीपुरं नीत्वा मां सेवय। तवोपकारेण पापं भुक्त्वा विपापः सन्मुक्तिं यास्ये। दीपक आह भवन्तं काशीं नीत्वा विश्वनाथवद्भवत्सेवां करिष्ये।।७३-७५।। एवं गुरुसेवामङ्गीकृत्य गुरुमादाय मणिकर्णिकां ययौ।।७६।। कंबलाश्वतरसमीपे गुरुं वासयामास। तुष्टो गुरुः स्वपापं भुञ्जन् मणिकर्णिकां नत्वा विश्वेशं सम्पूज्य पापं भोक्तुमारेभे।।७७।।७८।। गुरुर्गलत्कुष्ठी दुःखितोऽन्धोऽभूत्। दीपकस्तं सिषेवे। कुष्ठेन व्याप्तस्य तस्य पूयरक्तदुष्टेऽङ्गे कृमयोऽपतन्। दुःखात्स्मृतिर्नष्टा।।७९।।८०।। शिष्योऽन्नं भिक्षित्वा गुरवे ददौ। विश्वनाथबुद्ध्या तमपूजयत्।।८१।। यथा रोगग्रस्ताः क्रूरा भवन्ति तथा शांतोऽपि स मुनिः क्रूरोऽभूत्।।८२।। शिष्येण भक्त्या दत्तं भिक्षान्नं स्वल्पं मत्वा कोपेन गुरुस्तत्याज।।८३।। ततः शिष्येणानीतं बह्वन्नं तत्किञ्चिज्जग्ध्वा नेदमिष्टं, पक्वान्नादि शाकादि च कस्मान्न दास्यसि।।८४।। ८५।। इति श्रुत्वा तथैवानीतमपि दोषदृष्ट्या त्यक्त्वा गालीं दत्वाऽताडयत्।। ८६।। कदाचित्प्रीतो गुरुः प्राह। भोः शिष्यशिखामणे ज्ञानराशे मन्निमित्तं कष्टं भुक्तम्।।८७।। सद्य एवाह। दुर्गन्धक्षालनादि न करोषि। मां व्यथयसि। शीघ्रमितो गच्छ।।८८।। मक्षिकास्तुदन्ति। ताः न निवारयसि। एवमुक्तस्तथाकरोत्तमाह। भिक्षां नानयसीति।।८९।। एवं पीडितो गुरुर्विपरीतमाह। इति पापगतिः।।९०।। यत्राधिकं पापं तत्र दैन्यमात्सर्यदुष्टताः। पापी शुभाशुभं न वेत्ति।।९१।। यो दुःखदैन्यपीडितोऽन्यथा भाषते स पापी उन्मत्तवज्ज्ञेयः।।९२।। अष्टादशकुष्ठमध्ये गलत्कुष्ठं महाकष्टदम्। यतो मुनिरीदृशोऽभूत्।।९३।। तथापि तद्दोषमविगणय्य भर्त्सितो वारितोऽपि तं विश्वेशं विष्णुं मत्वा शिष्योऽभजत्।।९४।। स यथा यथा याचते तथा तथा भिक्षित्वा ददौ।।९५।। काशीक्षेत्रे वसन्नपि गुरुसेवारतः शिष्यः तीर्थदेवयात्रां नाचरत।।९६।। गुरुसेवारतो देहरक्षापि न चक्रे। गुरुं त्रिमूर्तिं मत्वाऽन्यन्नावदत्।।९७।। निष्ठुरमपि गुरुवाक्यं सोढ्वा तुष्टस्तदनुसारी अवर्तत।।९८।। एवं शिष्यं दृष्ट्वा प्रसन्नो विश्वेश उपेत्य हे वत्स सद्भक्त महाज्ञानिन् कुलदीपक प्रसन्नोऽस्मि। हे सुव्रताभीष्टं वरय।।९९-२००।। दीपक उवाच। हे ईश। गुरुं अपृष्ट्वा वरं न गृह्णामीत्युक्त्वा गुरुं गत्वा विनयेनाह। विश्वनाथः प्रसन्नो भूत्वा वरं दातुमागतः।।१।।२।। भवदाज्ञा चेद्रोगशांतये आदास्ये। ततो रोगशांतिर्भविष्यति।।३।। इति श्रुत्वा गुरुः क्रुद्धो आह। श्रान्तोऽसि किम्? व्याधिशांत्यै नेशः प्रार्थ्यः।।४।। भोगं विना पापं न निवर्तते। वरेण प्रतिबद्धं चेज्जन्मान्तरे भोग्यम्।।५।। इति श्रुत्वा

आज्ञा प्रमाणमित्युक्त्वा दीपको विश्वेशमेत्य प्राह। वरेण किम्। गुरवस्तु वरं न स्वीकुर्वन्ति।।७।।८।। इति श्रुत्वा विश्वेशो निर्वाणमण्डपमेत्य तत्सर्वं देवसन्निधौ विष्णुं प्राह।।९।। विष्णुः प्राह कः शिष्यः, को वा गुरुः, तयोः क्व निवासः मे महाविस्मयः।।२१०।। विश्वेश आहाद्याश्चर्यं दृष्टम्। गोदावासिवेदधर्मातापसशिष्योऽश्रान्तं गुरुभक्तिरतो दीपकोऽस्ति।।११।।१२।। तत्तुल्यो गुरुभक्तो न।।१३।। मया दीयमानेऽपि वरं परिभाव्य प्राह।।१४।। बहुकालमहोरात्रं वरार्थिनो मुनयस्तपस्यन्ति तानुपेक्ष्य बलात्कारेण कुतो मां वरं दित्से इत्युक्त्वा न जग्राह। सदा तनुमनोवाचस्तस्मै समर्प्य माता पिता सर्वे देवा गुरुरेव त्रिमूर्त्यात्मेति मत्वा प्रीत्या तत्सेवारतोऽभवत्। तद्गुणानकति ब्रुवे। प्रीत्या गुरुसेवारतः सोऽज्ञानध्वांतदीपकः।।१५-१९।। धर्मो ज्ञानं यशो गुरुरेवेति निश्चित्य कुलदीपकस्तत्पदेऽभजत्।।२०।। इति श्रुत्वा विष्णुस्तं द्रष्टुं त्वरयामास।।२१।। तमेत्य च विश्वशकथितादधिकां तद्भक्तिं दृष्ट्वा भक्तवत्सलस्तुष्टोऽभूत्।।२२।। विष्णुर्दीपकमाहूय प्राह। ते भक्त्या तुष्टोऽस्मि। वरं वरय।।२३।। दीपक आह। विष्णो, का मद्भक्तिर्दृष्टा। किमर्थं वरं दास्यसि। दिव्यकोटिवर्षाणि मुनयो वने तपसि स्थिताः तानुपेक्ष्य तपोहीनाय मे वरं कुतो दित्से।।२४।।२५।। हो नारायण,त्वद्भजनं मे न कृतम्। बलाद्दातुमपि मे न योग्यताऽतो नादास्ये।।२६।। इति श्रुत्वा तद्भक्त्या तुष्टो नारायण आह। हे कुलदीपक, त्वया या गुरोः परमा भक्तिः कृता सा ममैव।।२७।।२८।। तेन तुष्टोऽस्मि। यो गुरुभक्तः स ममैव भक्तः। तस्याधीनोऽहं तदभिलषितं दद्मि।।२९।। ये मातापितृसेवकाः, या च साध्वी पतिसेविका, विद्वद्ब्राह्मणतपस्वियोगिभक्तास्ते ममैव भक्ताः।।३०।।३१।। इति श्रुत्वा दीपको विष्णुं नत्वा सादरमाह। विष्णो ममायं निश्चयोऽस्माकं वेदशास्त्रादिदाता गुरुरेव।।३२।।३३।। गुरोः सकाशात्सर्वज्ञानं, ततस्त्रिमूर्तयोऽधीनाः। किं नोऽन्येन देवेनास्माकं देवो गुरुः।।३४। सर्वे देवास्तीर्थानि च गुरुरेव। ततः परमार्थो दूरे विद्यते किम्।।।३५।। सिद्धा योगिनश्च गुरुं विना न ज्ञानिनः येन ज्ञानं लब्धं तस्येशो दूरः किम्।।३६।। विष्णो, यत्त्वं दित्से तद्गुरुरपि दास्यति। गृहस्थं त्यक्त्वाऽन्वेष्टुं को बहिर्धावेत्।।३७।। एवं श्रुत्वा तुष्टो विष्णुराह। हे शिष्यशिखामणे त्वं धन्योऽसि। मे प्राणोऽसि।।३८।। पूर्वं त्वद्भक्त्या विश्वेश आगतोऽद्याहमागतः। आवामेकरूपौ। अहं ते वशः। मत्तोषार्थं वरं वरय।।३९।।२४०।। दीपक आह। गुरौ मम भक्तिरुत्तरोत्तरमधिका वर्धतु। गुरुज्ञानं प्रेमलक्षणा तद्भक्तिरेव दित्से चेत्तर्हि देयमित्युक्त्वा ननाम। तुष्टो विष्णुराह।।४१-४३।। तथाऽस्तु। या गुरुभक्तिः कृता तेन तीर्णोऽसि। इहैव ब्रह्मानुभविष्यसि । त्वं धर्मेण लौकिकबुद्ध्या मनसा च गुरुं भज। यदा भक्त्या गुरुं स्तौषि तदाऽहं तुष्टः स्याम्। सैव मे स्तुतिः। ये सांगसशिरस्कवेदपाठका गुरौ पर्यवस्यन्ति ये गुरुं ब्रह्म वदन्ति ते मत्प्रियाः। त्वं गुरुं भज। तवाधीना देवाः। गुरुरित्यमृताब्धिस्तत्र मग्नस्य न त्रितापदाहः। यच्चित्ते गुरुस्मरणं स पूज्यः। गुरुनामामृतपानं यस्य सोऽमरः।।४४-५०।। यदा मम ब्रह्मणो ब्राह्मणस्य वाऽनुग्रहो भवेत्तदा सद्गुरुर्लभ्यते।।५१।। अस्माभिर्यो वरो दीयते स गुरुणापि दीयतेऽतो गुरुस्त्रिमूर्तिः।।५२।। इत्युक्त्वा विष्णुर्जगाम।।५३।। हे कले एवं महात्मा गुरुभक्तः गुरुमेत्य ननाम। सर्वज्ञो गुरुः प्राह। त्वया विष्णुः संभाषितः। किं याचितम्।।५४।। दीपक आह। अनिच्छते ते निश्चला भवत्पादभक्तिर्दत्ता इति श्रुत्वा प्रसन्नो गुरुराह। चिरं जीव, काशीं वस, सिद्धयस्ते वाक्याधीनाः। ते द्वारि निधयश्च मत्संतोषाद्विश्वनाथोऽपि तवाधीनः। ये त्वां स्मरिष्यन्ति तेषां कष्टं न ते पुत्रदाराद्यैर्मोदिष्यन्ते।।५८-२६०।। इत्युक्त्वा वेदधर्मा विपापो दिव्यदेहोऽभूत्। शिष्यपरीक्षार्थं कुष्ठीवाभवत्। महाज्ञानी तापसस्तस्य कुतः पापशंका। स लोकानुग्रहेच्छया काशीं गतः। एवमनेकजन्माघहृत्काशीमहिमा। एवं गुरुणा दर्शितं

अधर्मनिरतानामपि काशीवासिनां न पुनर्जन्म।।६१-६४।। एवं ब्रह्मणा कलये कथितम्। तत्सूतेन शौनकादिभ्य उक्तम्। कलिर्ब्रह्मवचः श्रुत्वा नत्वा तदाज्ञां शिरसा धृत्वा, भुवं गत्वा, तथाऽऽचरत्। हे नामधारक, गुरौ यस्य भक्तिः स शीघ्रं भवाब्धेः पारं यायात्।।६६।। यत्र यत्र दृढा भक्तिस्तत्र तत्र महादेवः प्रकाशं प्राप्नोति। यस्य ब्रह्मविष्णुशिवबुद्ध्या गुरौ भक्तिर्यो वाङ्मनःकायैर्गुरुं भजते स ईश्वरानुग्रहपात्रः दीपकवद्भवति। विष्णुरपि तदधीनः।।६८।। श्लो. गङ्गाधरस्य तनयो हि सरस्वतीति ख्यातः प्रणम्य विनतोऽर्थयति स्म सर्वान्।। श्रोतृञ्छिशूक्तिवदिदं मम वाक्यमत्र न्यूनं सुपूर्णमधुनास्तु भवत्प्रसादात्।।२६९।।

।।इति द्वितीयोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

।।अथ तृतीयोऽध्यायः।।

तृतीयाध्यायसारसंग्रहश्लोकः।

तृतीयेऽध्यायेऽम्भोऽनशनमिति मौनेः प्रथमतोऽ-
म्बरीषोऽपाद्विष्णुव्रतहतिभिया वैष्णवमतः।।
व्रजानेका योनीरिति शपति दुर्वाससि हरि-
स्तमादाच्छापं यन्निजसहनताऽभूच्छिखरिणी।।१।।

श्रीगणेशाय नमः। एवं सविस्तरं सिद्धस्य वाक्यं श्रुत्वा सन्तुष्टो नामधारक आह।।१।। भोः सिद्ध जय। त्वं संसारसिन्धुतारकोऽसि अद्य मे संशयश्छिन्नः।।२।। त्वत्तः सर्वं लब्धम्। आनन्दाब्धौ मग्नोऽस्मि। त्वत्तः परतत्त्वं ज्ञातम्।।३।। त्वन्मुखाद्गलितं गुरुमहिमामृतं पीत्वा मच्चित्ते आनन्दो न माति।।४।। भवतः कुत्र वासः क्व वा ग्रासः कथय। तव दासो भवामीति ननाम।।५।। ततः कृपालुः सिद्धस्तमालिङ्ग्याऽऽशिषो दत्वा स्ववृत्तान्तमाह।।६।। यत्र यत्र गुरोर्वासस्तत्र तत्र मे वासः। गुरुस्मरणं मम ग्रासः।।७।। गुरुमहिमामृतपानं मे तृप्तिदम्। भक्त्येदं पुस्तकं सेव्यते।।८।। भुक्तिर्मुक्तिर्वाञ्छितार्थश्च श्रीगुरुचरित्रश्रवणादेव लभ्यते। यच्छ्रवणादक्षयधनं पुत्रगवादि ज्ञानं च लभ्यते।।९।।१०।। यः शुचिर्भूत्वा भक्त्या सप्ताहं पठेच्छृणुयाद्वा तन्मनोरथसिद्धिर्भवेत्। तत्र ग्रहरोगादिपीडा कदाऽपि न। यच्छ्रवणतो बद्धो बंधान्मुच्यते।।११-१२।। यो भक्त्या शृणोति स नरः शतायुर्ज्ञानवांश्च भवेत्। ब्रह्महत्यादिपापं श्रवणादेव नश्यति।।१३।। इति श्रुत्वा नामधारको नत्वाऽऽह। भोः स्वामिन्दयासिन्धो भवसागरात् मां तारय। त्वमेव साक्षाज्ज्योतिर्मयो गुरुर्लब्धः। भोः स्वामिन्ममापि गुरुचरित्रश्रवणेच्छा वर्तते। तृषिताय मार्गेऽमृतद इव मे चरितामृतपानदो भव।।१४-१६।। सूर्योदये यथा सर्वथा तमो विनश्यति तथा गुरुचरित्रश्रवणान्ममाज्ञानं नष्टम्।।१७।। एवं श्रुत्वा सिद्धस्तमाश्वास्याध उपाविश्य प्रीत्या जगाद।।१९।। रे शिष्य, गुरौ ते दृढा भक्तिर्न। संशययुक्तत्वात्तव क्लेशाः। यः सदाचारो गुरौ दृढभक्तिः स गुरुरूपं जानीयात्स एव इष्टभाक्। इति श्रुत्वा प्रणतो नामधारकः सकरुणमाह। अज्ञानजले संसाराब्धौ मग्नोऽस्मि। त्रितापतप्तं कामादिग्रहवेष्टितं माम्।।२०-२३।। ज्ञाननौकाश्रयेण भवान्कृपावायुं प्रेरयित्वा परं पारं नयतु।।२४।। इति सदयं प्रार्थितः सिद्धस्तन्मूर्ध्नि करं विन्यस्य प्राह। मा भीश्चिन्तां त्यज। ते भद्रमस्तु। उत्तिष्ठ। त्वामसंशयं करिष्ये। यस्य दृढभक्तिर्न स क्लेशभागी श्रीगुरुस्तस्य किं कुर्यात्।।२५-२७।। संशयं धृत्वा त्वं दुःखभागी। अतः संशयं त्यक्त्वा श्रद्धया ज्ञानवान्भव। निःसंशयं गुरुं भज स तेऽभीष्टं दास्यति। निजभक्तं नोपेक्षते गुरुः कृपासिन्धुर्वेदमतः। तच्छ्रवणस्य किं दुर्लभम्।।२८-३०।। स दाता मेघवत्कामदः तारतम्यं नेक्षते। मेघे वर्षत्यपि जलमुच्चदेशे न तिष्ठति यथा, तथाऽस्य कृपा दृढभक्ते तिष्ठति न दाम्भिके ।।३१।।३२।। तस्मान्मनोवाक्कायधर्मैर्दृढभक्त्या गुरुं भज।।३३।। स गुरुर्निरुपमः। यत्स्पर्शमात्रेण शिष्यः प्रपञ्चं ब्रह्मैव पश्यति। नात्र कल्पवृक्षोपमा युक्ता। स कल्पितं दत्ते

गुरुस्त्वकल्पितमपि। तस्मात्त्वं निःसंशयं कामधेनुं जगद्गुरुं शरणं भज।।३४।.३५।। ततः क्षणं ध्यात्वा नत्वा गुरोरनुग्रहमिति नामधारक आह। भोः सिद्ध योगेश्वर स्वामिंस्तव सेवकोऽहं मम भवभीति हर। सविस्तरं भवद्वाक्यं श्रुत्वा गुरुपदे लग्नं मे मनो गुरुचरित्रश्रवणोत्कण्ठं जातम्।।३६-३९।। श्रीगुरुः साक्षात् त्रिमूर्तिर्यदि तर्हि कुतो भुवि नरवज्जातः।।४०।। सिद्ध आह। शिष्यचन्द्रेण त्वया मे बोधाब्धिः प्रपूरितः। गुरुदास्योदययात्तवानन्दप्राप्तिकाल उपस्थितः। शीघ्रं ब्रह्मानुभविष्यसि।।४१।। भुवि पर्यटन्तं मां न कोऽपि पृच्छति। त्वमेवाद्य शुश्रूषुर्दृष्टः। ऐहिकामुष्मिककामेच्छा यस्य तस्येदं चरितं रोचते। दृढान्तःकरणेन तत् शृणु।।४३।।४४।। त्वं भक्तोऽस्यतस्ते मतिरीदृशी। त्वं चतुर्वर्गं लप्स्यसे। धनादिसंपत्तिं पुत्रादीन्सौख्यमायुरन्ते गतिं च।।४५।। लीलाविहारिणो विभोर्नृरूपस्य गुरोर्लीला कामधेनुर्वेदसम्मता।।४७।। भूमेर्भारावताराय भक्तोद्धाराय चैष वेषधारी भूत्वा धर्मपालनं कुरुते।।४८।। इति श्रुत्वा नत्वा नामधारक आह। ईशावताराणां मूलकारणं किं स्वामिन्कृपां कृत्वा विस्तरेण तद्वद। सिद्ध आह। यन्निर्गुणं ब्रह्म जगत्कारणं तदेव सत्त्वरजतमोगुणैरुत्पत्तिस्थितिलयार्थं ब्रह्मविष्णुरुद्ररूपं जातम्।।४९-५२।। रज उद्रेके ब्रह्मा स्रष्टा, सत्त्वोद्रेके विष्णुः पाता, तम उद्रेके रुद्रः संहर्ता सृष्ट्यादिकर्तारः प्रभवो नैते भिन्नाः।।५३।।५४।। अम्बरीषाख्यः कश्चित्सूर्यवंशीयो राजा विष्णुभक्त एकादशीव्रतपर आस।।५५।। विष्णोर्नानावतारस्वीकारे स निमित्तमभूत् तत्ते वक्ष्ये। सावधानतया शृणु।।५६।। विधिनोपोष्य एकादश्यां सर्वदा हरिचिन्तनं कुरुते। एवं सति व्रतभङ्गाय दुर्दिनमिव दुर्वासाः कदाचिद्गृहं प्राप्तः।।५७।।५८।। एकघट्यावशिष्टायां द्वादश्यां प्राप्तं तं दृष्ट्वा भीतोऽम्बरीषः संमुखं गत्वा तमानीय पादौ प्रक्षाल्य संपूज्य नत्वा कुशलं पृष्ट्वा प्राह। शीघ्रमनुष्ठानं समाप्य पारणार्थं भवानागच्छत्विति प्रार्थयामास।।५९-६१।। तथेति स मुनिर्नदीं गत्वा चिरं कर्माकरोत् व्रतभङ्गभिया शङ्कितो राजा जलपानेनोभयसिद्धिरिति मत्वा जलं पपौ।।६२।।६३।। तदा दुर्वासा एत्य कुपित आह। बुभुक्षितातिथिं त्यक्त्वा कस्मात्त्वया पानं कृतम्। इत्युक्त्वा शापं दातुं प्रचक्रमे। तदा भीतो राजा भक्तवत्सलं विष्णुमस्मरत्।।६४।।६५।। तदैव धेनुर्वत्समिव शरणागतवत्सलो विष्णुस्तं प्राप।।६६।। राजन्नानायोनीर्गच्छेति मुनौ शपति तन्मध्ये विष्णुरुपागतः। मुनेर्वाक्यं मोघं नेति भीतो राजा हरेः पदं जग्राह। तदा भक्तवत्सलो विष्णुराह। मुने भक्तं रक्षामि, तमेव शापं मे देहि, नायं सोढुं प्रभुः भक्तवात्सल्यान्मे सहिष्णुता। तदा दुर्वासा विचार्याह। विष्णुः शापेनावतीर्य भूभारं हरिष्यति। यश्चिरात्तपसाऽपि दुर्लभः शापसंबन्धात्।।६७-७१।। अत्रसुलभो भविष्यति। श्रिया सहावतीर्य भक्तानुद्धरिष्यति।।७२।। ततोऽस्मै परोपकारार्थं शापो देयः। किमम्बरीषशापेनेति विचार्य दुर्वासाः शापं दास्यन्निदमाह। स्थूलसूक्ष्मनिवासोऽपि विश्वात्मा त्वं मत्स्यादिरूपैर्दशवारमवतरिष्यसि।।७३।। इति दुष्टान्तकः शिष्टरक्षको दयालुर्विष्णुर्मुनिदत्तं शापं प्रीत्या स्वीचकार। अस्य विष्णोर्मत्स्याद्यवतारा भागवतादिषूक्ताः। क्वचित्स्पष्टान्क्वचिद्गुप्तांस्तान्ब्रह्मविदो विदुः न मूढाः। यत्र वेदोऽपि चकितः ।।७४-७८।। चमत्कारं शृणु। याऽनसूया पतिव्रता विश्रुता तद्गृहेऽतिथिरूपिणस्त्रिमूर्य एत्य तत्पुत्रा अभवन्।।७९।।८०।। नामधारक आह। आश्चर्यं ब्रूषे देवा अपि तत्पुत्राः कथं जाताः।।८१।। धन्योऽयमत्रिः किंप्रभावः, अनसूया वा कीदृशी, हे कृपालो, एतत्सविस्तरं कथय।।८२।। इति स तदनुयोगं कामितानन्दयोगं सकलमलवियोगं सन्मुमुक्षोपयोगम्।। दृढमतिरनधार्य प्राब्रवीदार्यवर्यस्त्रितनुजनुरनार्यध्वंसकं शिष्यवर्य।।८३।।

।।इति तृतीयोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ चतुर्थोऽध्यायः

तुर्ये श्रीशः सत्त्वहत्यै यथाऽन्नं स्मेहन्तेऽदाद्याऽनसूया तथाऽन्नम्।
बाला भूत्वा दुग्धमस्याः पपुस्ते यत्कीर्तिदिक्शालिनी सर्वदाऽऽस्ते।।१।।

श्रीः।। एवं शिष्यप्रश्नं श्रुत्वा सिद्ध आह। साधु पृष्टं गुरुपदे ते प्रीतिरस्ति।।१।। त्वं शिष्यशिखामणिर्धन्यं मान्यं च ते वाक्यं त्वत्प्रश्नादेवादितो गुरुलीला स्मृता।।२।। प्रश्नोऽयं समीचीनः। सृष्टित आरभ्यात्रेर्जन्म वक्ष्ये शृणु।।३।। पुरा कल्पाब्धौ सृष्टिर्लीना तदा नारायणो जलशाय्यभवत्।।४।। पूर्वकल्पे जीववासना यत्र लीनास्तदव्यक्तमण्डरूपेण संकल्पादेवासृजत्।।५।। हिरण्यगर्भाख्यं तद्ब्रह्माण्डं कञ्चित्कालं स्थित्वा निर्भिन्नमभूत्। यतो जगदुत्पत्तिः श्रुता।।६।। स्वर्भूरिति द्वे शकले जाते। भुवोऽधः सप्तोर्ध्वं च सप्त लोकाः कल्पिताः।।७।। विष्णोर्नाभेर्जातेन ब्रह्मणा चतुर्दश लोका दिक्कालादि च सृष्टम्।।८।। विष्णोराज्ञया ब्रह्मा तपस्तप्त्वा सनकादीनन्यांश्चासृजत्।।९।। ते च मरीच्यत्रिपुलस्त्यङ्गिरःपुलहक्रतुवसिष्ठाः ।।१०।। ब्रह्मणो जातौ शतरूपामनू तत्पुत्री देवहूतिः कर्दमर्षिणा विवाहिता। तत्पुत्र्यौ ब्रह्मपुत्रैर्वृताः।।११।। ब्रह्मनेत्राज्जातस्यात्रेः पत्नी पतिव्रताऽनसूया। यस्याः पुत्रश्चन्द्रस्तस्याः सौन्दर्यवर्णने कः समर्थः।।१२।। पतिसेवारतां तां दृष्ट्वाऽसौ स्वर्गं हरिष्यतीति भीता इन्द्राद्या ब्रह्मविष्णुशिवाञ्छरणं गत्वा तत्ख्याति ख्यापयन्त आहुः। अनसूयाचारं वीक्ष्य स्वपदच्युतिशङ्कया वयमधीराः।।१४-१६।। या मनोवाक्कायैर्भक्त्या पतिं भजते, स्वप्नेऽप्यतिथिपराङ्मुखा नैव। स्वकिरणस्पर्शात्तस्यास्तापो भविष्यतीति भीत्या सूर्यो मन्दं तपति, भीतोऽप्यग्निः शीतलत्वं वाञ्छति। वायुरपि चकितो मन्दं वाति। तत्काठिन्यशङ्कया भूरपि मृदुला जाता। वयं च शापं दास्यतीति भीता नतास्तिष्ठामः।।१७-२०।। तपःप्रभावात्कस्यापि स्थानं हरिष्यति। यं साऽनुगृह्णीयात्स रङ्कोऽप्यस्माञ्जेष्यतीत्यत उपायं विचार्य यथाऽस्मत्पदभ्रंशो न स्यात्तथा भवद्भिः कार्यम्। यदि भवदनुग्रहो न चेत्तर्हि तद्दास्यमाश्रित्य तद्द्वारि स्थास्यामः।।२१-२३।। इत्थं श्रुत्वा ब्रह्मविष्णुमहेश्वराः क्रुद्धा ऊचुः।।२४।। अहो कथमेवंविधा पतिव्रताऽद्यैव गत्वा तद्व्रतभङ्गं कृत्वा तां यमलोकं गमयित्वा वाऽऽगमिष्यामः। इति प्रतिज्ञाय त्रयोऽप्यतिथयो भूत्वा बुभुक्षिताः सन्तोऽत्रेराश्रमं ययुः।।२५।।२६।। अनुष्ठानाय मुनौ वनं गते त्रयोऽनसूयामाहुः। मातर्बुभक्षितेभ्यो नोऽन्नं देहि मा चिरम्। नो चेदन्यत्र गमिष्यामः। तवाश्रमेऽभ्यायगतास्तृप्यन्तीति कीर्तिं श्रुत्वा प्राप्ताः स्म यथेष्टं तथा कुरु।।२७-२९।। त्वमिच्छाभोजनदात्रीति ते यशः श्रुत्वेच्छाभोजनकाङ्क्षया दूरादागताः।।३०।।३१।। इति श्रुत्वाऽनसूया तान्प्रणम्य पादौ प्रक्षाल्य प्रीत्याऽऽसनेषूपवेश्य संपूज्य प्राहाह्निकं समाप्तं चेत्सिद्धमन्नं वो ददामि।।३२।। भर्ता तु तपस्तप्तुं गतः इति श्रुत्वा त्रयोऽप्यवदन्। अत्रिश्चिरादेष्यति तस्मान्नो भोजनं देहि।।३३।। इति श्रुत्वा सा तान्गृहमध्यमानीयासनेषूपवेश्य रङ्गवल्ल्यादिरञ्जिते स्थले पात्राण्यासाद्याभिघार्य परिवेष्टुमारेभे।।३४।।३५।। तदा ते प्राहुर्भोः साध्वि नग्ना भूत्वाऽन्नं देहीति काङ्क्षितम्। अस्मद्याच्ञां सफलां कुरु। नो चेदन्यत्र यास्यामः।।३६।।३७।। इति श्रुत्वाऽनसूया स्वगतं प्राह। एते कारुणिका महापुरुषाः पराङ्मुखा यास्यन्ति चेदिदं गृहं वनप्रायम्। वचनोल्लङ्घने तु विमुखा यास्यन्ति। मन्मनस्तु निर्मलम्।

कामः किं करिष्यति। भर्तृतपो मम तारकम्।।३८-४०।। एवं विचार्य भोजनं वो दास्ये। स्वस्थं भोक्तव्यमित्युक्त्वा पाकस्थानं गत्वा पतिपदं ध्यात्वा ममैते बाला इति ध्यात्वा नग्ना भूत्वाऽनसूया यावदन्नं ददाति तावत्प्रभवोऽपि ते बाला जाताः।।४१-४३।। किञ्चिद्भीताऽपि सा रुदतस्त्रीन्बालान्विलोक्यागत्याश्वास्य क्षुधान्वितान्वीक्ष्य यावच्चकिता तावत्स्तनाभ्यां पयोऽस्रवत्।।४४।।४५।। तदा मुदैकैकमादायापाययत्। यत्तृप्तयोऽद्यापि यज्ञा नालं ते त्रिमूर्तयोऽनसूयापयःपानात्तृप्ताः। अहो भाग्यम्। इदं तत्तपःफलम्।।४६।।४७।। यत्कुक्षौ चतुर्दशलोकाः स विष्णुस्तत्पयःपानात्तृप्तः।।४८।। सृष्ट्या श्रान्तो ब्रह्मा सतीस्तन्यपानात्तृप्तः ।।४९।। भालाक्षः कर्पूरगौरो रुद्रस्तत्स्तन्यपानात्तृप्तः।।५०।। इदमत्रेस्तपोबलम्। या त्रिमूर्तिमाता जाता तत्समाऽन्या त्रिभुवने न।।५१।। तान्बालान्प्रीत्या पर्यङ्के शाययित्वा सप्तस्वरैः सुस्वरं जगौ। अत्रान्तरे कृताह्निकोऽत्रिर्वनादेत्य सर्वोपनिषत्सारभूतं सुस्वरं गीतं मनोरमं बालकाश्वासनं च श्रुत्वाऽनसूयां सादरं पप्रच्छ।।५२-५५।। तयाऽऽदितः सर्वं कथितं श्रुत्वा तपःप्रभावात्ताञ्ज्ञात्वा ननाम।।५६।। नमतोऽत्रेर्गायन्त्याः सत्याश्च भक्तिं ज्ञात्वा पालकस्थास्ते स्वरूपेण प्रादुर्भूत्वा तुष्टा आहुः। साधु गीतं, वो भक्त्या तुष्टाः स्मो वाञ्छितं दास्यामः। अत्रिः सतीमाह। एभ्यो वरं वरयेति।।५७-५९।। अनसूया प्राह। भवत्प्रभावादेते प्राप्ताः। एभ्य ईदृशान्सुतान्वृणुध्वम्। इति श्रुत्वा तथेत्यत्रिस्त्रिमूर्तीस्तथा पुत्रानयाचत।।६०।।६१।। देवाः ऊचुः हे मुनीश्वर यथेच्छसि तथा भवत्वित्युक्त्वैकमत्यास्ते त्रयोऽपि स्वं स्वं धामं ययुः। तदंशतोऽत्रिगृहे त्रयो बाला जातास्तान्ब्रह्मविष्णुरुद्रांशांश्चन्द्रश्रीदत्तदुर्वासःसंज्ञितानानसूया पुपोष।।६२-६४।। संस्कृतो दुर्वासाश्चन्द्रश्च गन्तुकामः सन्मातरं प्रार्थयत्। दुर्वासा आह। भो जननि तीर्थपर्यटनार्थमाज्ञां देहि। चन्द्र आह। मातश्चन्द्रमण्डलं यास्ये। नित्यं ते दर्शनमस्त्वनुज्ञां देहि। श्रीदत्तोऽयं त्रिमूर्त्यात्मा सदा युष्मत्समीपे तिष्ठति। नात्र संशयः। सत्यमिदं सर्वव्यापी विष्णुर्भगवानेव श्रीदत्तस्ते तव चित्तानुसारिणाऽनेन ते वियोगो माऽस्तु।।६५-६९।। तदा मात्राऽऽज्ञप्तौ तौ जग्मतुः। त्रिगुणात्मको दत्तस्तु गृहे स्थितः। इदं गुरुपरम्पराया मूलपीठम्। एवं सिद्धेन कथितं श्रुत्वा तुष्टो नामधारकः प्रीत्याऽपृच्छत्।।७०-७२।। भो सिद्ध योगीश्वर ज्ञानमूर्ते कृपासिन्धो त्वं संसारतारकोऽसि। त्वत्प्रसादादियं कथा श्रुता। भो तारक योगिराज मे प्रार्थनां शृणु। दत्तात्रेयावतारो विस्तरात्कथितः। अपरोऽप्यवतारोऽत्र कथं जातः। ममोपरि कृपां कृत्वा तत्सविस्तरं कथय। त्रिमूर्त्यवतारलीला तु कस्मा अलं भवेत्। एवं पृष्टः सिद्धः प्रीत्या तां कथां प्राह। तामग्रे वक्ष्यति सरस्वतीसंज्ञो गङ्गाधरात्मजः।।७३।।७७।। एवं पृष्टः प्राह शिष्याय सिद्धः शुद्धः प्रीत्या यां कथां तां प्रबुद्धः।। वक्ष्यत्यग्रे साधु गङ्गाधराख्यविप्रापत्यं यत्सरस्वत्यभिख्यम्।।

।।इति चतुर्थोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

अथ पञ्चमोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

दत्ताय ददौ द्विजाङ्गनाऽन्नं श्राद्धात्पुरतः स पञ्चमेऽभूत्।।
श्रीपादभिधः सुतोऽन्धपङ्गूद्धृद्भद्रविराडभूत्परिव्राट्?।।

सिद्ध आह। हे नामधारक परेशो भक्ततारणार्थं नृरूपेणावातरत् योऽम्बरीशरक्षार्थं नानारूपो भूत्वा दशावतारान्दधौ।।१।।२।। मत्स्यः कूर्मः वराहः नृसिंहः याचको वामनः क्षत्रियान्तको भार्गवरामः दाशरथी राजा रामः राजा भूत्वाऽपि गोकुले गोपः नग्नो भूत्वा बुद्धधर्मकृत् युगान्ते म्लेच्छहा कल्कीत्येवं नानावेषधारी हृषीकेशोऽवतीर्य साधून्पाति। दुष्टान्हन्ति। द्वापरान्ते कलिदूषिता अज्ञविप्रा दुराचारा इति मत्वा।।७।। स धर्मरक्षार्थं गुरुनाथोऽवतीर्णोऽभूत् यथा भगीरथेनात्र गङ्गाऽऽनीता।।८।। तथा भक्तियोगतो विप्रस्त्रिया दत्त आनीतः। स तत्पुत्रो जात इदमाश्चर्यं शृणु।।९।। पूर्वदेशे पीठापुरे स्वकर्मकृद्राजा नामापस्तम्बशाखीयो विप्र आसीत्। सुमतिर्नाम तद्भार्या सदाचारा पतिव्रता सच्छीलगुणसंपन्ना मुदाऽतिथिसत्कारादिना कालं नयति।।१०-१२।। एकदा तद्गृहे श्राद्धाहेऽतिथिरूपेण श्रीदत्तः प्राप। श्राद्धात्प्राक्तस्मै सा भिक्षां ददौ।। तद्भक्तिं ज्ञात्वा प्रसन्नो भूत्वा त्रिमूर्त्यात्मकं स्वरूपं दर्शयामास। सा तच्चरणे ननाम।।१३-१५।। दत्तात्रेयस्तामाह। हे सुव्रते वरं वरयाभीष्टं दास्यामि।।१६।। इति श्रुत्वा सा प्रणम्य विनयाऽवनता सती तुष्टाव। हे जगन्नाथ त्वं विश्वकर्ता तारकोऽसि। यदि प्रसन्नोऽसि तर्हि मे कामान्पूरय। त्वं कृपालुर्व्यापकः सर्वगः पुराणपुरुषः। भो दयाब्धे भक्तवत्सल ते कीर्तिं को वर्णयेत्। न मिथ्या ते वाक्। बिभीषणाय आचन्द्रार्कं राज्यं ध्रुवाय चाचलं पदं दत्तं सत्यम्।।१७-२०।। त्वं भक्ताधारो भक्तार्थमवतरिष्यसि। चतुर्दशेषु लोकेषु ते यशो व्याप्तम्। हे देवराज कृपाब्धे ते वचो न मृषा। वरं दित्से चेन्मे वासनां पूरय।।२१-२२।। हे अनाथनाथ जगज्जीवन ते चरणौ धृतौ।।२३।। इत्थं श्रुत्वा दत्तात्रेयः प्रेम्णा तत्करं धृत्वा मातर्ब्रूहीति मुदाऽब्रवीत्। सा तद्वचः श्रुत्वा प्राह। हे ईश मातरित्युक्तम्। तत्सत्यं कुरु। मे बहवः पुत्रा जाता मृताश्च। पादाक्षिविहीनौ द्वौ जीवितौ योग्यः पुत्रो न जातः। आर्तिदैर्मूर्खैः किम्। सत्पुत्रं विना जीवनं निष्फलम्। आयुष्यवान्श्रीमान्ज्ञानवान्जगद्वंद्यो भवादृशः पुत्रश्चेत्सफलं जन्म। इति श्रुत्वा प्रसन्नो भगवान्दीक्षया सज्जनानुद्धर्तुं तद्वचोऽन्वमोदत।।२३-२९।। श्रीदत्त आह। मादृशः पुत्रस्ते भविता। युवयोः कुलमुद्धृत्य कलौ ख्यातो भविष्यति। तद्वाक्यं पालितं चेत्स्थास्यति। नान्यथा। स ज्ञानप्रदो दैन्यतापान्हरिष्यति।।३०-३१।। इत्युक्त्वा सोऽन्तर्दधे। सा तं पुनः पुनः स्मृत्वा विस्मिताऽभूत् साश्चर्या सा गृहमेत्य भर्त्रे शशंस। स हृष्टः प्राह। दत्तोऽयम्।।३२-३३।। मध्याह्ने दत्तो द्विजगृहं याति। तदा मा विमुखी भव। तस्मै बहुरूपिणेऽन्नं देहि। माहुरं करवीरं पांचालेश्वरं च दत्तस्य वसतिस्थानम्। तत्र स नानारूपधरो भिक्षुरूपेण पर्यटति। तदाऽपृष्ट्वाऽपि नानारूपधराय तस्मै प्रत्यहं भिक्षा देया।।३४।। सा प्राह। श्राद्धात्पूर्वं श्राद्धान्नं दत्ताय दत्तम्। ममापराधः क्षन्तव्यः। तच्छ्रुत्वा तुष्टो विप्र आह। हे सति त्वया साधु कृतं यतः पितरास्तृप्ताः। पित्रुद्देशेन कर्म कृत्वा यस्मै समर्प्यते स विष्णुः साक्षादेत्य भैक्ष्यं जग्राह।।३९।। तस्मात्कृतार्थाः पितरः स्वर्गे चिरं स्थास्यन्ति। यतस्त्रिमूर्त्यात्मा दत्तस्त्वयार्चितः धन्या ते जननी। यथा ते वरो लब्धस्तथा पुत्रौ भविष्यति। नात्र

संशयः। एवं निश्चित्य दंपती हृष्टौ। ततोऽचिरात्सा गर्भिणी जाताऽथ दशमे मासे पुत्रम प्रासूत। तदा द्विजः स्नात्वा जातकर्माकरोत्। दैवज्ञा तल्लग्नं वीक्ष्योचुः। सुतोऽयं तपस्वी मान्यो दीक्षादो जगद्गुरुर्भविता। इति श्रुत्वा पितरौ हृष्टौ प्रोचतुः गुरुवरफलमिदम्। पितरोऽपि मुक्ताः द्वादशेऽह्नि सुचिह्नाङ्कितपादत्वाद्बालस्य श्रीपाद इति नाम विहितम्। स बालो धीसद्गुणैःसहावर्धत। पित्रा तस्याष्टमेऽब्दे व्रतबन्धं कृतः।।४०४७।। स बटुर्यथाविधि ब्रह्मचर्येण सांगान्वेदान् शास्त्राणि चापठत्। तत्पाठशक्तिं धारणां च ज्ञात्वा विस्मिता लोका अयमीश्वर इत्याहुः। आचारं व्यवहारं प्रायश्चित्तं वेदान्तभाष्यवेदार्थान्सोऽकथयत्। एवं लीलानरः श्रीपादः सर्वविद्यापरोऽभूत्। स्वविवाहार्थमुद्युक्तौ पितरौ निवार्याह। मानुषीभार्योद्वाहेच्छा न मम। विरतिर्मे कान्ता। तया सह मे विवाहो भवतु। तया विनाऽन्या नारी मम मातृसमा। तापसोऽहं ब्रह्मचारी प्रवृत्तिपराङ्मुखो मनसाऽप्यन्यां न काङ्क्षे।।५५।। श्रीपादः श्रीवल्लभोऽहं कृतार्थः उत्तरमार्गेण यास्ये।।५६।। इति तद्वचः श्रुत्वा दत्तवाक्यं स्मृत्वा श्रीदत्तोऽयमिति ज्ञात्वाऽस्य भाषणोल्लङ्घनाद्विघ्नो भविष्यति। अतोऽमुमनुसृत्यास्मै स्वदुःखं निवेद्य यथाऽस्य चित्तं तुष्येत्तथा कार्यम्। नायमस्मत्पुत्रो दत्तोऽयमवतीर्णः। इति निश्चित्य जननी पुत्रसमीपमेत्य प्राह। हे पुत्र, त्वं नः पालकः। आशां निष्फलां मा कुरु। इति पुत्रस्नेहेन व्याकुलाऽश्रुमुखी माता वाताहता कदलीवापतत्।।५७-६१।। तां तथाविधां वीक्ष्योत्थाप्य करेणाश्रु प्रक्षाल्याश्वास्य मातरिति संबोध्य प्राह श्रीपादः। भो मातश्चिन्तां मा कुरु। यदिच्छसि तद्दास्ये। त्वं चित्तं दृढं कृत्वा सुखं तिष्ठ।।६२।।६३।। माता प्राह। त्वां दृष्ट्वा सर्वदुःखं त्यक्तम्। त्वं नो दैन्यं निवार्य वार्धक्ये रक्षसीति काङ्क्षितम्। आवां वृद्धौ पुत्रश्चैकः पङ्गुर्द्वितीयोऽन्धश्च। त्वयि प्रव्रजितेऽस्माकं कस्त्राता।।६५।। इति श्रुत्वा श्रीपादः सुधादृष्ट्याऽग्रजौ ददर्श। स्पर्शस्पर्शाल्लोहं काञ्चनमिव तद्दृष्ट्या सुपादाक्षियुतौ तौ क्षणाद्योग्यतां गतौ।।६७।। वेदशास्त्रादिज्ञौ तौ श्रीपादपादौ धृत्वा आवां कृतार्थौ जाताविति प्रोचतुः।।६८।। तानाश्वास्य वरं दत्वा श्रीपाद आह। मत्प्रसादात् युवयोः पुत्रपौत्रश्रियोऽत्रामुत्र च सौख्यं भुक्त्वा पितृभ्यां सह कैवल्यं गच्छन्तम्। इत्युक्त्वा मातरं प्राह। आभ्यां सुताभ्यां सहोत्तमं सुखं लभस्व।।६९-७१।। शतायुषोरेतयोः सुतयोः पुत्रान्पौत्रान्द्रक्ष्यसि। हे मानदे चिन्तां मा कुरु।।७२।। अनयोर्वंशे श्रीर्निश्चला शाश्वती कीर्तिश्च भविष्यति। एतद्वंशे वेदशास्त्रपारगा भविष्यन्ति। आज्ञां मे देहि। तिरस्कारं मा कुरु। साधुभ्यां दीक्षां दातुमुत्तरमार्गेण यास्ये।।७३।।७४।। इत्युक्त्वा तां नमस्कृत्य तयाऽऽज्ञप्तस्तदा गुप्तो भूत्वा श्रीपादः काशीं ययौ।।७५।। लीलाविहारी स भगवान्बदर्याश्रमे नारायणं नरं च दृष्ट्वा स्वभक्तेभ्यो दीक्षां दातुं महीं पर्यटन्मनोवेगेन गोकर्णमेत्य तस्थौ। इति सिद्धवचोऽमृतं श्रुत्वा नामधारकः सिद्धं नत्वा प्राह।।७६-७८।। इति सिदधवचोऽमृतोपमं ह्यवधार्याथ स नामधारकः।।अभिवाद्य तमाह पूजितं विरतं कीर्तनतो नतो मतः।।

।।इति पञ्चमोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

अथ षष्ठोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

शिवो दशास्याय ददौ स्वलिङ्गं प्रगृह्य दंभाद्गणपस्ततस्तत्।।
उपेन्द्रवज्रास्त्रमुखेरितः कौ महाबलेशं निदधौ स पृष्ठे।।१।।

नामधारक आह। हे अज्ञानध्वान्तभास्कर, गुरुपीठमादितो मे श्रावितम्। त्रिमूर्त्यवतारोऽयं श्रीपादः कुतः पर्यटति भूतलस्थानि महातीर्थानि त्यक्त्वा किमर्थं गोकर्णे तस्थौ इति श्रुत्वा तुष्टः सिद्ध आह। तवोपरि तुष्टोऽस्मि। समीचीनोऽयं ते प्रश्नः। नामधारक आह यदि तुष्टोऽसि तर्हि विस्तरेण श्रीगुरुलीलां कथय इति तत्पदे दधौ।।२-५।। ततः सिद्धः संतोषात्तं प्राह। रम्यं श्रीगुरुचरित्रं शृणु।।६।। तद्वक्तुं ममापि हर्षोऽभूत् यत्तल्लीलास्फूर्तिर्जाता ममायं लाभः।।७।। स्वयं त्रिमूर्त्यात्मा यदर्थं पर्यटति गोकर्णे च तस्थौ तच्छृणु। स स्वयं तीर्थरूपोऽपि तीर्थाटनेन भुवि भक्तानुद्धरन्पर्यटति।।८-९।। शंकररूपिणः स्वस्य क्षेत्रं गोकर्णं प्रख्यापयन्गोकर्णे तस्थौ। लोके निरुपमं गोकर्णमाहात्म्यं तत्ते वक्ष्ये। सावधानतया शृणु। अत्र क्षेत्रे बहवो वरान्लेभिरे तदेतदपूर्वं क्षेत्रम्। यत्र साक्षात्सदाशिवः। महाबलेशाख्यं स्वयंभूलिङ्गं विष्णोराज्ञया गणेशेन स्थापितम्।।१०-१३।। इति श्रुत्वा नामधारक आह। विष्ण्वाज्ञया गणेशेन कुतो लिङ्गं स्थापितम्। सिद्ध आह सर्वकामदं महाबलेशचरितमादितो वक्ष्ये शृणु। पुलस्त्यभार्या कैकसी सदाऽतिभक्त्या शिवपूजनरताऽभूत्सा शिवार्चनं विनाऽन्नं न गृह्णाति। एवं सत्या एकदा लिङ्गं न लब्धम्। तदा सा व्रतभङ्गभिया मृन्मयं लिङ्गं कृत्वा भक्त्यैकाग्र्येणापूजयत्।।१४-१८।। तदा तत्पुत्रः क्रूरो रावण एत्य मातरं नत्वा हे भद्रे किं करोषि तदखिलं वद। त्वं मे माताऽसि। मम तु सिद्धयो दास्यः। ममैतद्दौर्भाग्यं यदेतन्मृन्मयलिङ्गार्चनम्। अस्तु नाम तथाऽस्य पूजनात्किं फलम्। माता प्राह। कैलासपदप्राप्तिः ।।१९-२२।। रावण आह। व्यर्थोऽयं तव श्रमः क्षणात्कैलासमानीय ते दास्ये। न मे मृषा वचः शिवसहितं कैलासमानेष्ये। सावधानतयाऽनिशं शिवं पूजय। किं मृन्मयलिङ्गेनेत्युक्त्वा वेगेन कैलासं प्राप्य विंशतिबाहुभिः रौप्यपर्वतं धृत्वा तत्प्रान्ते दशशिरांसि च स्थापयित्वा यत्नादुत्पाटयितुमारेभे।।२३-२७।। उत्सङ्गयोः करौ धृत्वा यदा कैलासं चालयामास तदा सप्तपातालानि चेलुः। शेषश्चकितः कूर्मोऽपि शङ्कितः। इन्द्रपुरी चचाल। देवा अपि भीताः। सप्तोर्ध्वलोकसहिता सशैलवनकानना भूमिर्मेरुश्चचाल। लोकाः प्रलयागमं मेनिरे। कैलासे भयपीडिताः गणाः पार्वती च भीता शिवमालिङ्ग्य प्राह कैलासोऽयं पतति सभागेहादि कम्पते। सर्वत आक्रान्तो जातस्तव कथं स्वस्थता। हे शिव प्रतीकारं कुर्विति पादौ दधौ।।२८-३३।। शिव आह। हे गिरिजे रावणोऽयं भक्तः क्रीडति। चिन्तां मा कुरु। पुनः पार्वती प्राह हे शूलपाणे देवादीन्रक्ष रक्ष।।३४-३५।। इति श्रुत्वा शंकरः रावणसहितं कैलासं हस्तेनाधश्चक्रे। तेन कैलासाधो गतो मोहितो रावण आह। हे शरणागतवत्सल शिव त्राहि त्राहि। हे पिनाकपाणे रक्षकशिरोमणे त्वां प्रपन्नं मां मारयसि किम्। तच्छ्रुत्वा भक्तवत्सलः शिवस्तं कृपया मोचयामास। स मुक्तो रावणः शिवतुष्ट्यै स्वशिरसो वीणां कृत्वा सप्तस्वरसहितं षट्त्रिंशद्रागिणीषड्रागसहितं मनोहरं जगौ।।३६-४०।। तद्भक्त्या प्रसन्नः शिवः स्वरूपेण तत्सम्मुखे तस्थौ। तुष्टोऽस्मि। वरं वरयेति च प्राह। रावण आह। हे शिव, लक्ष्मीर्मे दासी। नवनिधयोऽपि

दासाः। ब्रह्मा ज्यौतिषिकः। सदा वशवर्तिनस्त्रयस्त्रिंशत्कोटिदेवाश्च सेवकाः। अग्निर्वस्त्रक्षालकः। यमो मद्वचनं विना न हन्ति। कुम्भकर्णो मे भ्राता। सुत इन्द्रजिच्च। समुद्रे मे स्थानं सुरासुरागम्यम्। कामधेनुश्च मे गृहे। सहस्त्रकोटिवर्षाणि ममायुर्न कोऽपि मत्समः। इदं वेत्सि। जनन्यर्थं कैलासं नेतुमागतोऽस्मि। ततः सा त्वां पूजयिष्यति। कृपामूर्ते मे मनोरथान्पूरय।।४१-४८।। शिव आह। अलं गानेन। सुदुर्लभमात्मलिङ्गं ते दास्ये। किं कैलासेन। मम प्राणलिङ्गार्चनात्सर्ववासनापूर्तिः। रुद्राभिषेकपूर्वकं त्रिकालं सम्पूज्याष्टोत्तरशतवारं षडक्षरं जप। त्रिवर्षपूजनात्सर्वकामाप्तिः। त्वं मत्स्वरूपश्च भविष्यसि।।४९-५२।। यत्रेदं लिङ्गं तत्र मृत्युभयं न। यद्दर्शनात्सर्वदोषनाशः। यावल्लङ्कां यास्यसि तावद्भूमौ मा निधेहि। त्रिवर्षपूजनात्त्वमीश्वरो लङ्का च कैलासो भविष्यति।।५३।।५४।। इति लब्धवरो रावणः शिवं साष्टाङ्गं प्रणम्य लङ्कां गन्तुं प्रतस्थे।।५५।। नारदस्तज्ज्ञात्वा तत्क्षणं स्वर्गत्वेन्द्रं प्राह। किं स्वस्थमुपविष्टोऽसि। त्वल्लक्ष्मी रावणेन हृता।।५६-५७।। स शिवात्प्राणलिङ्गं लब्ध्वा चिरायुर्जातः। तस्मै शिवेनोक्तं त्रिवर्षं लिङ्गपूजनान्मत्स्वरूपो भविष्यसि। न ते मृत्युभयं पुरी च ते कैलासो भविष्यति।।५८-५९।। इति शम्भोर्लब्धवरो रावणो गतः। तेन बद्धानां देवानां कुतो मोक्षः। अथ तत्तोषार्थमुर्वश्यादीन्नीत्वा भवद्भी रावणः सेव्यताम्। इतीन्द्रो मुनिवचः श्रुत्वा भीतो देवैः सह नारदमाह। किं कर्तव्यमिति।।६०-६२।। नारद आह। ब्रह्माणं शरणं गच्छ। स उपायं कथयिष्यतीति। ततः सनारद इन्द्रो ब्रह्मलोकं गत्वा तन्न्यवेदयत्। ब्रह्माऽऽह। हे इन्द्र वैकुण्ठं गच्छ। दैत्यारिर्विष्णुरुपायं करिष्यति।।६३-६५।। ततस्तौ ब्रह्मदेवश्च वैकुण्ठं प्राप्य सर्वं विष्णवेऽकथयन्।।६६।। ब्रह्माऽऽह। विष्णो शीघ्रं यत्नं कुरु। नो चेदग्रे संकटमेष्यति। त्रयस्त्रिंशत्कोटिदेवा रावणेन बद्धास्तन्मोचनाय त्वमवतरिष्यसि।।६८।। शिवप्राणलिङ्गं गृहीत्वा रावणो गतोऽतस्तस्य भङ्गो न। स ईश्वरो भविष्यति तन्निर्दलनं दुस्तरं भात्यतः शीघ्रमुपायं कुरु।।६९-७०।। इति ब्रह्मवचः श्रुत्वा कोपाविष्टो हरिरनर्थो जात इत्युक्त्वा कैलासं समेत्य शिवमाह। रावणाय किमर्थं त्वया प्राणलिङ्गं दत्तं वद।।७१-७२।। रावणोऽतिक्रूरो देवा यद्भृत्या जाताः कतिपयाश्च कारागारे स्थितास्तेषां कथं मुक्तिः।।७३।। सर्पाय दुग्धमिव वरान्यच्छसि। पश्याधुना सोऽमरत्वं गतः स्वर्गभाग्भवेत्। शिव आह। विष्णो तद्भक्तिमोहनेन संतोषात्तस्मै प्राणलिङ्गं दत्तम्।।७४-७५।। स स्वशिरश्छित्वा वीणां कृत्वा सुस्वरं साम जगौ। उमाप्यस्मै देयेति मोहोऽभूत्। तत्तस्मै प्राणलिङ्गं दत्तम्। विष्णुराह। त्वं दुर्लभान्वरान्ददासि। तेन मे कष्टं भवति। यतो दुष्टा मत्ता जायन्ते। यतोऽसुरा देवब्राह्मणपीडका दुर्धर्षाश्च भवन्त्यतो ममावतारप्रसंगोऽपि घटते। तस्मै लिङ्गं कदा दत्तम्। स लङ्कां गतो न वा। शिव उवाच। पञ्चनाड्यो गताः। इत्थँ श्रुत्वा विष्णुः सूर्यादर्शनाकारणं सम्पाद्य नारदमाह ।।७६-८१।। हे देवर्षे दुष्टो रावणो लिङ्गं गृहीत्वा लङ्कां याति। त्वं मनोवेगेन गत्वा मार्गे रक्षसे विलंबं कुरु। स नाद्यापि पुरं गतः। सूर्योऽप्यदृश्यत्वं गच्छेत्तदा रावणोऽपि संध्यावंदनकर्मणि तिष्ठेत्। तस्य विघ्नोऽपि भविष्यति।।८२-८४।। इत्युक्तो नारदो रावणस्याग्रतो मार्गे स्थितः। ततो विघ्नार्थं गणेशाय प्रेरयामीति मत्वा विष्णुर्गणेशमाहूय प्राह। हे गणेश रावणस्त्वामुपेक्षतेऽद्यैव यत्नाच्छिवं मोहयित्वा प्राणलिङ्गं जहार।।८५-८९।। ततस्त्वं बालवेषेण तं प्रति गत्वा व्याजेन वञ्चय। सूर्यास्ते रावणः संध्याकर्मणि स्थास्यति। नारदोऽप्यग्रतो गतः।।९०-९१।। मूत्रोत्सर्गादिकाले स लिङ्गं न धारयिष्यति। त्वं तं विश्वासेन वञ्चयित्वा लिङ्गमादाय भूमौ निधेहि तत्तत्राचलं भविष्यति।।९२-९४।। इत्युक्तो गणेशः पाथेयं ययाचे। हरिस्तस्मै पञ्चखाद्यलड्डुकादीन्ददौ। स जक्षन्ययौ।।९५-९८।। नारदोऽग्रे रावणमेत्याह कुत आगतोऽसीति। स तस्मै सर्वं न्यवेदयत्।।९९-१०१।। नारद आह। अद्य ते दैवं फलितम्। उपविश्य लिङ्गं

दर्शय। तल्लिङ्गलक्षणं वक्ष्ये। स शंकितो दूरतो दर्शयामास।।२-४।। नारद आह। कालाग्निसदृक् महिषमुक् त्रिशृङ्गो मृगो ब्रह्मविष्णुशिवैर्हतः। तच्छृङ्गाधःस्थानि त्रीणि लिङ्गानि त्रिभिर्गृहीतानि। तानि तेषां प्राणसमानि। तत्रैकमिदं शैवम्। य इदं त्रिवर्षं पूजयेत्स शिवस्तत्पुरं च कैलासो भवेत्।।५-११।।अन्यदपि माहात्म्यं शृणु। रावण आह। न श्रोष्ये। शीघ्रं लङ्कां यास्ये। नारद आह। संध्याकालोऽयम्।।१२-१३।। अनेकवेदपाठी त्वम्। कर्म हित्वा कथं यास्यसि। अहं तु तिष्ठामीति नारदः तस्थौ। अत्रान्तरे ब्रह्मचारिवेषी गणेशः समिधश्छिन्दन्नाप्तः। तं दृष्ट्वा रावणः स्वगतमाह। संध्यालोपे व्रतभङ्गो भवेत्। क्रियाकाले लिङ्गं मया न धार्यं नाप्यधः स्थापनीयम्। अयं ब्रह्मचारी बालः सिन्धुतीरे पर्यटति। तद्धस्ते लिङ्गं दत्वा संध्यावंदनं कुर्वेऽयं विश्वासघातं न करिष्यतीति मत्वा तत्समीपमाप।।१४-२१।। तं दृष्ट्वा बालो दूरतोऽधावत् रावणस्तमभयं दत्वा मञ्जुलं प्राह। कस्त्वं कस्ते माता पिता च। ब्रह्मचारी आह। कुतः पृच्छसि। पितृभ्यां ते ऋणं देयं किम्। रावणस्तं करे धृत्वा प्राह। किमपि न देयं स्नेहवशात्पृच्छामीति। स आह। मत्पिता रुद्राक्षभस्मजटाधरः शंकरो नित्यं भिक्षार्थं पर्यटति। उमा मम माता। मां मुञ्च। त्वत्तो बिभेमि।।२२-२८।। रावणस्तं द्विजसुतं मत्वाऽऽह। भिक्षुकस्ते पिताऽतस्ते न सुखवार्ताऽपि। हैमं मे पुरं तत्र रत्नमयानि गृहाणि। तत्र त्वमेहि। देवपूजको भव। अभीष्टं ते दास्ये। सुखं स्थास्यसि। बाल आह तत्र नृभक्षका राक्षसा मां भक्षयिष्यन्त्यतो न यास्ये। हस्तं मुञ्च। क्षुधितोऽहं गृहं गमिष्यामि। चणकाशनान्मे क्षुधा न शान्ता। रावण आह यावत्संध्यामुपासिष्ये तावदिदं लिङ्गं वह। बाल आह। ते लिङ्गं गुरु। बालोऽहं वोढुं न शक्नोमि। यास्ये। मां मुञ्चानेन ते धर्मो भवेत् ।।२९-३६।। रावण एवं श्रुत्वाऽपि तत्करे लिङ्गं दत्वाऽब्धितीरे संध्यावंदनाय तस्थौ। ब्रह्मचारी तमाह। त्वं शीघ्रमेहि। त्वां त्रिराह्वयामि। त्वयि नागते लिङ्गं भूमो स्थापयामि। इत्युक्त्वा दिवि देवेषु पश्यत्सु सत्सु गणेशो लिङ्गं गृहीत्वा स्थितः। अर्घ्यदानसमये रावणमाहूय गणेश आह। शीघ्रमेहि भारं वोढुं न शक्नोमीति। स आयास्य इति हस्तमुद्रया ज्ञापयामास।।३७-४२।। बालः क्षणं विरम्य भारं वोढुं न शक्नोमीति रावणमाभाष्य त्रिराहूय स्वर्गस्थान्देवान्साक्षिणो विधाय विष्णु स्मृत्वा लिङ्गं भुवि स्थापयामास। तदा तुष्टा देवाः पुष्पाणि मुमुचुः।।४३-४५।। रावणोऽर्घ्याणि दत्वाऽऽगत्य लिङ्गं स्थापितं दृष्ट्वा बालं निर्भर्त्स्र्य प्राह। विश्वासघातक, सुदांभिक, कूटतोक, त्वं विप्रलंभक, सुवञ्चक, मूर्ख, रंक, रे, बुद्धिपूर्वकमिदं कृतवानसीति प्रोक्त्वा व्यताडयदसावहसद्रुदित्वा बाल आह। कस्मान्निरपराधं मां ताडयसि? पित्रे वक्ष्यामीति ब्रुवन्गतः।।४६-४८।। रावणो विंशतिकरैर्हठादप्युद्धर्तुं न शशाक।।४९।। तदा शिरस्ताडयामास। भूश्चकम्पे। तस्य बलं क्षीणं ततो महाबलेश्वरनामकं तल्लिङ्गमभूत्। निपीडनेन गोकर्णाकारं जातं ततस्तत्क्षेत्रं गोकर्णनामकमभूत्। रावणस्तत्र तपस्तप्त्वा वरान् लेभे तत आरभ्य देवा अपि तत्र स्थिताः। एवं माहात्म्यं स्कन्दपुराणे कथितम्। इति सिद्धवचोऽभिलाषुकः स निशम्याप्यथ नामधारकः। स्म विपृच्छति तत्प्रवक्ष्यति क्षितिदेवो मतिमान्सरस्वती।।१५०-१५४।।

।। इति षष्ठोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

अथ सप्तमोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

भूपेन्द्रवंशोन्नतयेऽत्र सप्तमे गोकर्णमाहात्म्यमुवाच गौतमः।
तद्ब्रह्महत्यालयकृद्गतिं वदन् चण्डालिकायाः प्रशशंस भूपते।।१।।

नामधारक उवाच। गोकर्णे के वरान्लेभिरे सर्वतीर्थानि हित्वा यत्र श्रीपादः स्थितः तन्माहात्म्यं कृपया सविस्तराद्वद। यस्य सद्गुरौ प्रीतिः स तीर्थमाहात्म्यं श्रोतुमिच्छति। अतः कृपामूर्ते सिद्ध मे वद।।१-३।। सिद्ध आह। गोकर्णमाहात्म्यं कथयिष्ये। शृणु। पुरा इक्ष्वाकुवंशे प्रतापी धार्मिको मित्रसहराजाऽभूत्। स दयाब्धिर्विवेकी बली राजैकदा सिंहादिव्याप्तं महारण्यं मृगयार्थी ययौ। तत्र व्याघ्रादीन्हत्वा भयानकं दैत्यं दृष्ट्वा।।४-८।। धनुः सज्जीकृत्य बाणान्मुक्त्वा राक्षसं पातयामास। स म्रियमाणो विलीनं दुःखितं भ्रातरमाह। हे सोदर, भूपं यत्नेन घातयेत्युक्त्वा मृतः। तस्य भ्राता मायावी नृरूपं धृत्वा बलिनो राज्ञोऽनुकूल इव सेवको भूत्वा राजानं सिषेवे। दुष्टजीवान्हत्वा पुनः परावृत्य ससेवको राजा पुरं प्राप। छिद्रं पश्यन्स कपटी सेवकवत्स्थितः। अथ पितृश्राद्धे प्राप्ते राज्ञा वसिष्ठाद्या निमंत्रिताः। राजा कपटसेवकमाह।।९-१७।। बल्लवो यद्यदाज्ञापयति तत्तद्दीयतामिति।।१८।। तथेति स कापट्येन पाकाय मांसं ददौ। बल्लवेनाज्ञानतः पाकोऽपि कृतः। परिवेषणकाले वसिष्ठो मांसं ज्ञात्वा क्रुद्ध आह। राजन्नस्पर्श्यं नरमांसं दत्तमतस्त्वं ब्रह्मराक्षस भव इति श्रुत्वा राजा क्रुद्धः वसिष्ठमाह। मया नृमांसपाको न ज्ञातः न मदाज्ञयाऽपि जातः। वृथा शापो दत्तोऽतस्तुभ्यं शापं दास्य इत्युक्त्वा जलं गृहीत्वा शापं दातुं प्रवृत्तस्तदा तत्पत्नी मदयन्ती पतिं निवार्याहायं महादोषो न वृथा गुरोर्वाक्यमतस्तत्पदे धृत्वा तरिष्यसि।।१९-२५।। इति पत्न्या वचः श्रुत्वाऽञ्जलिस्थं जलं तत्याज। कल्माषसलिलं पादयोः पपात। तेन स कल्माषपादाख्यो ब्रह्मराक्षसोऽभूत्।।२६-२७।। राजपत्नी वसिष्ठपदे धृत्वाऽऽहालं कोपेन स्वबालमुद्धरेति। ततः शांतो वसिष्ठो ध्यानात्सर्वं ज्ञात्वा प्राह। द्वादशवर्षाणि राक्षसो भूत्वाऽयं पूर्ववद्भविष्यतीत्युक्त्वा स्वाश्रमं ययौ। राजापि राक्षसो भूत्वा स्वकर्मवशान्निर्जने वने स्थित्वा नृपश्वादीनभक्षयत्।।२८-३१।। एकदा मार्गे ब्राह्मणदम्पती गच्छन्तौ दृष्ट्वा व्याघ्रः पशुमिव राक्षसो ब्राह्मणं जग्राह।।३२-३३।। तदा भीता शोकान्विता ब्राह्मणी तमाह। हे पितः मे सौभाग्यं रक्ष प्राणेश्वरं मुञ्च। वल्लभे ममातीव प्रीतिः एनं त्यज शोकं वारयाथवा मां भक्ष। पतिं विना नारीणां जन्म वृथाऽतः पतिप्राणान्रक्ष मां वा भक्ष। रूपादिसंपन्नो युवाऽयं विद्वानस्य रक्षणात्ते जगद्रक्षणपुण्यं भवेत्कृपां कुरु। ते दुहिताऽहम्। मे पुत्रा भविष्यन्ति चेत्ते नाम ख्यापयिष्यामीत्येवं शोकव्याप्तया तया बोधितोऽपि तद्वाक्यमनादृत्य स तं भक्षितवान्।।३४-३९।। पतिं भक्षितं दृष्ट्वा ब्राह्मणी तमाह। त्वं सूर्यवंश्यो राजा शापाद्राक्षसो भूत्वाऽपि द्वादशवर्षोर्ध्वे राजा भविष्यसि।।४०-४१।। तदा स्त्रिया रतिं करोषि चेन्मरिष्यसि। अनाथविप्रहिंसापापं भोक्ष्यसीति शापं दत्वा पत्युरस्थीन्यादायाग्निं विवेश।।४२-४३।। ततः नृपो राक्षसत्वं हित्वा पूर्ववत् भूत्वा पुरं प्राप। तदा कामार्ता स्वमालिङ्गितुमागतां पत्नीं ब्राह्मणीशापमुवाच। साऽपि दुःखिता प्राणांस्त्यक्तुमुद्युक्ता दुःखितं पतिं प्राह। द्वादशाब्दैः कष्टं न नष्टं पुत्रोऽपि न दृष्टः। इति श्रुत्वा नेत्राभ्यामश्रु मुञ्चन्नृप आह। किं करोमि दैवं बलवत्। इत्युक्त्वा

पुरोहितान्मन्त्रिणश्चाहूय प्राह। ब्रह्महत्या जातेति।।४४-४९।। ते ऊचुस्तीर्थयात्रां कुरु, शुद्धो भविष्यसीति। सस्त्रीको राजाऽपि यथाविधि तीर्थयात्रां चकार। प्रतितीर्थं विधिवत्स्नात्वा वस्त्रान्नधनैर्विप्रानतोषयत्तथाऽपि घोरा ब्रह्महत्या तं न मुमोच।।५०-५३।। चिन्ताग्रस्तो निर्विण्णो राजा दैवान्मिथिलापुर्या बहिःप्रदेशे वृक्षाधः स्थितस्तत्र सगणो रुद्र इव ऋषिभिः सह गौतम आगात्। राजा तं दृष्ट्वा हर्षान्वितस्तं ननाम। तं दुःखितमाश्वास्य दयालुर्गौतमः सर्वं पप्रच्छ।।५४-५८।। हे राजन्, ते राष्ट्रं केनाक्रान्तं कुतो वनवासश्चिन्ताव्याकुलितो भासि। सर्वं वदेति।।५९।। राजोवाच। दैवाद्विप्रशापो ब्रह्महत्या चाप्ता। प्रायश्चित्तक्षेत्रतीर्थाचरणधर्मानुष्ठानैरपरिहार्या घोरा हत्या मामनुवर्ततेऽद्य मे जन्मं सफलम्। ते पदं दृष्टं कष्टमपि नश्येदिति ननाम। कृपालुर्गौतम आह। मा भीः शंकरो मृत्युञ्जयस्त्राता। ते पापनाशार्थं महापापापहं पावनं गोकर्णक्षेत्रं कथयामि। यत्स्मरणाद्ब्रह्महत्यादिनाशः। यत्र सदाशिव आस्ते। यथा कैलासशिखरं तथेदं कर्पूरगौरनिवासस्थानम् ।।६०-६७।। सर्वथा नैशध्वान्तनाशे सूर्यं विनाऽन्ये न समर्थाः।।६८।। तथा गोकर्णं विनाऽन्यतीर्थादीनि सर्वाघहरणे न शक्तानि। गोकर्णस्य दर्शनात्स्मरणाच्च ब्रह्महत्यासहस्राणां नाशः। पवित्रता च। इन्द्रादयो यत्र तपस्तप्त्वा सिद्धार्था अभवंस्तत्क्षेत्रप्रभावात्तत्र तपादिकं लक्षगुणं भवेत्। यत्र निवासमात्रतो ब्रह्मादयः सिद्धिं गताः किमन्यद्वक्तव्यम्। गोकर्णं साक्षात्कैलासं विष्ण्वाज्ञया गणेशेन प्रतिष्ठतम् महाबलेशं साक्षाच्छिवं विद्धि। पुण्ये गोकर्णक्षेत्रे ब्रह्मविष्ण्वाद्या देवा वसन्ति। सूर्यचन्द्रवस्वादयः पूर्वद्वारि ।।६९-७६।। यमाग्निचित्रगुप्तरुद्रपितृगणा दक्षिणद्वारि, वरुणादयः पश्चिमद्वारि, कुबेरभद्रकाली उत्तरद्वारे च स्थित्वा प्रीत्या शिवमुपासते तथाऽऽसमन्ताद्विश्वावसुचित्रसेनादिगन्धर्वा गीतादिना कश्यपात्रिवसिष्ठाद्या मुनयस्तपसा उर्वशीतिलोत्तमाघृताचीमेनकाप्सरसो नृत्येन चेश्वरमुपासते। विश्वामित्रजाबालिजैमिन्याद्या यत्र सिद्धिं गताः। सनकाद्या नारदाद्याः सुरर्षयो मरीचाद्या मानसाश्च। सिद्धसाध्यमुनियत्यजिनधारिब्रह्मचारिणश्चेशमुपासते। त्वगस्थिमात्रावशिष्टदेहा अपि तपस्विन ईशमुपासते। गन्धर्वपितृवसुविद्याधरकिन्नरा दर्शनार्थं पुनः पुनरागच्छन्ति।।७७-८७।। गुह्यककिंपुरुषशेषनागाद्या भूतपिशाचवेताला अपीक्षितुमायान्ति। दिव्यभूषणभूषिता देव्यो देवाश्च सूर्यसंकाशविमानैरागच्छन्ति। केचिद्भक्त्या स्तुवन्ति गायन्ति नृत्यन्ति। केचिद्दर्शनलालसा ईशं पूजयन्ति। येषां येषां ये ये कामास्तेऽत्र दर्शनमात्रात्सिद्ध्यन्ति। महर्षयोऽगस्त्याद्याः कामाद्या देवाः प्रियव्रताद्या भूपा अत्र वरान् लेभिरे। शिशुमारो भद्रकाली च त्रिकालमीशं पूजयति। निसर्गवैरिणो गरुडाद्या अत्र सर्पादीन्न हिंसन्ति। अत्र लब्धवरा रावणादिराक्षसाः बिभीषणो नित्यमीशं पूजयति च।।८८-९४।। एवमत्र सिद्धदेवदानवा ईशमाराध्येष्टं प्रापुः। सर्वेऽप्यत्र स्वनाम्ना लिङ्गानि स्थापयन्ति। बहवः पुरुषार्थान् लेभिरे। कार्तिकगणेशाद्यैर्ब्रह्मादिभिश्चात्र स्वनाम्ना लिङ्गानि प्रतिष्ठापितानि। तथैव धर्मक्षेत्रपालदुर्गाशक्त्यादिभिश्च। यत्र पदे पदेऽसंख्यातानि लिङ्गानि तीर्थानि च। यत्र सर्वाण्यप्युदकानितीर्थानि सर्वेऽपि पाषाणा लिङ्गानि च। कृते महाबलेशलिङ्गं श्वेतम्। त्रेतायां रक्तम्। द्वापरे पीतम्। कलौ कृष्णं च। सप्तपातालगतं महोन्नतम् लिङ्गं कलौ मृदु भूत्वा सूक्ष्ममिव दृश्यते। पश्चिमाब्धितीरे ब्रह्महत्यादिपापहरं गोकर्णक्षेत्रम् ।।९५-१०३।। यद्दर्शनात् ब्रह्महत्यादीनि पारदार्यानि दुराचारभवानि पापानि नश्यन्ति। गोकर्णलिङ्गदर्शनमात्रेण कामान् लब्ध्वा नरो मोक्षं व्रजेत्। ये तत्र पुण्यदिने स्थित्वा भक्त्येश्वरमभ्यर्चन्ति ते रुद्रलोकं यान्ति नात्र विचारणा कार्या। यदा कदा वा गोकर्णमेत्य यो भक्त्येशमर्चति स ब्रह्मलोकं यायात्। रवीन्दुबुधवारपूर्णिमादिपर्वसु समुद्रे स्नानादि कृत्वा शिवं सम्पूज्य यो व्रतहोमब्राह्मणभोजनादि करोति तदनन्तफलं भवेत्। व्यतीपातप्रदोषसंक्रान्तिशिवरात्रिषु शिवपूजनादनन्तपुण्यम्। यत्र भक्तवत्सलः

बिल्वपत्रार्पणमात्रेण तुष्यति तस्य फलं को ब्रूयान्न कोऽपि।।४-११।। माघे निशीथे शिवरात्रौ शिवेऽत्र बिल्वार्पणात् त्रैलोक्यदुर्लभं फलम्।।१२।। ईदृक्क्षेत्रं ये न यान्ति ते दुर्भगाः माहात्म्यं न शृण्वन्ति ते बधिराः। शिवसन्निधौ उपोषणजागरादि कुर्वन्ति तानि तेषां स्वर्गसोपानानि।।१३-१४।। चतुर्विधपुरुषार्थदे गोकर्णेऽनेके दुर्लभान्वरान् लेभिरे। मुख्यतीर्थेषु स्नात्वा महाबलेशं संपूज्य नरः शुद्धो भवेत्।।१५-१६।। इति श्रुत्वा राजा पप्रच्छ। गोकर्णमाहात्म्यं त्वत्तो विस्तराच्छ्रुतम्। अत्र महापापात्को मुक्तस्तन्मे कृपया वदेत्युक्त्वा गौतमपदे दधौ।।१७-१९।। गौतम आह। क्षेत्रमाहात्म्यं शृणु। तत्र महापापा मुक्ता मयाऽपि दृष्टाः। एकदा माघे शिवरात्र्यां गोकर्णमहं गतोऽस्मि। तत्र यात्रिका आगताः। मध्याह्ने व्रताहात्परदिने वृक्षच्छायां श्रितोऽहम्। रोगपीडितां वृद्धामन्धां शुष्कमुखीं व्रणपीडितां पूयदुर्गन्धां गण्डमालोदररोगव्याप्तां दन्तहीनां कफावरुद्धकण्ठां म्रियमाणां चण्डालीमद्राक्षम् ।।२०-२४।। सूर्यकिरणस्पर्शान्मरिष्यतीव सर्वाङ्गशूला गलद्गुदा पदे पदे स्खलन्ती मरणोन्मुखी वृक्षच्छायामासाद्य सा विधवा भुवि पतित्वा ममार।।२५-२७।। तदाऽकस्मात्सूर्यनिभं विमानं तत्रागतम्। तत्र शूलखट्वाङ्गधराश्चन्द्रमौलिनः किरीटकुण्डलधराः शिवदूताश्चण्डालीं नेतुमागतास्तान्दृष्ट्वा विस्मितोऽहमपृच्छं किमर्थमागता इति। त ऊचुरिमां कैलासं नेतुमिति।।२८-३१।। पुनर्विस्मितेन मया पृष्टं ईदृक्चण्डाली दिव्यं विमानमर्हति किम्। कः श्वानं सिंहासने स्थापयेत्। जन्मतोऽनया पापं कृतम्। पशुमांसाहारपुष्टा हिंसापरा कुष्ठिनीयं कैलासमर्हति किम्। यस्याः शिवज्ञानतपःसाधनदयासत्यवार्ता न।।३२-३६।। यया पञ्चाक्षरी न जप्ता शिवो न पूजितो नापि स्मृतः शिवरात्र्युपोषणादि न कृतम्। दानं च न दत्तम्। पर्वणि तीर्थस्नानं न कृतं व्रतं च नाचीर्णम्। यस्याः सर्वाङ्गे बहुदुर्गन्धः पूयादि स्रवति च। अस्याः पूर्वपापमस्तु। अद्य तु मुखतः कीटाः पतन्ति। ईदृग्दुराचारा निन्द्या पापिनीयं कथं शिवमन्दिरमर्हति। कौतुकं मे भाति। इति पृष्टास्ते हृष्टास्तस्याः पूर्वकर्मोचुः। पूर्वजन्मनीयं चन्द्रमुखी सौमिनीसंज्ञा विप्रकन्याऽभूत्। तां बालां सुन्दराङ्गीं दृष्ट्वानुरूपं वरमप्राप्य।।३७-४६।। पिता विवाहकालातिक्रमभिया साधारणाय द्विजाय गृह्योक्तविधिना तां कन्यां ददौ। उद्वाहिता सा रुचिरा भर्तृगृहे कञ्चित्कालं तस्थौ। दैववशाद्बाल्य एव तत्पतिर्मृतः। ततः पत्या विरहिता दुःखिता सा पितृभ्यां गृहमानीता। तरुणी सुन्दरी सा तरुणं दृष्ट्वा कामं जेतुं न शशाक। ततो रहसि जारकर्मरताऽभूत्तदपि प्रसिद्धं जातम्। पापं न हि गोप्यते। विषयासक्ता चलचित्ता व्यभिचारिणी सा पित्रादिभिः सह ज्ञातिभिर्बहिष्कृता। तत्संसर्गदूषिताः पित्रादयस्तां त्यक्त्वा प्रायश्चित्तं चेरुः। ततो निःशङ्कं सा कामार्ता तत्र नगरे सुन्दरं तरुणं वैश्यं दृष्ट्वा तद्रूपमोहिता सती तेन रेमे।।४७-५६।। सा कुलत्रयवैरिणी तद्गेहिनी भूत्वा रमयांबभूव। स्त्रियः कामेन नश्यन्ति ब्राह्मणो हीनसेवया। राजानो ब्रह्मदण्डेन यतयो भोगसंग्रहात्। वैश्येन सह रममाणायास्तस्याः पुत्रा अपि जाताः। मद्यमांसरता मत्ता वैश्यस्त्री भूत्वैवं सर्वं वयोऽनयत्। मदान्धा सैकदाऽऽहारार्थं धेनुवत्सं जघान। तच्छिरः शिक्ये निधायान्यन्मांसं पक्त्वाऽभक्षयत्।।५७-६३।। मद्येन भ्रान्ता सा गाढं सुप्त्वाऽन्येद्युरुत्थाय धेनुं दोग्धुं गत्वा।।६४।। वत्सस्थाने मेषं दृष्ट्वा शिक्ये च वत्सशिरो दृष्ट्वाऽऽत्मानं निर्भर्त्स्याह। हा चन्द्रमौले शिव शिव, दुरात्मना मया किमिदं पापं कृतम्। पतिः कुप्येतेति मत्वा शिरोस्थिचर्मादि गर्ते निक्षिप्य समीपस्थगृहं गत्वा व्याघ्रेण वत्स हत इति रुरोद। भर्तुरग्रेऽप्येवम्। एवमादीनि कृत्वा सा मृता। पितृभिः सह तामादाय यमदूता रौरवादिनरकेषु प्राक्षिपन्। तत्र चिरं दुस्तरां यातनां भुक्त्वा गोवधाच्चण्डाली असम्यग्दर्शनादन्धा औपपत्याद्गलत्कुष्ठा च जाता।।६५-७१।। उच्छिष्टान्नदानादिना बाल्ये पितृभ्यां स्नेहेन पालिता।।७२।। यथा यथा सा ववृधे व्रणा अपि तथा तथा। बाल्य एव पितरौ मृतौ। सा निराश्रया जाता। दीना

।।श्रीगुरुःशरणम्।।

अथाष्टमोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

सकुसुतविधवाप्ता मर्तुकामा प्रदोषव्रतकथनत ईशस्तान्निवर्त्याष्टमेऽन्तात्।
स विबुधमकरोत्तज्जं च जन्मान्तरेऽस्याः सुत इह भविता दिङ्मालिनी यस्य कीर्तिः।।

नामधारक उवाच। गोकर्णमहिमा श्रुतस्तत्र श्रीपादः कतिकालं तस्थौ।।१।। हे कृपाब्धे गुरुमूर्ते, तत्र मे मनो लग्नं तच्चरितश्रवणेऽतीवानन्दो वर्धते। सिद्ध आह। चरितं वक्ष्ये। सावधानतया शृणु। लोकानुग्रहकृच्छ्रीपादः त्रिवर्षाणि तत्रोषित्वा श्रीपर्वतं गतः। चरणं पवित्रमिति श्रुतेर्यद्दर्शनात्सर्वतीर्थफलं, यत्पदे सर्वतीर्थानि, तस्याटनं लोकानुग्रहाय। सोऽदौ चतुरो मासान्स्थित्वा निवृत्तिसंगमे स्नात्वा कुरुपुरं ययौ। यत्र कृष्णावेणी तन्महिमा त्रैलोक्ये दुर्लभस्तद्वर्णने ग्रंथविस्तरो भवेत्। अतः स्वल्पं कथयिष्ये। श्रीपादस्थानमहिमा प्रसिद्धोऽभूत्।।२-१०।। तत्र ये भक्त्या भजन्ति ते कन्यापुत्रलक्ष्म्यादीष्टं लभन्ते। विशेषतोऽस्य महिमा न वर्ण्यते। किञ्चिच्छ्रीपादस्य चरितं वच्मि। अन्यमवतारं धृत्वाऽपि श्रीपादस्तत्र गुप्तरूपेण वर्तते। द्वितीयावतारप्रयोजनं शृणु। तद्ग्रामे वेदशास्त्रज्ञः कश्चिद्विप्रः आसीत्। तद्भार्या पतिसेवारता सुशीलाऽम्बिकाख्याऽभूत्। कर्मवशात्तस्याः पुत्रा जाता मृताश्चानेकतीर्थसेवादिना एको जीवितः। स दैववशान्मूर्खोऽभूत्तं माता पुपोष। ततोऽष्टमेऽब्दे व्रतबन्धं कृत्वा पिता तस्मै वेदानुपादिशत्।।११-१८।। स मंदधीरेकमपि मंत्रं न पपाठ।।१९।। तेन दुःखितो वैदिकस्तत्पिता प्राह। हा कष्टं, देवानाराध्य मूढः पुत्रो लब्धः। प्राक्कर्म दुर्घटम्। मे कुलं नष्टम्। एवमुक्त्वा तं ताडयामास। तदा दुःखिता तत्पत्नी पतिं निवार्याह। कष्टेनायं लब्धो बालश्चिरं जीवतु। हे दयाब्धे, द्विजकुले जातस्याप्यस्य प्राक्कर्मतो मूढत्वम्। अलं ताडनेन। ताडयिष्यसि चेत्तेऽग्रे प्राणांस्त्यक्ष्ये। इति श्रुत्वा तथाविधं स्वदैवं मत्वा विप्रस्तूष्णीमास। ततोऽल्पकालेन पिता रोगग्रस्तो मृतः।।२०-२६।। विधवा दुःखिता ब्राह्मणी दारिद्र्याद्याच्ञयाऽऽत्मानं मूढं पुत्रं च जीवयामास।।२७।। मूर्खस्य विवाहो न जातः। मातृयाचितान्नजीविनं तं लोका ऊचुः। रे मूढ, शीर्षे घटं धृत्वा गृहे गृहे जलं देहि। त्वं कुलहाऽश्मवत्ते जन्मना कुलं लाञ्छितम्। त्वत्पिता वेदशास्त्रज्ञः सदाचारश्चतुर्दिक्षु ख्यातस्ते जन्मना दूषितः। मातृयाचितान्नभक्षकस्त्वं न लज्जसे किम्। पितॄनधोगतिं नेष्यसि। त्वं पशुस्ते व्यर्थजन्मनाऽलम्। दुर्मते, गङ्गाप्रवेशं कुरु। इति श्रुत्वा स मूढो दुःखितो मातरं प्राह मातः प्राणांस्त्यक्ष्ये।।२८-३४।। सर्वे मूढं मां निन्दन्ति। किमीदृक्शरीरेण। त्वं च पोषणे श्रान्तास्यतो वनं यास्ये। इति श्रुत्वा चिन्तया शोकाब्धौ पतिता माता विललाप।।३५-३६।। ततो दुःखितौ तौ मर्तुं कृष्णाप्रवाहं गतौ। तत्र श्रीपादं दृष्ट्वा तत्पादौ धृत्वा दुःखविह्वलौ प्रोचतुः। आत्महत्या दुस्तराऽपि गङ्गायां प्राणांस्त्यक्ष्यावः। भवानाज्ञां ददातु। भवद्वचनाद्धि सद्गतिरिति श्रुत्वा दयाब्धिः श्रीपाद आह। वां सङ्कटं किं प्राप्तम् प्राणा हि दुस्त्यजाः। ब्राह्मणी आह। हे भक्तवत्सल सङ्कटाद्रक्ष। अनेकतीर्थाटनव्रतदेवार्चनोपवासादिना।।३७-४२।। एकोऽयं पुत्रो जातोऽयं दुर्मतिर्लोकनिन्दितः।।४३।। वेदशास्त्रज्ञो मे पतिस्तत्कुक्षौ जातोऽयं मन्दधीर्दुरात्मा। हे श्रीपाद, दयस्व। जन्मान्तरेपीदृक्सुतो माऽस्तु। भाविजन्मनि सत्पुत्रोपायं कथय। दैन्यहर्तुः कृपाब्धेस्ते पादौ धृतौ। भाग्यात्पादौ दृष्टौ। संसारेऽस्मिन्संभूय कष्टं

दृष्टम्। सुखं न दृष्टम्। सत्पुत्रा नष्टाः सौभाग्यं भ्रष्टम्। शिष्टोऽयमेकः पुत्रः कष्टदोऽजागलस्तनवत्। श्रीगुरो, मे याच्ञां शृणु। मानुष्ये भाविजन्मनि सुपुत्रो मे जायताम्। यं सर्वे नमन्ति तादृक्सुतोत्पत्त्युपायं वद। ते पादौ धृतौ।।४४-५०।। येन पुत्रेण मे मोक्षो भवेत्पितरोऽपि स्वर्गे ध्रुवं स्थास्यन्तीदृशी मे वासना। भवानिव ब्रह्मज्ञानी सर्वपूज्यः पुत्रः प्राग्वयस्येव भवतु।।५१-५२।। इति श्रुत्वा सदयः स आह। शिवमाराधय। हरिवत्ते पुत्रो भविष्यति। गोप्या ईशार्चनं दृष्टम्। तस्याः कारुणिकः कृष्णः पुत्रो जातः। तथैवेशमाराधयाग्रे जन्मनीशप्रसादात्ते सुपुत्रो भविष्यति। ब्राह्मणी आह। गोप्या कथं शिवपूजा दृष्टा, कथं कदा वा पूजितः। अहमपि व्रतं विधिनाऽऽचरिष्ये। इति पदलग्नाऽभूत्तां श्रीपाद आह।।५३-५८।। प्रदोषे मन्दवारे गोपिकयेशपूजनं दृष्टं स्कन्दपुराणे तच्चोक्तम्। तत् श्रुत्वा तुष्टा ब्राह्मणी नत्वा पप्रच्छ। चित्राऽभिनवा कथा श्रुता। प्रदोषेश्वरार्चनात्कथं कृष्णः पुत्रो जातः प्रदोषेशार्चनान्ममापीदृक्फलं लभेत्, कथमीशोऽर्चितस्तन्मे कथय।।५९-६३।। श्रीपाद आह। स्कान्दोक्तां कथां शृणु। पवित्रे उज्जयिनीनगरे चित्रं जातम्। तत्र धार्मिक इन्द्रसेनो राजा तत्सखो मणिभद्रः पूजयेशं प्रसादयामास। शिवः कोटिसूर्यप्रभं चिन्तामणिं ददौ। मणिभद्रः कण्ठेऽधारयत्।।६३-६६।। मणेस्तेजस्पर्शाल्लोहं सुवर्णतां याति ।।६७।। यद्यच्चिन्त्यते तन्मणेः स्मरणाल्लभ्यते। इति ज्ञात्वा राजानः केचित्स्नेहेन केचित्कौतुकेन केचिद्बलात्केचिन्मूल्येन चायाचन्त। केनापि प्रकारेण मणिं देहि। नोचेत् युद्धायागमिष्याम इति दूतान्प्रैरयन्। तथाऽपि मणिर्न दत्तः। तदा सैन्यैः सहागत्य राजानस्तद्राष्ट्रं वेष्टयामासुः। त्रयोदश्यां शनिवारे प्रदोषे राजा मणिभद्रेण सह हर्षेण विधिवन्महाकालेशलिङ्गं पूजयामास। तदा गोपपुत्राः पूजां दृष्ट्वा स्वाङ्गणे शिवालयं पाषाणमयं लिङ्गं च कल्पयित्वा।।६७-७५।। कौतुकेन यथा दृष्टं तथा कल्पितोपचारैः पत्रादिभिश्च संपूज्य नैवेद्यार्थं जलं ददुः।।७६-७७।। गोप्यस्तन्मातर एत्य तान्निवार्य भोजनार्थं निन्युः। पूजासक्त एकः गोपसुतो न यातस्तन्माताऽऽगत्य तं ताडयित्वाऽऽह। भोजनावसरे रात्रौ अन्धकारे किं करोषि। उत्तिष्ठ भोजनार्थं गच्छेत्युक्तोऽपि न बुबोध। तदा क्रुद्धा माता पूजां भङ्क्त्वा पाषाणं दूरतस्त्यक्त्वा गृहं गता। पूजां विसर्जितां दृष्ट्वा बालो विललाप। मूर्च्छितो निपपात च। लिङ्गं चित्ते आनीय प्राणास्त्यक्तुमुद्युक्तं बालं ज्ञात्वा शूलपाणिः प्रसन्नोऽभूत्।।७८-८३।। अङ्गणं शिवमन्दिरं जातम्। सूर्यसङ्काशं लिङ्गं तत्रोद्गतम्। बालः प्रबुद्धोऽभूत्।।८४।। शिवः स्वरूपेण प्रादुर्भूय बालं स्वाङ्के धृत्वा वरान्वृणीष्वेति प्राह। बाल आह। मे मात्रा ते पूजा विसर्जिता। हे शंकर, कृपां कुरु। कोपं मा कुरु। दयालुः शिवः प्रीत आह। तव मात्रा मे प्रदोषपूजा दृष्टा। सा जन्मान्तरे विष्णुमाता भविष्यतीति मे वचः सत्यम्। नात्र संशयः। यद्वाञ्छसि तत्त्वं मे प्रसादादवाप्स्यसि। उत्तमं सुखं भुङ्क्ष्व। ते वंशो धन्यो भविष्यति।।८५-८९।। इति प्रसन्नो गिरिजापतिस्तदा सदाशिवोऽदात्परमं वरं मुदा।। पदारविन्दं प्रणतस्य पश्यतः सुतस्य लिङ्गेऽन्तरधादधीश्वरः।।९०।। लिङ्गं रत्नवद्बभौ। कोटिसूर्याभः शिवालयश्च। लोकाः सूर्य उदित इति मेनिरे। युद्धायागता नृपाः शङ्किता ऊचुः। द्वेषं त्यक्त्वा राजदर्शनं कर्तव्यम् ।।९१-९२।। पवित्रपुरे रात्रावपि सूर्य उदितः। पुण्यवान्राजाऽयम्। अतो द्वेषो न कार्य इत्युक्त्वा दिदृक्षवस्ते दूतान् प्रैरयन्। राजाऽपि हर्षेणागत्य तान्स्वपुरं निन्ये। ते परस्परं ऊचुः। कथं रात्रौ सूर्य उदित इति। ततस्ते सकौतुकाश्चन्द्रसेनसहिता रत्नखचितं शिवालयं लिङ्गं च दृष्ट्वा गोपालात्सर्वं श्रुत्वा तस्मै गोपाधिपत्यं सम्पदश्च दत्वा स्वं स्वं स्थानं ययुः। राजाप्यभयोऽभूदिदं प्रदोषपूजाफलम्।।९३-९८।। गोपपुत्रो मातरमेत्याह। भवान्तरे त्वदुदरे विष्णुरवतरिष्यति। प्रसन्नः शिवो वरं ददौ।।९९-१००।। मया तवापराधक्षमापनं याचितम्। स क्षमापनं दत्वा मे वरान्ददौ। एवं पुत्रो मात्रेऽकथयत्। ईशे प्रसन्ने किं दुर्लभम्। हे विप्रस्त्रि, एवं

प्रदोषपूजादर्शनादीशः प्रसन्नोऽभूत्। सत्पुत्रेच्छा चेत्प्रदोषे शिवं पूजय। मादृक्पुत्रो भविष्यति। इत्युक्तामपि प्राप्तदुःखासहनां तां ज्ञात्वा प्रसन्नो भक्तवत्सलः श्रीपादस्तत्पुत्रमाहूय तन्मस्तके करं दधौ। तदा स ज्ञानी त्रिवेदभाष्यतर्कादिनिपुणोऽभूत्।।१-६।। तं दृष्ट्वा विस्मिता माता प्राह।।७।। कार्यार्थं भूमौ अवतीर्णोऽयं मानुषवेषीश्वर एव प्राग्जन्मपुण्याल्लब्ध इत्युक्त्वा पुनर्नत्वा प्राह। त्वमेवेशः प्रदोषे त्वां पूजयामि। ते वाक्यं न मृषा। त्वादृङ्मे पुत्रो भविष्यति।।८-११०।। इति निश्चित्य मनसा तं संपूज्य ग्रामं गत्वा प्रदोषे शिवमपूजयत्। वेदशास्त्रसम्पन्नः सर्वेभ्योऽधिकस्तत्पुत्रो ज्ञानी बभूव। स कृतविवाहः पुत्रादिसहितोऽभूदीदृशी गुरुकृपा। एवं कृपाब्धिर्गुरुर्भक्तेभ्यः सानन्दसम्पत्तीर्दत्ते।।११-१४।। एवं बुद्धः सिद्धः प्रोचे तं नामधारकं भक्तम्। तच्छृण्वन्तु समस्ता हर्षेणेत्थं सरस्वती वदति।।११५।।

।।इति अष्टमोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

अथ नवमोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

आख्यानकीर्तिः श्रुतितोऽस्य मुक्तिर्भवान्तरेऽसौ रजकाय राज्यम्। दास्यंस्तिरोऽभून्नवमेऽत्र कृष्णातटेऽपि सम्पूरयति स्वतृष्णाम्।।१।।

इति सिद्धवचः श्रुत्वा नामधारको नत्वा पप्रच्छ। श्रीपादे तत्र स्थिते कथमग्रतः कथा जाता। कृपया तां वद। इति श्रुत्वा तद्भक्तिं ज्ञात्वा सिद्धो वक्तुमारेभे। हे नामधारक कौतुकं वच्मि। तद्ग्रामे रजको गुरुसेवकोऽभूत्।।१-४।। यद्दर्शनाद्गङ्गास्नानाधिपुण्यं स्वयं कृतार्थोऽपि स श्रीपादो लोकसंग्रहार्थं प्रत्यहं यथाविधि स्नातुं कृष्णां याति।।५-६।। तत्र स्नानं कर्तुमुद्युक्ते श्रीपादे कदाचिद्वस्त्रक्षालकः रजकः श्रीपादमेत्य ननाम। एवं कायेन मनसा वाचा प्रत्यहं त्रिकालं भक्त्या दण्डवन्ननाम। एवं कियति काले गते प्रसन्नः श्रीपादस्तमाह। रे रजक, किमर्थमीदृक्कष्टं कुरुषे। तुष्टोऽस्मि ते राज्यं दास्ये। इति श्रुत्वा वस्त्रप्रान्ते ग्रन्थिं बध्वाऽऽह। त्वं सत्यसङ्कल्प ईश्वरोऽसीति। ततः संसारचिन्तां त्यक्त्वा सेवको भूत्वा श्रीपादं दूरतो दण्डवन्ननाम।।।७-१३।। मठाङ्गणं नीरजस्कं कृत्वाऽद्भिः प्रोक्षयामास ।।१४।। ततो वासंतिके कालेऽलङ्कृताभिः स्त्रीभिः सहालङ्कृतो यवनजातीयो राजा नौकास्थः क्रीडञ्जलमध्यप्रदेशतो जगाम। उभयतटतो हस्त्यश्वादयो जग्मुर्वाद्यानि च नेदुः। रजको गुरुचिन्तनं त्यक्त्वा वाद्यध्वनिं श्रुत्वा कृष्णायां सपरिवारं भूपं दृष्ट्वा विस्मित आह। संसारे यदीदृक्सुखं न चेत्पशुवज्जन्म। राज्ञोऽस्य जीवितं धन्यं यस्येदृक्स्त्रीरत्नभूषणादि। ईशभक्तोऽयं वा कथं पुण्यमर्जितं को वा गुरुराराधितः यत ईदृगभूत्।।१५-२२।। इति विचिन्त्य गुरुं दण्डवन्ननाम। श्रीपादस्तद्धृदयं ज्ञात्वा भक्तवत्सलस्तमाहूय किं चिन्तयसीति पप्रच्छ।।२३-२४।। स आह। भोः स्वामिन्राजवैभवं दृष्टम्। तुष्टोऽस्मि। तं श्रीगुरुदासं मन्ये। पुरा देवमाराध्येदृशीं दशां गत इति कृपाब्धे चिन्तितम्। अविद्यावशान्नानावासना उद्यन्ति। किं तादृशैर्विषयैस्त्वत्पदं मे सुखदम्। श्रीपाद आह। त्वं जन्मतः कष्टभागसि। राजभोगेच्छाऽपि तेऽस्ति। यस्य नेन्द्रियतृप्तिस्तस्य मनो न निर्मलम्। अवशिष्टा चेद्वासना जन्मान्तरकष्टदाऽतो राज्यं भुङ्क्ष्वेति श्रुत्वा नत्वा रजक आह। दयाब्धे, ममोपेक्षां मा कुरु।।२५-३०।। श्रीपाद आह। ते राज्ये प्रीतिरस्त्यत इन्द्रियतुष्ट्यर्थं म्लेच्छकुले जनिष्यसे। रजक आह। चरणवियोगो मास्तु। पुनर्दर्शनानुग्रहं कुरु। श्रीपाद आह। वैडूर्यपुरे त्वं जनिष्यसेऽन्तकाले दर्शनं भविष्यति। दर्शनाच्च मे ज्ञानं भविष्यति। चिन्तां मा कुरु। मे वचः सत्यम्। म्लेच्छयोनिं व्रज। कार्यवशान्नरसिंहसरस्वतीसंज्ञको मेऽवतारो भविष्यति। तत् श्रुत्वा रजकः साष्टाङ्गं ननाम। श्रीपादस्तं निकटमाहूय प्राह। इह जन्मनि ते राज्यभोगेच्छा जन्मान्तरे वा। रजक आह। वृद्धोऽस्मि जीर्णोऽतः परजन्मनि भोक्ष्ये। यौवने हि भोगरुचिः।।३१-३८।। श्रीपाद आह। गच्छ शीघ्रं जन्मान्तरेऽकण्टकं राज्यं भुङ्क्ष्व।।३९।। इत्युक्तः स प्राणांस्त्यक्त्वा वैडूर्यनगरे म्लेच्छकुले जज्ञे। चित्रा तत्कथाऽग्रे प्रसङ्गतो वक्ष्ये। श्रीपादस्तत्र किञ्चित्कालं स्थित्वा महिमानं ख्यापयामास। तद्वर्णने ग्रंथविस्तरो भवेदतः संक्षेपतो वक्ष्ये। सर्ववर्णने मे का शक्तिः। अमृतदृष्टेः सर्वमाहात्म्यं को वदेत्। श्रीगुरोः स्थानमहिमानमपि सर्वं वक्तुं न शक्नोमि। तस्मात्संक्षेपतो वक्ष्ये। यत्र सर्वकामसिद्धिस्तस्मिन्कुरुपुरे कञ्चित्कालं स्थित्वाऽऽश्विनकृष्णद्वादश्यां हस्तर्क्षे कृष्णाप्रवाहे भगवान् लोकदृष्ट्याऽदृश्यो भूत्वाऽपि।।४०-४८।। तत्राद्यापि भक्तेष्टदोऽस्ति। तत्रादृश्यरूपेण सर्वदा तिष्ठति।

ज्ञानिनां तु प्रत्यक्षोऽस्ति। श्रीपादस्तत्र जागर्तीति प्रत्ययार्थमेकं निदर्शनं वक्ष्ये। सावधानेन शृणु। तत्स्थानं ये व्रजन्ति तेषां स प्रत्यक्षः। तत्क्षेत्रं कुरवपुरं प्रसिद्धमस्ति।।४९-५२।। सिद्धोऽवदद्यत्खलु नामधारकं पूर्वं यथा श्रीगुरुसत्कथानकम्। श्रोतॄनुवाचापि तु तत्सरस्वतीसंज्ञो द्विजो यस्य परा सरस्वती।।५३।।

।।इति नवमोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ दशमोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्- पथि तस्करघातितभक्तं सार्थमजीवयदेत्य चिरस्य।।
विनिहत्य च तान्दशमे श्रीपादतिवेगवती गतिरस्य।।१।।

श्रीपादमाहात्म्यं श्रोष्यन्नामधारकः सिद्धं नत्वा पप्रच्छ। श्रीपादस्तत्र स्थितोऽवतारोऽन्यश्च जात इति कथितं तद्विस्तराद्वद। सिद्ध आह। माहात्म्यं कति वक्ष्ये! विश्वव्यापी नानारूपधरः परात्मा भक्तवरदः कार्यार्थमवतीर्णोऽपि गुप्तरूपेण तत्र निवसति। पश्य भार्गवो रामोऽधुनाऽस्त्यपि परेऽनेकेऽवतारा जाताः। ब्रह्मविष्णुरुद्ररूपैरुत्पत्तिस्थितिकृन्नारायणः हृषीकेशोऽयं स्वभक्तपालकः दुर्वासःशापं स्वीकृत्य धर्मं साधून्देवान्रक्षति। तस्य पारं के विदुः। यत्र त्रिमूर्तिः तत्कुरुपुरं निधिरेव।।२-८।। यो यो यस्य कामः स क्षेत्रदर्शनात्सिद्ध्यति। श्रीपादस्थानवसतिः कामधेनुरेव।।९।। तन्माहात्म्यं वक्तुं भूमौ कः शक्नोति। तव गुरौ प्रीतिरतस्ते एकं निदर्शनं वक्ष्ये। भक्तमार्गप्रतीक्षकः स सर्वथा भक्तान्नोपेक्षते। यस्यातीव दृढा भक्तिः सोऽचिरादिह परत्र च सुखं भुक्त्वा मोक्षं याति। हे नामधारक, पूर्ववृत्तं शृणु।वल्लभेशः काश्यपगोत्रजः शीलाचारवान्कश्चिद्विप्रः कुटुम्बपोषणार्थं वणिग्वृत्तिरास। स प्रत्यब्दं श्रीपाददर्शनार्थं याति। एकदा वाणिज्यार्थं जिगमिषुर्विप्रः कार्यसिद्धये मनसा सङ्कल्पयामास। यद्यभीष्टधनलाभो भवेत्तर्हि चतुःसहस्रविप्रेभ्य इच्छाभोजनं दास्ये।।१०-१६।। इति संकल्प्य श्रीपादश्रीवल्लभाङ्घ्रिं चिन्तयन्यत्र गतस्तत्र विशेषतः शतगुणितो लाभोऽभूत्। हर्षाच्छ्रीपादपादं चित्ते निधाय गृहमेत्य विप्रभोजनं कर्तुं धनमादाय प्रतस्थे। तज्ज्ञात्वा चोरा व्याजमैत्र्या द्वित्रिदिनं तमनु गत्वा मार्गे विजने घोरे वने प्राहुः। वयं प्रत्यब्दं नियमेन कुरुपुरे श्रीपाददर्शनं कुर्मः। द्विजः सत्यं मेने। एकदा रहसि द्रव्यं हर्तुं चोराः खड्गेन द्विजशिरश्छित्वाऽर्थं जगृहुः। म्रियमाणेन विप्रेण स्मृतो भस्मलिप्तो जटिलो भक्तवत्सलः।।१७-२४।। श्रीपादस्तदैव खड्गशूलहस्त एत्य क्रुधा चोरान् जघान।।२५।। तत्रैकश्चोरो जगन्नाथं श्रीपादं शरणमेत्य करुणं प्राह। स्वामिन्सहागतोऽप्यहं निरपराधोऽस्मि। चोरभावेन न संगतोऽस्मि। विश्वात्मन्सर्वसाक्षिन्त्राहीति श्रुत्वाऽभयं दत्वा श्रीपाद आहेदं भस्म गृहीत्वा शिरः संधायाङ्गे क्षिप। तथेति तेन शीर्ष्णि संधीयमाने श्रीपादेनामृतदृष्ट्या वीक्षिते च स विप्रो जीवितः। अत्रान्तरे सूर्य उदितः। श्रीपादोऽदृश्योऽभूत्। द्विजः सुप्तोत्थितवदुत्थाय हतशेषमाह। कुतो मां धारयसि केनैते हता वद। स आह। विप्रात्र चित्रं जातम्। कश्चत्तापस एत्यैताञ्शूलेनाहन्।।२६-३२।। रक्षार्थं मां नियोज्य छिन्नशीर्षं त्वां भस्मना जीवयित्वाऽत्र स्थितोऽप्यधुनाऽत्रैवादृश्योऽभूत्। कोऽयं तन्न जाने। ते प्राणा रक्षिताः।।३३-३४।। एष आगतो भस्मलिप्तो जटाधारीश्वरो भाति। त्वं भक्तोऽसि। इति श्रुत्वा श्रीपादादर्शनात्खिन्नः संस्तद्धनं गृहीत्वा कुरुपुरं गत्वा चतुःसहस्रविप्रभोजनं चक्रे। एवमनेके सिद्धिं गताः। इत्थं श्रीपादपादमाहात्म्यम्। ततस्तत्पुरं ख्यातम्। तत्रादृश्यरूपेण श्रीपादः सदा निवसति। सर्वगो नारायणोऽवतीर्यापि प्राकृतदृष्टितः गुप्तः स्थितः।।३५-४०।। ततोऽग्रतोऽस्य नरसिंहसरस्वतीसंज्ञकोऽन्योऽवतारोऽभूत् ।।४१।। गङ्गाधरद्विजसुतः स सरस्वतीति ख्यातो गुरोश्चरितमाह सुविस्तरेण। श्रोतुर्मनोहरमिदं सकलानभीष्टानर्थान्प्रदास्यति लघु श्रवणादपीह।।४२।।

।।इति दशमोऽध्यायः।।

श्रीगुरुसंहिताचूर्णिका

अथ एकादशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

एकादशे नृहरिसंज्ञक आस सोऽम्बापुत्रः प्रदोषफलदः प्रणवं पठिष्यन्।
भूत्वाऽप्यवाक्श्रुतिगणानुपनीत ऊच उद्धर्षिणी स्वजननीं बहुधा करिष्यन्।।१।।

नामधारक आह। श्रीपादः कावतीर्य किं चक्रे कृपाब्धे तद्वद। सिद्ध आह। शृणु। स पूर्वोक्तवरसिद्ध्यै विप्रस्त्रीसुतोऽभूत्। गुरूपदेशाच्छनिप्रदोषे शिवं संपूज्य मृताऽम्बिका।।२-३।। उदग्देशे करञ्जपुरे वाजसनेयिविप्रपुत्री जाता। तस्याः पिता जातकर्म नामकर्म च कृत्वाऽम्बेति नाम ददौ। सा कन्या पित्रोः स्नेहमवर्धयत्। ततः सा तद्ग्रामे तदनुरूपाय माधवाय महोत्सवैर्गृह्योक्तविधिना दत्ता। शुभाचारा साध्वी सा पूर्वसंस्काराच्छिवमानर्च। प्रदोषे तौ दम्पती ईशं भक्त्या नियमेनापूजयताम्। शनिप्रदोषे तु विशेषतः। ततः साऽम्बा षोडशवर्षे गर्भिणी जाता।।४-१०।। तृतीये मासे द्विजः पुंसवनावलोभने चक्रे। सा सुदोहदचिह्ना तत्त्वज्ञानमाह। ततः सीमंतोन्नयनं कृत्वा सुवासिनीभ्यो वायनादि ददौ। ताश्च नीराजयामासुः।।११-१२।। ततः शुभे कालेऽम्बा पुत्रमसूत। पिता हृष्टः। स्वावतारज्ञापनाय प्रभुः ॐकारं प्राह। लोका विस्मिताः। मुदा स्नातो माधवो जातकर्माकरोत्। ज्योतिषिका लग्नं वीक्ष्योचुः। पुत्रोऽयं कारुणिको गुरूणामपि गुरुः।।१३-१६।। अस्यानुग्रहात्कोऽपि वन्ध्यो भविष्यति। अस्य वाक्यं श्रुतिवत्। पादश्चिन्तामणिः। सदाऽस्य द्वारि सिद्धयो निधयश्च तिष्ठन्ति। नास्य पुत्रा भविष्यन्ति। स्त्रियं न वरिष्यति। त्रिभुवने पूज्योऽयम्। ईश्वरोवतारोऽयं भाति न संशयः।।१६-२०।। अस्यानुग्रहात्कलिकालभयं न। अयं वो दैन्यहर्ता। युष्माकं कामा अयत्नतोऽतः सिध्यन्ति। निधिरेष गृहागतः। रक्षाऽस्य कर्तव्या।।२१-२२।। इति श्रुत्वा पितरौ हृष्टौ। तेभ्यो वस्त्रादि ददतुः। ते हृष्टा आशिषो दत्वा जग्मुः। दृग्दोषभिया पितरौ रक्षां चक्रतुः। जातमात्रः शिशुः ॐकारं पपाठेति श्रुत्वा इष्टा नागरिकाश्चाजग्मुः। दृग्दोषभिया शिशुं नादर्शयत्। मोहितौ पितरौ कृष्णसूत्रेण भस्मना च रक्षां चक्रुः। परात्मनः कुतो दृग्दोषभीः। अथापि प्राकृतदृष्ट्या रक्षा कृता।।२३-२८।। पिता द्वादशाहे स्वस्तिवाचनपूर्वकं नामकर्म कृत्वा बालाय नरहरिरिति नाम ददौ। माता ममत्वेन ररक्ष। स्वल्पस्तन्यतोऽयं बुभुक्षित इति मत्वाऽम्बा पतिमाह। बालाय मे पयो नालम्। पयस्विनी उपमाताऽजा वा अन्वेष्या। इति श्रुत्वा बालः करेण तत्कुचं पस्पर्श। तदा कञ्चुकीमार्द्रीकृत्य द्वात्रिंशद्धाराभिरमृतोपमं दुग्धमस्रवत्। भुवि गलितं दृष्ट्वा हृष्टा माता दृग्भिया न प्रादुश्चक्रे। सा तं लालयन्ती पर्यङ्के निधाय हर्षाज्जगो। बालः पर्यङ्के न तिष्ठति। भुवि क्रीडति।।२९-३६।। ॐकारं विनान्यन्नोचे। पितरौ खिन्नौ।।३७।। मूक इति चिन्तया मातोवाच यत्स ॐकारमाह। कुलदेव्यर्चनं अर्कवारेऽश्वत्थपत्रस्थान्नभोजनं कारयितव्यमिति। केचिदूचुर्मूकमेनं वाचय। केचित्संबोध्याहुर्वदेति। सर्वं श्रुत्वा प्रहस्योङ्कारमाह। लोका विस्मिताः। केचिदूचुश्चित्रमिदं श्रुत्वा वक्ति नायं बधिरः नात्र हेतुं विद्म इति। एवं केनापि प्रकारेण स नोचे। पितरौ ब्राह्मणमूचतुः।।३८-४४।। सप्ताब्दः व्रतयोग्यः कुमारोऽयं न वक्ति। नो दैवमिदम्। कथमस्य व्रतबन्धः कार्यः। विप्र आह। ब्रह्मकुलोद्भूतस्याष्टमेऽब्दे प्राप्ते

उपनयनसंस्कारः कर्तव्य इति श्रुत्वा पितरौ प्रोचतुर्वा(नौ) दैवयोगः। कथं मंत्रोपदेशः कार्यः। विशेषतः प्रदोषे गौरीशौ पूजितौ। शिवव्रतं व्यर्थं किम्। ईशेन वरो दत्तः। सल्लक्षणः पुत्रः जातोऽपि न वक्तिः। किं कर्तव्यम्। एक एवावयोः पुत्रः स्वप्नेऽप्यन्यो न दृष्टः। आवां वा कथं पालयिष्यति। पुत्रोऽयमीदृशोऽतो वासना न पूर्णा। ईश्वरेण प्रदोषार्चनफलमीदृक्कुतो दत्तम्। एवं विलपंतीं दुखितां मातरं मुद्रयाऽऽश्वास्य करस्पर्शमात्रेण लोहस्य स्वर्णं कृत्वा मात्रेऽदात्।।४५-५३।। विस्मिता सा तदादाय पतिमाहूयादर्शयत्। पितरौ तद्गोपयित्वा बालं गृहं नीत्वाऽन्यल्लोहं ददौ। तत्करस्पर्शात्तदपि स्वर्णं जातम्। बालो गृहस्थं सर्वं लोहं ददर्श तत्स्वर्णं जातम्। तदा विश्वस्तौ।।५४-५६।। तौ पुत्रमालिङ्ग्योचतुः। त्वं तारकः कुलदीपकः। त्वत्तः सुखं लब्धम्। तेऽज्ञान(मौन)कारणमज्ञात्वा मायया त्वां वदावः। हे नन्दन, नौ कामं पूरयामृतोपमं भाषणं श्रावय। भाषणश्रवणेच्छास्ति। तदा कटौ मौञ्जीबन्धनादुपवीतधारणादनन्तरं वक्ष्य इति सहास्यं बालः करसंज्ञया व्यदर्शयत्। ततः पितरौ हृष्टौ। विद्वज्ज्योतिषिकानाहूय मौञ्जीलग्ननिश्चयं कृत्वा।।५७-६२।। संभारान्संभृत्य ज्ञातीन्द्विजांश्चाहूय मण्डपं रचयामास ।।६३।। वेदपाठकाश्चतुर्वेदविदो विप्राः संबन्धिनः सगोत्रा आप्ता इष्टाश्चागताः। बटोर्व्रतबंधेऽमितं द्रव्यं व्ययीकृतम्। सर्वे मुदं लेभिरे। तद्दृष्ट्वा नागरिका ऊचुः। सुतोऽयं मूढः। भ्रान्तः पिता व्यर्थं सञ्चितद्रव्यव्ययं करोति। किमनेन करिष्यति। कथं सावित्रीं वाचयति। कथं वाऽऽचारमुपदेक्ष्यति। अन्ये ऊचुरलं वितर्केण। धनं स्वाद्वन्नं च नो लभ्यम्। किं तन्मंत्रप्रयोजनम्। एवमनेकेऽनेकवितर्कांश्चक्रुः। पितरौ देवोयमिति बुद्ध्वा पूर्वेद्युरभ्यङ्गस्नानपूर्वकं पुण्याहं वाचयित्वा यथाविधि चौलं कृत्वा गृह्योक्तविधिना पूर्वाङ्गं चक्रे। आज्ञापितो बटुः मात्रा सह भुक्त्वा मौनी मातुराज्ञां गृहीत्वा सुमुहूर्ते पितुरन्तिकमेत्योपवीतादि दधौ। पिता सुमुहूर्ते गायत्र्युपदेशं कृत्वा तत्कट्यां मौञ्जीं बबन्ध। बटुर्मौनी मंत्रं जजाप। व्यक्तं नावदत्। ततः सुतोक्तिश्रवणोत्कण्ठा माता प्रीत्याऽऽशिषा सह भिक्षां प्रथमं ददौ। बालोऽग्निमीळ इत्यृग्वेदं पपाठ। पुनर्माता भिक्षां ददौ। बाल इषे त्वेति यजुर्वेदमाह। लोका विस्मिताः। पुनर्माता भिक्षां ददौ। बटुरग्न आयाहीति साम जगौ। मूकः कथं ब्रूते। परमपुरुषोऽयं वेति सभा विस्मिता। पिता च हृष्टः। अहो जगद्गुरुर्देवावतारोऽयं न नर इति लोकाः प्रणेमुः।।६४-८०।। बटुर्मातरं नत्वा प्राह। भिक्षेथा इति त्वयोपदेशः कृतः।।८१।। ते वचो न मिथ्या। मामाज्ञापय। भिक्षुर्भूत्वा तीर्थाटनं कुर्वे। ब्रह्मचर्ययुक्तो वेदान्तरतोऽहं भिक्षां कृत्वा लोकानुग्रहेच्छयाऽटामि। इति श्रुत्वा दुःखिताऽश्रूणि मुञ्चन्ती मूर्च्छिता माता पपात। क्षणं मृतप्राया भूत्वा पुनः पुत्रं प्रेक्ष्य प्राह। रे रक्षक पुत्र, अग्रतोऽस्मान्रक्षयिष्यसीत्याशा वृथा गता। त्वया मौनं धृतम्। ते वचो न श्रुतम्। ईशपूजाऽधुना सफला जाताऽमृतं श्रावितम्। अथापि किमिदं भाषसे। इति विलपन्तीं तां कृपयाऽऽश्वास्यालिङ्ग्य सुत आह। मातः शृणु। विवेकेन मा खिदः। धर्मत्राणार्थमवतीर्णोऽस्मि।।८२-८९।। चत्वारः पुत्रास्ते भविष्यन्ति। वः सेवां करिष्यन्ति। नात्र संशयः। त्वया भक्त्या शंकरोऽर्चित इत्युक्त्वा पूर्वस्मृत्यै तन्मूर्ध्नि करं दधौ। तदाऽऽदितः सर्वं श्रुत्वा पुत्रं श्रीपादं ज्ञात्वा प्रेमाश्रुक्लिन्ना तत्पदे दधौ। पुत्रस्तामुत्थाप्यालिङ्ग्याह। मातः, शृणु। इदं मा प्रकाशय। संसारेऽलिप्तो यतिरस्मि। मामाज्ञापय। भुवि तीर्थाटनं करिष्यामि। इति श्रुत्वा माता तमाह। मां हित्वा यास्यसि चेत्कथं मे जीवनम्। नायं धर्मः। बाल्ये तापसत्वं क्व दृष्टम्। प्रथमं द्वादशाब्दं ब्रह्मचर्येण गुरुकुले वासः।।९०-९८।। ततः पुण्यो मुख्यो गृहस्थाश्रमः। ततः शांतः संन्यासी भवेत्। ऋषिऋणमुक्तये ब्रह्मचर्येण वेदानधीत्य, देवपित्रृणमुक्तये सदृशीं पत्नीमुद्वाह्य यज्ञैरीशमिष्ट्वा पुत्रानुत्पाद्यैवं क्रमेण शुद्धः संन्यासान्मुच्यते। बाल्येऽधः पतेत्। पुरेन्द्रियाणि प्रसाद्य तपस्तप्त्वा वासनाः शमयित्वा मुख्यमार्गेण संन्यसेदिति श्रुत्वा बालो हसंस्तत्त्वज्ञानमाह। तत्

शृणु।।९९-१०४।। गंगाधरस्य तनयो विनयोपपन्नः श्रोतॄनुवाच सकलान्सकलानभीष्टान्।। रात्यत्र सद्गुरुचरित्रममुत्र चार्थाञ्छृण्वन्त्वमत्सरतया च न सन्त्वनर्थाः।।५।। एष्याध्यायेऽपूर्वं सिद्धो नामधारकं प्राह। तल्लौकिक्या वाण्या पुण्यात्मिकया सरस्वती चाह।।१०६।।

।।इति एकादशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ द्वादशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

माणवकाक्रीडितकृद्द्वादश आश्वास्य विभुः।।
मातरमेत्य च काशीं न्यास्यभवत्स निराशीः।।

श्रीगुरुराह। मातर्माऽऽज्ञापय। भौतिके देहे क्षणजीविते च को विश्वासः।।१।। अनित्यानि शरीराणि विभवो नैव शाश्वतः।। नित्यः सन्निहितो मृत्युः कर्तव्यो धर्मसंग्रहः।।२।। चिरजीविनस्तवोपदेशः। देहे विभवे चानित्ये कुतः स्थिरा मतिः। देहः क्षणभ??ः। कोप्यमरो न। यावद्दृढदेहस्तावत्पुण्यं कार्यम्। यो मृत्युं जेष्यति स त्वदुपदेशार्होऽग्रे स धर्मं करिष्यति। क्षणे क्षणे आयुर्नश्यति। ततः प्राग्वयसि शीघ्रं धर्मः कार्यः। यथाऽल्पोदके मत्स्यस्तथाऽल्पायुर्नरः क्लिश्यति। अतिदृढदेहो यावत्ताद्धर्मं चरेत्। यथा सूर्यो निमेषाद्द्वाविंशतिसहस्रग्रामानत्येति तथाऽऽप्यायुश्चञ्चलम् ।।३-८।। यथा पर्जन्यजलं पिप्पलपत्राऽग्रे पतितं सद्यः पतति तद्वच्छरीरं न स्थिरम्। जीवतः सहसा मृत्युः। वृद्धस्य यूनोऽपि देहो नश्यति। नश्वरदेहस्य को विश्वासः। सहैव मृत्युरतो धर्मः कार्यः। पक्वपर्णवद्देहः सहसा कदा पतेन्न ज्ञायते। यथा ऋणदाता दिनानि गणयति यमस्तथायुर्गणयति। यथा नद्योऽप आदायाब्धिं यान्ति पुनर्न निवर्तन्ते तद्वदायुः पुनर्न प्रत्यागच्छति। अहोरात्रा आयुर्गृहीत्वा पलायन्ते। एवंविद्यः पुण्यं न कुर्यात्स पशुः। यद्दिने पुण्यं न कृतं तद्दिनं व्यर्थम्। यमस्य न करुणाऽतः पुण्यं कार्यम्।।९-१६।। स्त्रीपुत्रादिदेहान्तं शाश्वतं ये मन्यन्ते ते पशुसमाः। दुस्तरसंसाराब्धौ नक्रवज्जरा नरं ग्रसति। ततस्तारुण्य एव पुण्यं कर्तव्यम्। कुतो मां वारयसि। केयं तव मतिः। योऽमरो यमस्येष्टस्तेनाग्रे करिष्य इति मन्तव्यम्। असारः संसारो मालतीपुष्पवत्क्षणभ??ः। विद्युद्वद्देहः पश्यतां सतां क्षणान्नश्यति न स्थिरं एवं बोधिता माता भयं त्यक्त्वाऽहो कथमयं वक्तीति विस्मिता पुत्रं नत्वाऽऽह। देव, त्वया सम्यग्ज्ञानामृतं श्रावितम्। हे कुलदैवत पुत्र, पुत्रा भविष्यन्तीति त्वयोक्तम्।।१७-२५।। तर्हि यावत्पुत्रो भवेत्तावद्वस। तत आज्ञां दास्ये। मद्वचोऽतीत्य यास्यसि चेत्प्राणांस्त्यक्ष्ये खलु। त्वं न पुत्रः किन्तु त्राता कुलदीपको देवोऽस्यतो यद्वाचः सभायामुक्तं तत्सत्यं कुर्विति श्रुत्वा श्रीगुरुर्हसन्नाह। मे वचः सत्यम्। त्वं सत्यवाग्भव। द्वौ पुत्रौ वीक्ष्य आज्ञां देहि। ततो न स्थास्ये। ते वचः सत्यं कुरु। त्व?? वर्षमेकं स्थास्यामि। पूर्णायां ते वासनायां मे आज्ञां देहीति निश्चित्य श्रीगुरुस्तस्थौ। तत्र शिष्येभ्यः सा??वेदानध्यापयामास। साङ्गान् चतुरो वेदान्पाठयतीति लोके कौतुकं जातम्। तदा वेदज्ञाः षट्शास्त्रनिपुणा अपि तस्य शिष्या अभूवन्।।२६-३४।। निधिवल्लब्धं पुत्रं देवभावनयाऽपूजयत्। ततः सा गर्भिणी भूत्वा दशमे मासि सुंदरौ द्वौ पुत्रौ सुषुवे। पितरौ हृष्टौ। गुरोर्वचमन्यथा कथं भवेत्। अतो गुरुवाक्ये विश्वासः करणीयः। यस्य यादृग्भावना तादृक्फलम्।।३५-३९।। एवं वर्षेऽतीते पुत्रौ लालयन्तीं मातरमेत्याह। ते कामः पूर्णः, सुखं वस, स्ववचः सत्यं कुरु। संतोषेण मामाज्ञापय। द्वौ सुतौ जातौ। द्वौ पुत्रौ पुत्री च भविष्यन्ति। ततः संतोषेण पितरौ तं नत्वोचतुः। त्वं नः कुलदैवतः इतःपरं वक्तुं न

शक्यते।।४०-४३।। त्वन्मायामोहिता वयं त्वद्रूपं त्वन्माहात्म्यं च न वि??। जननी आह। स्वामिन्, त्वन्मायावेष्टिताऽहं त्वां पुत्रं मत्वा निष्ठुरमब्रुवं गृहे रुध्वा शयनाशनादौ अपीडयम्। उत्थाप्यालिङ्ग्य कटौ न धृतः तत्सर्वं क्षमस्व। भोः पितस्त्वं वंशतारकोऽवतीर्णोऽसि। प्रदोषपूजा सफला जाता न संशयः। हे कृपाब्धे, इति ऊर्ध्वं नः का गतिः। जननादियातनां निवारय। सागरोपरि ग??ब ममोदरे त्वमागत्य ममा??कुलं च पावितम्। कथं नु दुस्तरे संसारेऽस्मान्स्थापयसि। त्वद्दर्शनं न चेन्न जीविष्यामः।।४४-५१।। इति मातृवचः श्रुत्वा श्रीगुरुराह। क्षणे क्षणे मे ध्यानं कुरु। यदा मद्दर्शनेच्छा तदा मां स्मर।।५२।। ते समीपेऽस्मीति हस्तं ददामि। ते कन्या पुत्रौ च भविष्यन्ति। ते गृहे दैन्यं न। श्रीः स्थास्यति। जन्मान्तरे शिवः पूजितस्तन्महिमाऽयम्। ते वंशः श्रीमान्भविष्यति। शिवपूजनादिह सौख्यं परत्र मोक्षो, न पुनर्जन्मस्त्वया भक्त्या शंकरमाराध्याहमवतारितः। ते कामः पूर्णोऽभूदत आज्ञां देहि व्रजामि। त्रिंशद्वर्षैः पुनर्दर्शनं भविष्यति। बदरीवनं यास्य इत्युक्त्वा प्रतस्थे। पितृभ्यां नागरिकैश्च प्रस्थापितो भगवान्गृहान्निर्गतः। नार्यो नराश्चोचुः तपस्तप्तुं प्रस्थितोऽप्ययं मनुष्य इव भातोऽपि पुराणपुरुषः ।।५३-६०।। अपरे ऊचुः चित्रमिदं एष बालस्तपसे गच्छति। कथं पितरावाज्ञापयतः।।६१।। पाषाणवन्निर्द्रवं तयोश्चित्तम्। मनो दृढं कृत्वा कथमाज्ञापयतः। परेऽप्यूचुः देवोऽवतीर्णोऽयं यतोऽखिलाः शाखा जगौ। सप्तवर्षात्मकोऽ सर्वशाखाः पपाठ। न मनुष्योऽयम्। एवं भाषमाणा वारितास्ते गृहं जग्मुः। पितरौ किञ्चिदग्रतो जग्मतुः। स ताभ्यां श्रीपादस्वरूपं दर्शयामास। तौ त्रिमूर्त्यात्मकं कर्पूरगौरं तं दृ??नत्वोचतुः। त्रिमूर्ते जग??. जय। नो महत्पुण्यं यतस्ते पदं दृष्टम्। विश्वतारकस्त्वमस्मानुद्धृतवानसि। पुनर्दर्शनं देहीति। तथेत्युक्तौ निवर्तितौ तौ शश्वत् पश्यन्तौ तत्पादोपरि शिरः स्थापयामासतुः। श्रीगुरुस्तौ प्रेम्णोत्थाप्यालि???ास्य चाह। पुनर्दर्शनं दास्ये। यास्ये इति परावर्तितौ तौ पुनः पुनः पृष्ठतः पश्यन्तौ गृहं जग्मतुः। बदरीवनं यास्यन्नानन्दकाननं वाराणसीक्षेत्रं ययौ। यत्र स्वयं विश्वेशस्तामविमुक्तपुरीं गत्वा त्रिषवणं स्नात्वाऽऽत्मारामदर्शनानुष्ठानं व्यकरोत्। अष्टा??ोगनिरतं तं अन्ये तापसा यतयोऽवधूताश्चोचुः।।७८।। अहो योगाभ्यासधुरन्धरोऽयम्।।७९।। ब्रह्मचारी कथं दुश्चरं तपस्तपति। कथमस्येदृग्वैराग्यम्। यो न लिप्यते।।८०।। संन्यासार्होऽयम्। नास्य शरीरममता यत्त्रिकालं स्नातीति ब्रुवत्सु तेषु महामतिर्ज्ञानी तपस्वी वृद्धकृष्णसरस्वती प्रेम्णा गुरुं दृ??ऽह। नृदृष्ट्यैनं मा पश्यतावतारोऽयं विश्ववंद्योऽयं त्रिमूर्तिरूपी। ज्येष्ठस्य कनिष्ठोऽवन्द्य इति मूर्खदृष्टिर्नास्माकमेष विश्ववन्द्यः। परोपकारार्थमेष प्रार्थ्यः। संन्यासमार्गस्थापनान्नो भक्तिः स्थिरा भवेत्।।८१-८७।। अयं लोकानुग्रहसमर्थः सर्वगुरुर्यद्दर्शनात्सद्यः पतितमुक्तिरतोऽमुं प्रार्थयामः। संन्यासं ग्राहयित्वा कृतार्थतां यास्यामः। इत्याभाष्य सर्वे तं प्राप्योचुः। तापसश्रेष्ठ, ते (नमः)। नः प्रार्थनां शृणु। लोकानुग्रहार्थं संन्यासं स्वीकुरु। न उद्धर। पूजां स्वीकुरु। कलौ लोकाः संन्यासं निन्दन्ति तन्मार्गस्थापनक्षमोऽन्यो न दृश्यते। अग्निहोत्रं गवालंभं संन्यासं पलपैतृकं देवरात्सुतोत्पत्तिं(च) कलौ वर्जयेदित्येकदेशवचनेन संन्यासो निषिध्यते। स च लोकख्यातो वेदसिद्धः यावद्वर्णविभागो यावद्वेदास्तावदग्निहोत्रं संन्यासश्च कार्य इति शंकराचार्यैः स्थापितस्तत आरभ्य संन्यासः (प्रवृत्तः)।।८८-९६।। पुनः कलौ पामरास्तं निन्दन्ति। हे तारक मुनीश्वर, आश्रमोद्धारं लोकोपर्युपकारं च कुरु।।९७-९८।। इति श्रुत्वा भगवान्वृद्धकृष्णसरस्वतीं गुरुं कृत्वा संन्यासं कृतवान्। इति श्रुत्वा नामधारक आह। हे कृपाब्धे, त्रिमूर्त्यवतारस्य जग??र्गुरुणा किं प्रयोजनम्। सिद्ध आह। यथा रामेण वसिष्ठो गुरुः कृतः।।९९-१०२।। नरानुसारिणा कृष्णेन च सांदीपनिर्गुरुः कृतः तथा श्रीगुरुणा ज्ञानवयोवृद्धः मतः

कृष्णसरस्वतीर्यतिर्गुरुः कृतः।।१०३-१०४।। नामधारक उवाच। स्वामिन्सर्वेभ्योऽपि यतिभ्यः कृष्णसरस्वत्यै कुतो मानो दत्तः। एतद्गुरुपीठं वद। श्रोतुमिच्छामि। कृपां कुरु। इति श्रुत्वा सिद्धः आह। मूलपीठं श्रीशंकरो गुरुः, तस्य शिष्यो विष्णुस्तस्य ब्रह्मा, तस्य वसिष्ठः, तस्य शक्तिः, तस्य पराशरः। तस्य व्यासः, स्वयं नारायणः। तस्य शुकः, तस्य गौडपादः, तस्य गोविन्दाचार्यः, तस्य शंकाराचार्यः स्वयं शिवः। तस्य विश्वरूपः, तस्य बोधज्ञानगिरिः, तस्य सिंहगिरिस्तस्येश्वरतीर्थस्तस्य नृसिंहतीर्थः तस्य विद्यारण्यम्।।५-१४।। तस्य मलयानन्दः, तस्य देवतीर्थम्। तस्य यादवेन्द्रसरस्वती, तस्यैष वृद्धकृष्णसरस्वती।।१५-११६।। संन्यासमार्गस्थापनार्थं भगवांस्तस्य शिष्यः नृसिंहसरस्वतीत्यभवत्सः काश्यां वेदार्थमुपादिशत्ततः सर्वेऽपूजयन्। तत्र सर्वयतिभ्यः ख्यातः श्रीगुरुः सर्वसेवितोऽभवत्। लोकोपकाराय बहुखंडभूमिष्ठतीर्थानि पश्यन्भूमिं प्रदक्षिणीकृत्य ग??ासागरं।।११७-१२३।। ततः प्रयागं चागमत्। लोकोद्धारक्षमाणि तस्य सर्वकर्माणि को वेद। अशेषलीलावर्णने ग्रंथविस्तरो भवेद्यथाशक्ति वच्मि।।२४-२५।। तत्रागतं श्रीगुरुं ज्ञात्वा तद्दर्शनलालसः माधवद्विज आगतः। तं चातुर्थाश्रमं ग्राहयित्वा तत्त्वज्ञानं चोक्तवान्। हे नामधारक, श्रीगुरोः शिष्या बहवो जातास्तेषु माधवसरस्वती मुख्यस्तदुपरि स ??ोर्बहुप्रीतिः। ततः सर्वाञ्छिष्यानुपादाय श्रीगुरुरग्रतो गतः। इति नामधारकनुतो विरतस्तदु कामधुग्गुरुचरित्रमतः। उदितं शृणोति य इहाखिलदं स लभेदभीष्टमपि चात्मविदम्।।१२६-१३०।।

।।इति द्वादशोऽध्यायः।।

श्रीगुरुसंहिताचूर्णिका

अथ त्रयोदशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

प्रसूमुखैर्जनिभुवि संगतः स्वकैस्त्रयोदशेऽनुगयुगुपेत्य गौतमीम्।।
मृतोत्सुकं जठररुजाऽर्तमुद्धरन् व्यदर्शयद्भुवि रुचिरां प्रभुर्गतिम्।।१।।

नामधारकः सिद्धं नत्वा सविनयमाह। महायोगिन् जय। त्वं भवाब्धितारकः। त्वया प्रकटिता गुरुकथा। तया सुखं जातम्। कथामृतं निषेव्य तृष्णा न शांता किन्तु वृद्धा। चरितं विस्तरात् श्रुतमपि मनो न तृप्तम्। क्षुधिता गौस्तृणदेशं प्राप्य ततोऽन्यत्र गन्तुं नेच्छति तथा ममाभवत्।।२-५।। यत्स्वप्ने तक्रं दुर्लभं तस्य क्षीराब्धिप्राप्तो ततो गन्तुं स नेच्छति तथाऽहं अल्पज्ञोऽविद्यावृतोऽत्र कष्टार्दितोऽभवम्। त्वयाऽज्ञानरजनीस्थं मां प्राप्य स्वाभिन्नं गुरुरूपं दर्शितम्।।६-८।। त्वया साधूपकृतम्। प्रत्युपकारं न जाने। कल्पद्रोश्चिन्तामणेर्वा दातुर्भूदानं प्रत्युपकार इति क्वापि न दृष्टः। तद्वत्तवापि। (आर्या) वंशपरम्परयापि प्रत्युपकारः क्रियेत किं भवतः। भवतप्ततापशामक सेवेऽङ्घ्री तेऽङ्गतश्च वैभवतः।।९-११।। भवतोक्तेन धर्मेण मे शं जातं निरन्तरा च गुरुभक्तिर्जाता। माधवाय दीक्षां दत्वा भगवान्प्रयागात्क्व गतः तद्वदेति श्रुत्वा तुष्टः सिद्धस्तत्के हस्तं दत्वा मुदाऽऽह। हे सद्गुण शिष्य, ते गुरुपदं लब्धं संसारात्तरिष्यसि। गुरुभक्तिस्त्वया लब्धाऽतः पृच्छसि। तुष्टोऽस्मि। ते प्रश्नादानन्दो वर्धते।।१२-१६।। ख्यातं गुरुचरित्रं शृणु। कञ्चित्कालं तत्र स्थित्वा माधवाय दीक्षा दत्ता। तदाऽनेके शिष्या अभवन्।।१८।। तत्र मुख्यो माधवः। सर्वशिष्याऽख्याकथने ग्रन्थविस्तरभिया सप्तमुख्यशिष्यनामानि शृणु। बालसरस्वती कृष्णसरस्वती उपेन्द्रसरस्वती माधवसरस्वती सदानंदसरस्वती ज्ञानज्योतिःसरस्वती सिद्धोऽहं चैत उत्तरोत्तराधिकाः। श्रीगुरुस्तैः सहानेकक्षेत्राणि पुनानः करञ्जनगरं ययौ।।१९-२२।। तत्र प्रेम्णा पितृभ्यां स्वस्राऽनुजैश्च वन्दितः समस्तैर्नागरिकैः पूजितः श्रीगुरुर्गृहे गृहे भिक्षार्थं निमन्त्रितो बहुरूपधरो भूत्वा भिक्षाम जग्राह।।२३-२५।। लोका विस्मिता ऊचुः। यतिवेषधरोऽयं परमपुरुषो विष्णुः।।२६।। इमं ये नरं वदन्ति ते नरकभाजः। कार्यार्थं ब्रह्मविष्णुशिवावतारोऽयमिति पितरौ पूजयामासतुः। मात्रे प्राक्स्मरणार्थं श्रीपादरूपं दर्शयामास। तदा तत्पदे शिरो निधायाह। प्रदोषः फलितः। चन्द्रमौले, सत्यसङ्कल्पोऽसीति। पूर्वजन्म स्मृत्वा पतिमाह। प्राग्जन्मनि विश्ववन्द्यपुत्राप्तये मयाऽऽराधितः श्रीपादः प्रसन्नोऽभूत्। जन्म मे सफलं कृतम्। इति नत्वा शरणं गत्वा करुणमाह। हे जगन्नाथ, भवार्णवान्नौ समुद्धर। श्रीगुरुराह। कुले संन्यासी जातश्चेद्द्विचत्वारिंशत्कुलोद्धर्ता कुलाय शाश्वतब्रह्मलोकदाता च। तत्कुलजानां ब्रह्मपदम्।।२७-३४।। तत्सन्ततेर्भयदुःखादि न। पूर्वं नरकगता अप्यूर्ध्वं यान्ति। भवतां किन्नु वाच्यं यत्कुलेऽहं संन्यासी यमशंकाऽपि न। वां ब्रह्मपदमित्याश्वास्याह। शतायुस्ते पुत्रा अष्टैश्वर्यभाजः। एषां पुत्रादिसुखं दृष्ट्वा वां काश्यामन्तकालो भविष्यति। काशी तु वेदोक्तं मोक्षस्थानं इतश्चिन्ता न कार्या।।३५-३९।। एवं वदन्तं भक्तवत्सलं रत्नाख्या भगिनी विनयेन नत्वाऽऽह स्वामिन्भवाब्धिमग्नामविद्याजालवेष्टितां मामुद्धर। त्रितापवडवादग्धां कामादिनक्रभीतां मामलिप्तां कुरु। ततस्तपस्तप्स्यामीति श्रुत्वा हसन् श्रीगुरुराह।

स्त्रियाः पतिसेवया गतिः किं तपसा।।४३।। तया तुष्टः शिवः परं पदं ददाति। पातिव्रत्यादिष्टाप्तिश्च न संशयः।।४४।। भवताराय पतिसेवैका। ततो मनः स्थिरीकृत्य शिवं पतिं भज। ततस्ते सद्गतिः श्रुतिवचनात्। त्वं मा खिदः। इति श्रुत्वा सविनया सा प्राह। गुरुमूर्ते ते नमः। त्रिकालज्ञोऽतो मे प्रारब्धं किमग्रे का वा गतिर्वद।।४८।। श्रीगुरुराह ते वासना तामसी। ते पापं सञ्चितं तद्भोक्तव्यम्। प्राग्जन्मनि ते धेनुर्लत्तया हता। दम्पत्योः कलहः सम्पादितः। तद्विपाकं शृणु। लत्ताप्रहारदोषतस्तेऽङ्गे कुष्टम्। दम्पत्योर्वैरसम्पादनात्ते पतिर्यतिर्भविता त्वां त्यक्ष्यति चेदृक्प्रारब्धफलम्।।४९-५२।। इति श्रुत्वा खिन्ना सा पादयोः पतित्वा गुरुनाथ, मामुद्धरेति पादौ दधौ।।५३।। स आह। बाले, कञ्चित्कालं सुखं वस। वार्धक्ये ते पतिर्यतिर्भवष्यति कुष्ठं च शरीरे। एवं पापफलं भुक्त्वा पश्चात्ते सद्गतिः। कुष्ठे उत्पन्ने मे दर्शनं भवेत्। दक्षिणस्यां दिशि भीमामरजासंगमे भुवि ख्याते गन्धर्वपुरे पापनाशतीर्थं गच्छ। मे दर्शनं भविष्यतीत्युक्त्वा यत्र त्र्यम्बकक्षेत्रे गौतम्युद्गता तत्क्षेत्रं नाशिकं च शिष्यैः सह गुरुर्ययौ। एतत्कथावर्णने ग्रन्थविस्तरो भवेदतः संक्षेपतो वक्ष्ये।।५४-६१।। गोदावर्या माहात्म्यं लोके दुर्लभम्। वृद्धगङ्गायास्तीरयोरमिततीर्थानि। ऋषिभिर्यत्नात्सर्वेश्वरजटात् उत्तारितेयं ब्रह्माण्डदुर्लभा।।६२-६३।। पूर्वं मुनयः शालीनुप्त्वा मन्त्रमाहात्म्यादन्वहं फलमन्वगृह्णन्। तथा गौतमर्षिः शालीनुप्त्वाऽनुष्ठातुमुपाविशत्। कदाचित्तत्र मिलितो मुनयो विचारयामासुः। ईशभक्तोऽयं गौतमर्षिर्महामुनिः यत्नाद्भुवि गङ्गामानयिष्यति चेन्नः स्नानं भवेत्। ऊर्ध्वरेतसां योगिमुनीनां या गतिर्गौतमीवासिना सा गतिः। गौतमीस्नानमात्रात्कोटिवर्षतपफलम्।।६४-६९।। अतोऽयं सङ्कटे योज्यो गङ्गामानयिष्यति चेन्नो गङ्गालाभ इति विचार्य दूर्वामयीं गां निर्माय गौतमव्रीहिभक्षणार्थं प्रैरयन्।।७०-७१।। अनुष्ठानस्थो मुनिः सस्यं भक्षयन्तीं तां दर्भेण निवारयामास। तद्वज्रास्त्रं जातम्। तेन धेनुर्मृता। गोहत्या गौतमं गता। तदा ऋषयो गौतमं प्रायश्चित्तमब्रुवन् गङ्गां भुवमानय तेन तव शुद्धिरिति ।।७२-७४।। तथेति मुनिस्तपस्तेपे। सहस्रवर्षान्ते शिवः प्रसन्नो वरं ब्रूहीत्याह। गौतम आह। प्रसन्नोऽसि चेल्लोकोद्धृत्यै गङ्गामर्पयेति श्रुत्वा शिवो गङ्गामदात्। सा नृपापं क्षालयन्ती भुवमागता। यथा भागीरथी तथेयम्।।७५-७८।। अतः श्रीगुरुर्लोकानुग्रहेच्छया तत्तटे तीर्थानि पर्यटन्मञ्जरीके माधवारण्यमगात्। स नृसिंहचिन्तको मानसपूजायां श्रीगुरुं ददर्श। तथैव तं दृष्ट्वा नत्वा विस्मितो बहुस्तोत्रैस्तुष्टाव। भक्त्या प्रणम्य सगद्गदमाह। यद्दिव्यपादद्वयमेव साक्षादधिष्ठितं देवनदीसमीपे।। यदुत्तरं तीरनिवासि रामं लक्ष्मीसमीपं वसतीह नित्यम्।। इत्युक्त्वा हृष्टो माधव ननाम। श्रीगुरुस्तुष्ट आह।।७९-८४।। अत्यन्तसन्मार्ग इह त्वयाप्तः सेवाधिकारेण ततः समाप्तः।। संसारमार्गो मम दर्शनेन पश्यात्मना मामविमर्शनेन।। इत्युक्त्वा तमाश्वास्य हर्षाद्दिव्यं स्वरूपमदर्शयत्।।८५-८६।। स श्रीगुरोः स्वरूपं दृष्ट्वा विनयावनत आह। जगद्गुरो, जय। लोकदृष्ट्या नरोऽपि त्वं परं ज्योतिस्त्रिमूर्त्यवतारो विश्वतारकोऽवतीर्णोऽसि। ते चरणदर्शनाद्वयं कृतार्थाः।।८७-८९।। श्रीगुरुराह। ते मन्त्रसिद्धिर्जाता। ते सद्गतिर्लब्धा। शाश्वतं ब्रह्म यास्यसि। नित्यं नृसिंहमूर्तेर्मे मानसपूजां कृता तत इदं प्रत्यक्षदर्शनं लब्धम्। इति तमाज्ञाप्य गङ्गातीरेण सशिष्यः श्रीगुरुर्वासरब्रह्मेश्वरमेत्य सस्नौ। तत्र शूलरोगव्यथितं मर्तुमुद्युक्तमेकं विप्रं ददर्श।।९०-९५।। भोजने कृते मरणप्रायां पीडां सोढुमक्षमः परिणामशूलार्दितः स द्विजोऽन्नविद्वेषान्मासा पक्षेण वाऽन्नभोजनादतीव कष्टं प्राप्तः। पूर्वदिने बह्वन्नभोजादत्यन्तं पीडितो गङ्गातीरे लुठन्प्राणांस्त्यक्तुमुद्युक्तोऽपारं दुःखं कृत्वाऽऽह। पापस्य मे संसारेणालम्। अन्नं प्राणोऽन्नं जीवनम्। विनाऽन्नात्कस्तिष्ठेत्। अन्नवैरत्वे मरणं वरमिति निश्चित्य गङ्गां प्रवेष्टुं गले शिला बद्ध्वेश्वरं स्मरन्नाह। इह भूभारोऽभवम्। नान्नदानाद्युपकारो मे कृतः।।९६-१०४।। इह जन्मनि जन्मान्तरे वा पुण्यं न कृतम्।

कष्टमर्जितम्।।१०५।। विप्रस्य धेनोश्च ग्रासो हतो वा विश्वासघातो वा कृतस्ततः कष्टमिदम्। नेश्वरः पूजितः। पितरो अवज्ञातौ। गुरुर्निन्दितो वा विप्रा वाऽतिथयो हापिता वा दम्पती हतौ वा वनेऽग्निर्दत्तो वा पितरौ त्यक्त्वा स्त्रिया सह मिष्टान्नं भुक्तं वेदृक्पूर्वार्जितं भातीति स्मृत्वा स्मृत्वा गौतमीं गतं तं दृष्ट्वा श्रीगुरुः शिष्यमाह। शिष्यामुमानयात्महत्याऽतिदुस्तरा। कोऽयं प्राणांस्त्यजति तं पृच्छेत्येवं श्रीगुरुणोक्ता धावन्तः शिष्या जलात्तं निष्कास्य गुरुसम्मुखमानिन्युः।।१०६-११३।। अनाथकल्पद्रुः कृपाब्धिर्भगवांस्तं प्राह। ब्रह्मन्कुतो बुद्ध्या प्राणांस्त्यक्ष्यसि तत्सर्वं वदाऽऽत्महत्या महादोषा श्रुता। विप्र आह। मां पृष्ट्वा किं करिष्यसि। मे जन्म व्यर्थम्। भूभारोऽहम्। मासा पक्षेण वा भुक्तं चेदतीव दुःसहं कष्टं सोढुं न क्षमोऽतः प्राणांस्त्यक्ष्ये। गुरुनाथ, देहोऽन्नमयोऽन्नवैरे कथं जीवनम्। श्रीगुरुराह। व्यथा ते गता। क्षणेनौषधं वक्ष्ये। मा भीः। संशयं त्यज। निश्चयं कुरु। भूमौ स्वाद्वन्नं भुंक्ष्व। इति श्रुत्वा मनः समाधाय गुरुपदे शीर्षं दधौ।।११४-२२।। तदा कश्चिद्ग्रामाधिकारी द्विजः स्नातुमागत्य सहसा श्रीगुरुं दृष्ट्वा भक्त्या कायेन वाचा मनसा च तत्पदे ववन्दे। तमाश्वास्य श्रीगुरुराह। क्व ते वासस्ते नाम किमिति। स आहापस्तम्बशाखीयः कौण्डिण्यगोत्रजः काञ्चीवासी सायन्देवाख्यो द्विजोऽहम्। यवनराजसेवकोऽत्रोदरपूर्त्यर्थमागतोऽस्मि। ग्रामेऽस्मिन् अधिकृतत्तवेनाब्दं वसामि। अद्य धन्योऽहम्। कृतार्थोऽस्मि न संशयस्त्वया विश्वतारकेण दर्शनं दत्तम्। जन्मान्तरार्जिता दोषा नष्टाः।।१२३-२८।। यस्मिन्स्तेऽनुग्रहः स भवार्णवात्तरिष्यति। तेऽद्यायत्नतो दर्शनं लब्धम्।।१२९।। गङ्गा पापं, शशी तापं, दैन्यं कल्पद्रुश्च हरति। भवांस्तु त्रयमपि पापतापदैन्यहत्।।१३०।। चतुर्वर्गफलदं ते दर्शनं जातमित्युक्त्वा पदे जग्राह। तमाश्वास्योपवेश्य गुरुराह। मद्वचः शृणु। जठरव्यथितोऽयं विप्रः क्षुधा प्राणाञ्जहाति। तद्रोगोपशमार्थं स्वमन्दिरं नीत्वाऽस्मै मिष्टान्नं देहि। ततोऽस्य पीडा व्याधिश्च नाशमेष्यति। शीघ्रममुं नय क्षुधितोऽस्ति।।१३१-१३६।। इति श्रुत्वा सायन्देवो नत्वाऽऽहान्नभक्षणादयं प्राणांस्त्यक्ष्यति। गतेऽह्नि मासा भुक्तोऽयं प्राणांस्त्यक्तुमुद्यतोऽतोऽन्नदानाद्ब्रह्महत्या भवेत्। गुरुराहाहं ब्रुवे। सापूपमाषान्नं परमान्नमस्यौषधम्।।३७-३९।। तदशनाद्व्याधिर्नश्येत्। नात्र संशयोऽन्नं शीघ्रमस्मै देहि।।१४०।। द्विजस्तथेत्युक्ते भक्तिमान्सायन्देवो हृष्टस्तं स्वगृहं निन्ये। अहमन्ये शिष्या रुग्णो विप्रश्चैतैः सह श्रीगुरुर्मुदा तद्गृहं गतः। साध्वी तद्भार्या हृष्टा। तया सह स श्रीगुरुमानर्च तच्चित्रं दृष्टम्।।१४१-४४।। षोडशोपचारैर्गुरुमन्याञ्छिष्यांश्चापूजयत्। चित्रं पूजाविधानं शृणु। प्रत्येकं नानारङ्गवल्लीभिश्चित्रैः पञ्चरङ्गचूर्णपद्मैर्मण्डलानि व्यरचत्। ततः साष्टाङ्गं प्रणम्य संकल्प्य विनतो विप्रः।।४५-४८।। चित्रासने गुरुमुपवेश्यान्यांश्च पृथक्पृथक्पीठेषूपवेश्य पाद्यार्घ्याद्युपचारान्दत्वा पञ्चामृतादिभिः रुद्रसूक्तैश्चाभिषिषेच। श्रीगुरुं वस्त्रमाल्यादिभिरापूज्य पादावनेजनं तीर्थं भक्त्या पूजयामास। श्रीगुरुं नीराज्य गीतादिभिस्तोषयामास। एवं षोडशोपचारैर्गुरुपूजां विधायान्यांस्तथैव सम्पूज्य प्रीत्या गुरवे वेदमन्त्रघोषपूर्वकं पुष्पाञ्जलिं दत्त्वा सुगीतैर्गुरुं तोषयामास। एवं साध्व्या पत्न्या सह स गुरुमन्यांश्च संपूज्य ववन्दे। प्रीतः श्रीगुरुर्वरं दास्यन्नाह। ते सन्ततिर्वृद्धिं यायात्। ते कुले मद्भक्तिश्च।।४९-१५७।। गुरुचरित्रं ते ज्ञातम्। पुत्रादिभिस्ते गोत्रवृद्धिरस्तु। तत्र मद्भक्तिश्चेत्याश्वासयामास।।।५८।। तथेत्युक्त्वा मण्डलानि कृत्वा पात्राण्यासाद्य पायसान्नपक्वान्नमाषान्नशर्करापूपविविधभक्ष्यभोज्यानि विविधशाकसंस्कृतव्यञ्जनानि परिवेष्य भोजयामास। उदरे व्यथितः शूली विप्रः श्रीगुरुकृपया यथेष्टं भुक्त्वा नीरोगोऽभवत्।।५९-१६२।। स्पर्शस्पर्शाल्लोहं स्वर्णमिव गुरुकृपयाऽसौ नीरोगोऽभूत्। सूर्येऽभ्युदिते ध्वान्तमिव गुरुकृपया कुतो दैन्यं तिष्ठेत्। एवं शिष्यैः सह श्रीगुरुणा भोजनं कृतम्। विप्रो हृष्टोऽन्ये

विस्मिताः।।६३-६५।। अहो चित्रम्। यदहितमन्नं तदौषधम जातं रोगो नष्टश्च। हे नामधारक, यस्योपरि गुरुकृपा तस्य जन्मान्तरदोषा नश्यन्ति। कुतो व्याधिः। एवं परमं रम्यं श्रीगुरोश्चरितम्। पठन्ति ये भक्तियुता विनीताः शृण्वन्ति वाऽऽख्यानमिदं गदघ्नम्।। तेषां गृहे व्याधिभयं न नित्यं तेषां सुखं भूरि वदे त्रिसत्यम्।।१६९।।

।।इति त्रयोदशोऽध्यायः।।

श्रीगुरुसंहिताचूर्णिका

अथ चतुर्दशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

सायन्देवं शक्रमिताध्याय उवाच त्रीशो म्लेच्छं याहि न भीस्ते स तथेति।।
गत्वाऽभीतो म्लेच्छनृपेणार्चित एत्य नृत्यन्नेजे मत्तमयूरो हि यथा सः।।१।।

नामधारकः सकौतुकः पुनः पप्रच्छ। सिद्ध प्रीत्या कथय। हे ज्ञानसागर योगेश सिद्ध, जयाग्रतो वृत्तां कथां कथय।।२।। प्रसन्नः श्रीगुरुः शूलरोगमहरत्। ततोऽग्रतो वृत्तां कथां कथयेति श्रुत्वा तुष्टः सिद्धः सविस्तरं कामधुक्चरितमाह।।३-४।। हे शिष्य, यद्गृहे भिक्षा कृता तस्मिन्स्तुष्टः प्रसन्नोऽभूत्। सायन्देवोऽपि भक्तिप्रकारश्चित्रां पूजां चक्रे। तत आनन्दितो गुरुस्तुष्टस्तमाहूयाह। तवोपरि मम प्रीतिस्त्वद्वंशजा मे भक्ता इति श्रुत्वा सायन्देवः पुनः पुनर्नत्वा विनयेनाह। श्रीगुरो, जय। त्वं मायया नरो भासि। त्रिमूर्त्यवतारस्य ते महिमा वेदागोचरः। त्वं विश्वव्यापको ब्रह्मविष्णुशिवात्मको मायया नृरूपं धृत्वा भक्तानुद्धरसि।।५-१०।। ते महिमावर्णने कः शक्तः। एका याच्ञाऽस्ति तां शृणु।।११।। मद्वंशे ये भवन्ति तेषां पुत्रादिसौख्यं त्वयि भक्तिरन्ते सद्गतिश्चास्तु। इति प्रार्थ्य नत्वा पुनराह। यद्द्वारि सेवां करोमि स क्रूरो यवनः प्रत्यब्दं ब्राह्मणं हन्ति घातकोऽद्यापि तदर्थमेव मां ससंभ्रममाह्वयति। मयि तत्समीपं गते स मे प्राणान्हरिष्यति। ते चरणं दृष्टमतः कुतो मे मरणम्।।१२-१५।। तत् श्रुत्वा तन्मूर्ध्न्यभयकरं दत्वा। मा भीश्चिन्तां मा कुरु। शोकं त्यज। क्रूरमपि यवनं गच्छ। स प्रेम्णा पुनः प्रेरयिष्यति। यावदागमिष्यसि तावत्तिष्ठामि। त्वय्यागते गमिष्यामि। त्वं मे भक्तस्ते वंशजा अपि मे भक्तास्त्वमिष्टार्थान्प्राप्स्यसे। ते सन्ततिर्वृद्धिं यायात्।।१६-१९।। सर्वेऽपि पुत्राद्याः सुखिनः सन्तु। त्वत्कुले श्रीरखण्डिताऽऽरोग्यं दीर्घायुश्चेति लब्धवरो हृष्टः सायन्देवः यवनसमीपं ययौ। स च कालान्तकोपमो दुष्टो द्विजं वीक्ष्य कुपितोऽपि विमुखो गृहं गतः। चकितो भीतोऽपि विप्रः श्रीगुरुं दध्यौ।।२०-२३।। वम्री (वाळवी) कुपिताऽग्निं स्पृशेत्किम्। यदुपरि गुरुकृपा तस्य यवनः किं करिष्यति। सर्पो गरुडपोतं ग्रसति किम्। ऐरावतः सिंहं ग्रसेत्किम्। यदुपरि गुरुकृपा तस्य कलिकालभयं न। यच्चित्ते गुरुस्मरणं तस्य कुतो भयम्। कालमृत्युर्न न बाधते कुतोऽपमृत्युः। यदुपरि गुरुकृपा तस्य यमान्मृत्योश्च भयं न। कुतो यवनाद्भयम्।।२४-२८।। स भीतो यवनोऽन्तःपुरं गत्वा भ्रान्तस्तन्द्रया देहं विस्मृत्य तप्तहृदयः प्राणान्तिकव्यथां गत्वा स्मृतिविस्मृतियुक्तः सन्नाह। भृशदुःखदो द्विजः शस्त्रेण मेऽङ्गानि छिनत्तीत्युक्त्वा ब्राह्मणमुपेत्य लोलद्गात्र आह। त्वमेव मे स्वामी। केन आहूतोऽसि। सत्वरं गृहं गच्छेति वस्त्रभूषाः समर्प्य प्रस्थापयामास।।२९-३३।। तुष्टो द्विजः शीघ्रं ग्राममेत्य गुरुदर्शनलालसो गङ्गातीरमेत्य गुरुं दृष्ट्वा नत्वा स्तोत्रैः स्तुत्वा वृत्तान्तं न्यवेदयत्। तुष्टो गुरुस्तमाश्वास्य दक्षिणदिशं यास्ये तत्र स्थाने स्थाने तीर्थानि।।३४-३६।। इति श्रुत्वा प्रणतः सायन्देव आह।।३७।। अहमागमिष्यामि। भवहारि ते पदं हित्वा क्षणं स्थातुं न शक्नोमि। सागरोद्धाराय यथा गङ्गाऽऽगता तथा नो दर्शनं दातुमागतोऽसि। भक्तवत्सल, ते गतिं(?) को वेद। नास्मांस्त्यज। सहायास्य इति पादो दधौ। नतस्य तस्य प्रार्थनां श्रुत्वा तुष्टो

गुरुराह। कार्यार्थं तीर्थान्वितदक्षिणदिशं गत्वैत्य पुनर्दर्शनं ते दास्ये। चिन्तां मा कुर्वरिष्टं दुःखं गतम्। सुखं तिष्ठेति मूर्ध्नि करं दत्वा सत्योक्त्याऽऽश्वास्य तं परावर्त्य च सशिष्यो गुरुर्यत्रारोग्यभवानी तद्वैद्यनाथक्षेत्रं गत्वा तीर्थानि पश्यन्गुप्तोऽभवत्।।३८-४६।। इति श्रुत्वा नामधारक आह। कुतो गुप्तोऽभूत्तदा शिष्याः क्व स्थिताः।।४७।। इति श्रुत्वा सर्ववित्सिद्ध आह। तत्सरस्वती वक्ति।।४८।। अग्रत कथयति प्रविस्तरं प्रश्नमेतमनुसृत्य चोत्तरम्।। संशृणोतु विहितैकमानसः श्रोतृवर्ग इह दत्तमानसः।।४९।।

।।इति चतुर्दशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ पञ्चदशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

चित्रपदोक्तित ईशस्तीर्थगमाय स शिष्यान्।। पञ्चदशे कथयित्वा तद्विधिमैरयदेव।।१।।

सिद्ध आह। धन्या ते वाणी। हे शिष्यशिखामणे शृणु। ते गुरुपदे दृढा भक्तिर्लीनोऽसि। ते प्रश्नान्मे तोषोऽन्तर्धानकारणं शृणु। गुरुमहिमा प्रसृतोऽतोऽनेके दूराद्दर्शनार्थं सकामत्वेनायान्ति।।१-३।। अत्र कलौ साधवोऽसाधवो धूर्ता अपि शिष्या भविष्याम इत्यागमिष्यन्ति। भार्गवरामो निःक्षत्रां महीं कृत्वा द्विजेभ्यो दत्त्वाऽब्धितटं गतः। तत्रापि याचमाना द्विजास्तमेत्य दत्तभूमौ कथं तिष्ठसीत्याहुः। पुनः सोऽब्धेरन्यां भुवमाहृतवान् ।।४-६।। सह्यदक्षिणत उत्तमं वृतं कौङ्कणाख्यममलं स भूतलम्।। तत्प्रदाय जलधौ तिरोऽभवद्याचमानमुखजातशंकितः।।७।। तद्वदेव गुरुमूर्तिरत्र तु प्राविरास भवमुक्तिहेतवे।। याचते स्म तु जनो बहून्वरान्साधु नेदमिति सोऽभवत्तिरः।।८।। वरं दातुमीशोऽप्यनीशो भवेत्किं जगद्व्यापकोऽसौ वरैर्नश्वरैः किम्।। विचिन्त्येति पात्रानुसारेण दास्यंस्तिरोऽभूत्तिरोभूतमायः समायः।।९।। श्रीगुरुस्तिरोधानमिच्छन्सर्वशिष्यानाहूयाह। भो शिष्यास्तीर्थयात्रां गच्छत।।१०।। श्रीशैले पुनर्मे दर्शनं भविष्यतीति श्रुत्वा ते पादौ धृत्वाऽऽहुः। कृपाब्धेऽस्मानुपेक्षसे किं त्वत्पददर्शनान्नः सर्वतीर्थानि तद्धित्वा क्व गन्तव्यं न जानीमः। त्वत्पदे सर्वतीर्थानीति श्रुतिशास्त्रसिद्धांतः। सन्निधाने निधाने क्व पर्यटनम्। कल्पवृक्षं हित्वा को बर्बुरं गच्छेत्। श्रीगुरुराह। वयं संन्यासिन एकत्र पञ्चाहं न स्थेयम्। तीर्थानि सेव्यानि। ततो मनः स्थिरीकृत्यैकवासः प्रशस्यते।।११-१७।। मद्वाक्यात्स्वाश्रमधर्मः सेव्यः। भो यतयस्तीर्थयात्रां कृत्वा श्रीशैले बहुधान्येऽब्दे मे दर्शनं भविष्यति।।१८-१९।। इति गुरुणाऽऽज्ञप्ताः शिष्याः पदे धृत्वोचुस्ते वाक्यं नः प्रमाणं मतम्। तीर्थं द्रष्टुं यास्यामः। यो गुरुवाक्यं न गृह्णाति तस्य यमपुरे रौरवनरकं गृहम्। ते पदे धृते। स्वामिन्, केषु तीर्थेषु गन्तव्यं तदाज्ञापय। तद्धृदि धृत्वा यास्यामः। ते वाक्यं नः सर्वसिद्धिदमिति श्रुत्वा प्रसन्नो गुरुस्तीर्थयात्रामाह। ब्रह्माण्डे तीर्थराजः प्रयागः ख्यातः काशी च तत्र गङ्गा सेव्या। भागीरथीयात्रा षष्टियोजना षष्टिकृच्छ्रफला च। गङ्गाद्वारे द्विगुणम्। यमुनायात्रा विंशतियोजना तावत्कृच्छ्रफलं च।।२०-२८।। कुमारी सरस्वती चतुर्विंशतियोजना। तावत्कृच्छ्रफला च। सर्वत्र यावन्ति योजनानि तावन्तः कृच्छ्राः। पितृतृप्तियज्ञफलं ब्रह्मलोकाप्तिश्च सर्वत्र। वरुणा-कुशावर्ता-शतद्रु-विपाशका-शरावती-वितस्ताऽसिक्नी-मरुद्वृधा- मधुमती-घृतवती-यात्रा विधीयताम्। देवनद्याः पञ्चदशयोजनफलं स्नानात्पवित्रता ब्रह्महत्यादिनाशश्च। चन्द्रभागा रेवती गोमती वेदिका कौशिकी नित्यजला मन्दाकिनी सहस्रवक्त्रा पूर्णा पुण्यनदी बाहुदारुणा बहुफला। यत्र नदीसङ्गस्तत्र स्नानात्त्रिवेणीस्नानफलम्।।२९-३७।। वैरोचनी पुष्करतीर्थं कुरुक्षेत्रं महापुण्यम्। श्रीशैलोऽनन्तो रामेश्वरः सेतुः श्रीरङ्गः पद्मनाभः पुरुषोत्तमः सेव्यः। महालयतीर्थं पितृतृप्तिदं द्विचत्वारिंशत्कुलोद्धर्तृ च। नैमिषारण्यं केदारः कोटिरुद्रश्च सेव्यः नर्मदा च महाफला। मातृकेशः कुब्जतीर्थं कोकामुखी प्रसादतीर्थं गोकर्णः शङ्खकर्णश्चायोध्या मथुरा द्वारावती शालग्रामः शबलग्रामश्च मुक्तिदः।।३८-४४।। गोदावरीयात्रा षड्योजना वाजपेयफलदा। सव्यतस्त्रिवारं तटयात्रातो

महापापहानिर्ज्ञानं च।।४५-४६।। भीमेश्वरवञ्जराख्यतीर्थे प्रयागसमे। कुशतीर्थं द्वादशकृच्छ्रफलम्। गोदाब्धिसङ्गमः षट्त्रिंशत्कृच्छ्रफलदः पूर्णानदी त्रिंशद्योजनपुण्या कृष्णावेणी च पञ्चदशकृच्छ्रफलदा। तुङ्गभद्रा विंशतिकृच्छ्रफलदा। पम्पासरः पवित्रम्। हरिहरक्षेत्रं सर्वपापहरम्। भीमातटयात्रा दशकृच्छ्रफला। पाण्डुरङ्गो मातुलिङ्गं च पवित्रम्। गन्धर्वपुरेऽनेकतीर्थदेवाः कामदाः। भीमाऽमरजायोगे कोटितीर्थानि। तत्र कल्पवृक्षोऽश्वत्थः कामदः। तत्र नृसिंहतीर्थं तदुत्तरे पापघ्नी वाराणसी तत्प्राक्पावनं पापविनाशतीर्थं ततोऽग्रतोऽघहृद्रुद्रपादतीर्थम्।।४७-५५।। केशवसन्निधौ चक्रतीर्थम्। ततः परं कोटितीर्थं मन्मथतीर्थं च।।५६।। यत्र कल्लेश्वरस्तत्र गोकर्णम्। गन्धर्वपुरं सिद्धभूमिः। अत्रानुष्ठानाच्छीघ्रसिद्धिः। यत्र कल्पद्रुस्तत्र किं न सिद्ध्येत्। काकिणीसङ्गमोऽनन्तफलः प्रयागसमः। तुङ्गभद्रा वरदा अस्याः सङ्गमो महाफलः। मलापहासङ्गमः शतजन्माघहृत्। निवृत्तिसङ्गमो ब्रह्महत्याहरः। एवमाचीर्णात्पापविनाशः। बृहस्पती सिंहगे गोदावरी, कन्यागते च कृष्णा, तुलागते तुङ्गभद्रा, कर्कटस्थे मलापहा च गङ्गायुक्ता भवेत्। तदा तत्र स्नानादिना ब्रह्महत्याद्यघनाशः।।५७-६४।। भीमाकृष्णायोगे स्नानाच्छुद्धिः षष्टिजन्मसु विप्रत्वं। तुङ्गभद्रासङ्गमे ततस्त्रिगुणं फलम्। निवृत्तिसङ्गमे चतुर्गुणम्। पातालगङ्गास्नानं मल्लिकार्जुनदर्शनं च षड्गुणफलम्। न पुनर्जन्म च।।६५-६७।। युगालयं द्विगुणपुण्यम्। कृष्णाब्धिसङ्गमे कावेरीसिन्धुसङ्गमे च पुण्यं पञ्चदशगुणम्। ताम्रपर्णी महापुण्या। कृतमाला सर्वपापहरा। पयस्विनी भवहरा। सर्वपापहृत्समुद्रस्कन्ददर्शनं च।।६८-७०।। शेषाद्रिः रङ्गनाथः पद्मनाभः श्रीमदनन्तो मल्लिकार्जुनश्च पूज्यः। सर्वतीर्थफलदं कुम्भकोणम्। कन्याकुमारी, मत्स्यतीर्थं, पक्षितीर्थं, रामेश्वरधनुष्कोटितीर्थं, रङ्गनाथसमीपे कावेरीतीर्थम्।।७१-७३।। पुरुषोत्तमश्चन्द्रकुण्डं च पापहृत्। लक्ष्मीपुरं करवीरं दक्षिणकाशी। यत्र कृष्णोद्गमस्तत्र महाबलेशः। ततः पुण्यं रामेशतीर्थं पावनम्। पुण्ये कोल्हाग्रामे नृसिंहदेवः प्रत्यक्षः परात्मा सदाशिवश्च।।७४-७६।। कृष्णातीरे शक्तिर्भुवनेश्वरी तत्र तपसेश्वरसाम्यम्। वरुणासङ्गमः पापहृत्तत्र स्नानान्मार्कण्डेयसाम्यम्। अमरपुरे कृष्णावेणीपञ्चगङ्गासङ्गमोऽत्र माघस्नानात्प्रयागाधिपुण्यम्। अत्र मुनयस्तपस्तप्त्वा सिद्धिं याता अत्र च सर्वतीर्थानीदं भुवि ख्यातम्। त्र्यहस्नानादखिलार्थलब्धिः।।७७-८२।। ततो युगालयं दर्शनान्मुक्तिदम्। ततः पावनं शूर्पालयं च। तथा विश्वामित्रस्थानं यत्र भगवती मलापहा कृष्णासङ्गमः सर्वदोषहरः। ततः कपिलाश्रमः यत्र कृष्णोत्तरवाहिनी तत्र महातीर्थं एकमन्त्रजपात्कोटिफलम्। ततः केदारतीर्थम्। ततः पीठापुरं यत्र दत्तात्रेय आस्ते। ततो महातीर्थं मणिगिरिर्यत्र सप्तर्षयस्तपस्तेपुः। ऋषभाद्रिर्महापुण्यः। कल्याणनगरं मुक्तिदम्। अहोबलदर्शनं षष्टियज्ञफलम्। श्रीरङ्गदर्शनान्न पुनर्जन्म।।८३-९०।। एवं विधिना तीर्थानि भजत। यदा रजस्वला नदी तदा स्नाने दोषः।।९१।। कर्कसंक्रान्तिमारभ्य मासद्वयं नदीतीरस्थान्विनाऽन्येषां नदीस्नाने दोषः। वर्षाकाले सर्वा नद्यो रजस्वलास्तदा त्र्यहं न स्नानादि। भागीरथीचन्द्रभागासिन्धुगौतमीसरयूनर्मदानां त्र्यहं रजः। वर्षासु सर्वासां दशाहं रजस्वलात्वं वापीकूपतडागानामहोरात्रम्। यद्दिने नवोदकं तद्दिने रजस्वलात्वम्। तदा स्नानान्महादोषः। न तीरस्थानाम्। एष साधारणो विधिः कथितः। विधिना तु क्षौरस्नानोपवासादि कार्यम्। इति श्रुत्वा सर्वे गुरुं नत्वा गुरुवाक्कामधेनुरित्युक्त्वा ते जग्मुः। मया तु सेवार्थं श्रीगुरुसन्निधौ स्थितिः कृता। इतः परं मनोहरं चरित्रं तत्सरस्वती वक्ष्यति ।।९२-१००।। क्षणे क्षणे ब्रह्मरसानुसेवी हातुं क इच्छेद्रुचिमस्य भावी।। रुचिं रसानां रसिकस्त्यजेत्किं त्वीदृक्परार्थोऽन्यरसो भवेत्किम्।।१०१।। गुरुचरित्रमिदं खलु कामधुक् श्रवणलालसनापरकामधुक्।। इत उतापि समग्रपुमर्थदं शृणुत चित्रचरित्रमनर्थदम्।।१०२।।

।।इति पञ्चदशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ षोडशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

षोडशे गुरुरथोद्धतात्मने धौम्यशिष्यचरितोपदेशतः।।
ब्राह्मणाय विदमर्पयद्गुरुद्रोहिणेऽलमनुतप्तचेतसे।।१।।

श्रीः। विनतो नामधारक आह। स्वामिन्नग्रतो गुरुचरित्रं वद। यात्रार्थं के गताः सेवार्थं के स्थितास्तद्वद। इति श्रुत्वा तुष्टः सिद्ध आह।।।१-३।। हे भक्तचूडामणे, मच्चित्तं निद्रितमपि ते प्रश्नेन बुद्धं, सुखं लब्धं, त्वं मे प्राणसखः सच्छिष्यः, त्वद्योगादादितश्चरितं स्मृतम्।।४-५।। पर्यटनेन श्रान्तं मां त्वं कथामृताब्धिमध्ये क्षिप्तवानसि। शान्तोऽभवम्। त्वया साधूपकृतम्। भृशं तुष्टोऽस्मि। पुत्राद्यैस्त्वत्कुलं नन्दते। ते द्वारि न दैन्यम्।।६-७।। गुर्वनुग्रहपात्रस्त्वं लोकमान्यो भविष्यसि। सन्देहो माऽस्तु। हस्तं गृहाण।।८।। कामधुक्चरित्रं विस्तराद्वदामि। वैद्येश्वरसमीपेऽप्रकाशतया श्रीगुरुस्तस्थौ। शिष्यास्तीर्थाटनाय गताः। अहं पादसेवापरोऽभवम्। यत्रारोग्यभवानी तत्र वैद्यनाथेऽब्दपर्यन्तं गुरुस्तस्थौ। तत्रैको ब्राह्मण एत्य भक्त्या गुरुं साष्टाङ्गं नत्वा पादयोः शीर्षं निधायाह। अज्ञानाब्धौ मग्नं मां तारय।।९-१३।। बहुकालं तपस्तप्तं नाद्यापि मे मनः स्थिरम्। सन्मार्गो न दृश्यते। ज्ञानं विनाऽऽयासो व्यर्थ एव। भवद्दर्शनान्मे चित्तं हृष्टम्। मनःस्थैर्याभावे किं कारणं न जाने। त्वं तारको देवः। सद्गुरो, मामुपादिश। ततो मे सत्वरं ज्ञानं भविष्यति।।१४-१७।। श्रीगुरुर्हसंस्तं पप्रच्छ। मुने गुरुं विना त्वया कथं तपस्तप्तं वद। तच्छ्रुत्वा सोऽश्रु मुञ्चन्दुःखित आह। स्वामिन्, शृणु। कश्चिन्मे गुरुश्चण्डोऽत्यन्तनिष्ठुरः दुष्करसेवां कथयन्मामपीडयत्। वेदशास्त्रभाष्यादिकं नाकथयत्। शश्वन्मामाह। नाद्यापि ते मनः स्थिरम्।।१८-२१।। इत्युक्त्वा सेवामादिशत्। तद्वचो मे न श्रुतम्। ततः स मे कुपितः। क्रूरवाक्यं तं त्यक्त्वाऽऽगतोऽस्मि। श्रीगुरुर्हसन्नाह अहहा कथं त्वमात्मघातको जातोऽसि। कश्चिन्मूढो देवालये मलमुत्सृज्य शपन्तमाह। मेऽदृष्टमित। तादृक्त्वं स्वनासाकर्णौ छित्त्वाऽन्यान्दुःशकुनं करोषि। गुरोरवज्ञया कथं ज्ञानं भवेत्। गुरुद्रोही त्वं गुरुं निन्दसि। निधानं त्यक्त्वाऽरण्यमिच्छसि किम्। कामधेनुं त्यक्त्वा क्व धावसि। स्वमुखाद्गुरोर्दोषान्ब्रूषे। कुतो मनःस्थैर्यं ज्ञानलाभो वा। गुरुद्रोहिणोऽत्र परत्र च न सुखम्। कुतोऽस्याज्ञस्य ज्ञानम्।।२२-३०।। गुरुसेवामार्गं यो वेत्ति स वेदादिकं वेद। गुरौ तुष्टे सर्वज्ञत्वम्। अष्टौ सिद्धयो वश्यतां यान्ति। वेदादिकं च क्षणात्सुलभम्। द्विज इति श्रुत्वा गुरुदृष्टिहताशुभो नम्रः सन्नाह। ज्ञानाब्धे सद्गुरो, जय। त्वं सुदुर्मतिं मामुद्धर। मायाजालवेष्टितोऽहं गुरुरूपं न जाने। कृपां कुरु। ततो ज्ञानं भविष्यति। आदौ गुरुः कथं ज्ञेयः, कथं वा तत्सेवाविधानं, तत्सर्वं प्रकाशय। येन मे मनः स्थिरं स्याद्गुरुगतिं जानीयामीदृशमुपकारं कुर्विति पादौ दधौ।।३१-३७।। विद्याप्रदो गुरुः साक्षाद्ब्रह्मविष्णुशिवरूपी न संशयस्तत्सेवा कार्या। तदर्थं भारतोक्तां कथां शृणु। द्वापरे महामतिर्धौम्यर्षिः तस्य वेदाभ्यासरतास्त्रयः शिष्याः गुरुसेवारता अरुणबैदोपमन्युसंज्ञाः। मनःशुद्ध्यर्थं परीक्षार्थं च पूर्वं सेवा ग्राह्येति गुरूणां रीतिः। ततः शुद्धान्तःकरणं दृढभक्तिं च ज्ञात्वा सहसा कृपां कुर्वन्ति। तादृशो धौम्यगुरुः स्वसेवारतमरुणमाहूयाह। हे

शिष्य, त्वरया क्षेत्रं गत्वा क्षेत्रतृप्तिपर्यन्तं सरसो जलमानय। जलं विना सस्यं मरिष्यति। ततः शालेयक्षेत्रं द्रुतं जलमानय।।४०-४८।। इत्याज्ञप्तः शिष्यः सत्वरं गत्वा कुल्यां निर्माय तडागतो जलमानयत्। गर्जमानो जलप्रवाहोऽन्यत्र गतः। तदा शिष्यः स्वगतमाह। गुरुः कुप्येत, जलमन्यत्र याति, किं कर्तव्यमित्युक्त्वाऽश्मभिर्वारिवारणं बबन्ध।।४९-५१।। पाषाणान्दूरतस्त्यक्त्वा प्रवाहोऽन्यत्र गतोऽनेकयत्नैर्जलं क्षेत्रं न यातम्। तदा श्रीहरे, किं करोमि जलं क्षेत्रं न याति चेद्गुरुवृत्त्यर्थं प्राणांस्त्यक्ष्ये। यत्र पाषाणा न तिष्ठन्ति तत्र मे देहः स्थाप्यस्ततोऽम्बु क्षेत्रमेष्यतीति निश्चित्य गुरुं ध्यात्वा जलमध्ये देहं स्थापयामास।।५२-५७।। कुल्यातटयोः शिरः पादौ च संस्थाप्य तस्मिन्स्थिते प्रवाहार्धजलं क्षेत्रं गतम्। अर्धजलमन्यतस्तन्मध्ये निर्विण्णो गुरुकार्यार्पिताङ्गो जलमग्नः स्थितस्तदा प्रवाहार्धजलेन क्षेत्रं पूर्णम्। ततो धौम्यः क्षेत्रं जलपूर्णं दृष्ट्वा सन्तुष्टो विचारयामास। सूर्यास्तसमयो जातः शिष्यो न दृश्यत इति खिन्न इतस्ततोऽन्वेष्य जलनिमित्तं श्रान्तः शिष्यो व्याघ्रादिभिर्भक्षितो न किम्। इत्युक्त्वा हे सखे ३ शिष्या ३ इति प्रेमविह्वलो दीर्घस्वरेणाह्वयामास। तत्सकरुणमाह्वानमुच्चैः श्रुत्वा यत्नाच्छनैरुत्थायागत्य भक्त्या गुरुपदे ववन्दे। धौम्यस्तमालिङ्ग्य सर्वं श्रुत्वा हृष्टः।।५८-६६।। वरं दास्यन्नुवाच। हे शिष्यश्रेष्ठ, वेदशास्त्रविद्याज्ञो भवेत्यक्तस्तत्क्षणं विद्याज्ञानयुतो भूत्वा भक्त्या पादौ जग्राह। कृपाब्धिर्धौम्यस्तुष्ट आह। त्वमालयं गच्छ। सदृशीं भार्यामुद्वाह्य कृती भव। इति प्रस्थापितः शिष्यो गृहं गत्वा तथाऽऽभवद्द्वौ शिष्यौ गुरुसन्निधौ स्थितौ। द्वितीयो बैदाख्यः शिष्यो गुरुशुश्रूषारतस्तन्निश्चयं ज्ञातुं धौम्यस्तमाहूयाह। हे पुत्र, क्षेत्ररक्षां कृत्वा यत्नेन सर्वं धान्यं समानयेत्युक्तो हृष्टः स बैदो द्रुतं गत्वा यावत्पक्वमभूत्तावत्कष्टेन रक्षयित्वा धान्यराशिं विधाय गुरुमेत्याह।।६७-७४।। क्षेत्रे व्रीहिराशिः कृतः गृहमानेतुमाज्ञापय ।।७५।। धौम्य आह। शिष्यशिरोमणे, कष्टेन साधु कृतम्। धान्यमानयेत्युक्त्वैकेन महिषेण युक्तं शकटं दत्त्वा शीघ्रं धान्यमानयेत्याह। स तथेत्यकत्र महिषं नियोज्यान्यत्र स्वयं धृत्वा यत्नाच्छकटं नीत्वा चत्वारिंशन्मणमिताञ्शालीनापूर्य यत्नेन शकटं वाहयामास। महिषो द्रुतं ययौ। स स्वयं तथा गन्तुमशक्तः स्वकण्ठे युगं योजयित्वा।।७६-८०।। तेन सह जगाम। महिषः पङ्के मग्नोऽभूत्तदा गर्ते महिषो निमग्नोऽभूत्।।८१-८१।। बहुचिन्ताविष्टः शिष्यो महिषं विसृज्य बलात्संवाहयन्भारपीडितो मुमूर्षुरभूत्तदा धौम्यः संमुखमेत्य तथाविधं शिष्यं दृष्ट्वा कृपया शिष्यं सङ्कटान्मोचयित्वा प्रसन्नः शिष्यमालिङ्ग्य वेदशास्त्रविद्भवेति वरं ददौ। स वरदानमात्रतोऽपि सर्वविद्याप्रवीणोऽभूत्तं गृहाय प्रैरयत्स गृहं गत्वा ख्यातोऽभवत्।।८३-८६।। तृतीय उपमन्युः शिष्यो गुरुसेवानिरतो विद्याभ्यासेऽस्थिरोऽभूत् बह्वाहारत्वादयमीदृश इति विचार्य धौम्य उवाच। गाः वनं नीत्वाऽन्वहं चारयेति श्रुत्वोपमन्युर्गुरुं नत्वा वनं नीत्वा गाश्चारयामास। क्षुधितो गाः परावर्त्य गृहमागतः। तस्मै गुरुश्चुकोप।।८७-९१।। कुतः शीघ्रमानयसि प्रत्यहम्। सूर्यास्तमानपर्यन्तं प्रत्यहं गाश्चारयेत्युक्तोऽपि तथेत्यङ्गीकृत्य गा आदायापरेऽह्नि वनं गत्वा क्षुधितो गुरुं चिन्तयित्वा नदीतीरे स्नानं संध्यावन्दनं च कृत्वा तत्र विप्रगृहान्दृष्ट्वा गास्तृणे निरुध्य विप्रगृहे माधुकरीं भिक्षित्वा भुक्त्वा च गाश्चारयामास।।९२-९५।। एवं प्रत्यहं कृत्वा गाः रक्षयित्वा निश्यामानयत्। पुष्टं तं दृष्ट्वा गुरुराह। त्वं नित्यं वने उपवासी। ते देहपुष्टेः कारणं किं वदेत्युक्तः शिष्य आह। प्रत्यहं वने विप्रगृहेषु भिक्षां कृत्वा गाश्चारयित्वा गोधनमादाय सायमेमीति श्रुत्वा गुरुराह। मां हित्वा कथमश्नासि। भिक्षामानीय प्रत्यहं मे दत्त्वा पुनर्गत्वा गाश्चारयित्वा सायं गामानयेति।।९६-१००।। स तथेत्युक्त्वाऽपरेऽह्नि गा वनं नीत्वा नित्यवद्भिक्षा गुरवे न्यवेदयत्। कदापि गृहे तस्य परिपूर्णं न भोजनम्। अतः पुनर्भिक्षित्वा भुक्त्वा गा अरक्षत्। एवं द्विभिर्भिक्षित्वैकां भिक्षां गुरवे निवेद्यान्यां स्वयं भुक्त्वा कालक्षेपं चक्रे। एवं

कियता कालेन स्थूलं तं वीक्ष्य कृपया गुरुः स्वयं पप्रच्छ। शिष्य आह। क्षुच्छान्तये द्विवारं भिक्षित्वैकां भवते दत्त्वाऽपरां भुक्त्वा गाश्चारयामीति श्रुत्वा क्रुद्धो गुरुराह। रे शिष्य, द्विवारं भिक्षां मे देहीति। तथेति स द्विवारं भिक्षित्वा गुरवे ददौ। तादृशं क्लेशं न मेने ।।१०१-८।। एवं गाश्चारयन्परेऽह्नि क्षुधितः वत्सपीतावशेषं गलितं क्षीरं दृष्ट्वा।।१०९।। इदं पातुं योग्यं व्यर्थं भुवि पततीति मत्वा क्षुधितः सोऽञ्जलिं बद्ध्वा तत्क्षीरं पपौ। एवं स्वोदरमापूर्य द्विवारं भिक्षां गृहे ददौ। तेन पुष्टं तं दृष्ट्वा तच्छरीरमालक्ष्य गुरुः पप्रच्छ कथं पुष्टो भवसीति। ततस्तं न्यवेदयत्। गुरुराह। उच्छिष्टपानान्मतिहानिर्बहवो दोषाश्चातस्तन्न पिबेत्युक्तः क्षुधार्दितोऽन्येद्युर्वने गत्वाऽद्य किं कार्यमिति चिन्तान्वितो गाश्चारयन् अर्कवृक्षाद्गलितं क्षीरं दृष्ट्वा नेदमुच्छिष्टं यत्नात्पत्रे गृहीत्वाऽश्नामीत्युपविश्य पर्णपुटे गृहीत्वा यावत्पातुमारेभे तावत्क्षीरं नेत्रयोरपतत्।।११०-१९।। तेनाक्षिणी गते गाः क्वापि याताः नापश्यच्चिन्तां प्राप।।१२०।। करे यष्टिर्न लब्धा। चिन्ताग्रस्तः सोऽन्धः गोधनमन्वेषमाणः कूपे पपात। गावो गेहं गता भान्ति गुरुर्मां धिक्करिष्यतीति स चिन्तां प्राप। सूर्योप्यस्तं गतः। शिष्यो नाद्याप्यागत इति चिन्तयित्वा वनं गत्वा तत्र गाः दृष्ट्वा शिष्यं न दृष्ट्वा दुःखार्त उच्चैराह्वयत्। उच्चैर्ध्वनिं श्रुत्वा शिष्यः प्रत्युत्तरं ददौ। तच्छ्रुत्वा कृपालुर्धौम्य एत्य वृत्तान्तं श्रुत्वा कृपयोत्थाप्याहाश्विनौ देवौ स्मरेति। गुरुणाऽऽज्ञप्तोऽश्विनौ सस्मार। तदा दृष्टी प्राप्ते। तत उपमन्युर्भक्त्या गुरुं नमस्कृत्य स्तोत्रैस्तुष्टाव।।२१-२८।। तुष्टो धौम्य आह। हे शिष्य, ते भक्त्या सौशील्यात्तुष्टोऽस्मि। प्रसन्नो मस्तके करं दधौ। तदा शिष्यो वेदशास्त्रादिनिपुणोऽभूत्। तं गुरुराह। शिष्य, यथासुखं गृहं गच्छ। सदृशीं स्त्रियं विवाह्य सुखं वस। ते कीर्तिः प्रसरिष्यति। ते शिष्यास्त्वादृशो भविष्यन्ति। उत्तङ्काख्यस्ते शिष्यो भुवि ख्यातो भूत्वा शेषाञ्जित्वा त्वद्दक्षिणार्थं शेषलोकात्कुण्डले आनीय कीर्तिमान्भविष्यति। स च जनमेजयस्य सर्पसत्रे सर्पहोमं करिष्यतीति प्रस्थापित उपमन्युरगात्।।२९-४१।। तच्छिष्य उत्तङ्को जनमेजयराजसत्रे सर्पान्हुत्वा गुरुकृपासामर्थ्यात्सेन्द्रतक्षकमानीय त्रैलोक्यां ख्यातोऽभूत्।।३५-३६।। गुरुद्रोहिणोऽत्र च परत्र न सुखम्। स पापी कुम्भीपाकं गमिष्यति। गुरुतोषात्किं न सिद्ध्यति। गुरौ तुष्टे क्षणाद्वेदशास्त्रादिलाभः। एवमज्ञात्वाऽविद्यया वृथा भ्रमसि। स्वगुरुं गच्छ। स त्वां तारयिष्यति। तस्मिंस्तुष्टे शीघ्रं सर्वमन्त्रसिद्धिरेवं ज्ञात्वा स्वगुरुं शरणं व्रजेति।।३७-१४०।। इति श्रुत्वा स विवेकी भूत्वागुरुपदयोः शिरो निधायाह। गुरुमूर्ते, परार्थसाधनं साधूक्तम्। कृपया बोधः कृतः। अहं गुरुद्रोही। मेऽनन्तापराधाः। गुरोश्चित्तं भिन्नं कथं तुष्यति। भिन्नं सुवर्णादि सन्धीयते। न तु मौक्तिकम्। तथाऽन्तःकरणं गुरोर्मे भिन्नम्। कथं तस्यैक्यम्। किं मम जीवनेन। न जीवनापेक्षा।।४१-४५।। गुरुद्रोहिशरीरस्य क्वोपयोगः। न मे जीविताशा। गुर्वर्थं प्राणांस्त्यक्त्वा गुरुं नत्वा विरक्तोऽनुतप्तः स प्राणांस्त्यक्तुमुद्युक्तः।।४६-४७।। तस्यानुतापेन पापं दग्धम्। अग्निस्पर्शाद्भस्मेव कर्पूर इव च तस्यानुतापाग्निना सर्वे दोषा दग्धाः। अत एवानुतापिनः शीघ्रं शतजन्माशेषदोषनाशः। स द्विजः प्राणांस्त्यक्तुं प्रवृत्तः। तमाहूय श्रीगुरुराह। चिन्ता ते माऽस्तु। सर्वं पापं गतम्। वैराग्यं ते जातम्। स्वगुरुं सावधानेन हृदा स्मरेत्युक्तः स पदे नत्वाऽऽह। हे सद्गुरो, त्वं त्रिमूर्त्यात्मकोऽसि।।४८-५४।। सर्वात्मनस्ते कृपा चेत्क्व मे पापम्। सूर्ये उदितेऽन्धकारः कथं तिष्ठेत्। एवं भक्त्या गुरुं स्तुत्वा प्रेमरुद्धकण्ठो गद्गदाक्षरः हृष्टरोमा प्रसन्नदृङ्निर्मलचित्तो विप्रः श्रीगुरोः पदयोः शिरो निधाय सकरुणमाह। मां तारयेति। निर्विण्णमनसा पुनः पादयोः शिरं दधौ। तदा तत्क्षणं ज्ञानमभूत्। वेदशास्त्रादिनिपुणोऽभवत्। गुरौ प्रसन्ने किं दुर्लभम्। स्पर्शस्पर्शादुत्तमस्वर्णवद्गुरुपादस्पर्शाद्द्विजो ज्ञानी अभूत्। तस्यानन्दोऽभूत्तं श्रीगुरुराह। स एवाहं ब्रह्मन्निति विद्धि। नात्र संशय इति श्रीगुरुणोक्तः स विप्रो गुरुं नत्वा स्वगुरुवत्तं दृष्ट्वा

मुक्तोऽभूत्।।५५-१६३।। अथ श्रीगुरुः कृष्णातीरमेत्य भिल्लवाट्याख्यग्रामे भुवनेश्वरीसन्निधौ कृष्णावेण्याः पश्चिमतीरे उदुम्बरमूलेऽतिष्ठत्। यत्र सर्वसिद्धयः। तत्क्षेत्रमाहात्म्यश्रवणान्मोक्ष एव।।६४-१६६।। अत एव सरस्वतीद्विजः खलु गङ्गाधरभूसुरात्मजः।। स्वगुरोश्चरितं सविस्तरं वदति श्रोतृमनोहरं वरम्।।१६७।।

।।इति षोडशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ सप्तदशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

आर्यावमानितोऽदादार्यायै मूढविप्र इह जिह्वाम्।।
सप्तदशे तत्प्रेरित ईशमवाप्यालभत्ततो जिह्वाम्।।

सिद्ध आह। हे नामधारक, भक्त्या त्वं गुरुपदे लीनोऽसि। यथा पर्जन्यसूचको वातः प्राग्वाति तथा दैन्यहृत्ते कथारुचिः। कामधुक्चरितं वच्मि। सावधानतया शृणु।।१-३।। भुवनेश्वर्याः पश्चात्कृष्णातीरे उदुम्बरमूलेऽनुष्ठानकृद्गुरुश्चातुर्मास्यमस्थात्। तत्र पावने सिद्धस्थाने- ऽप्रकाशत्वेनापि स्थितस्य गुरोर्निवासात्तत्स्थानमहिमाऽधिकोऽभूत् ।।४-६।। इति श्रुत्वा नामधारक आह। परमात्मा गुरुः कुतो गुप्तस्तिष्ठति। किमर्थमस्यानुष्ठानम्। तृप्तकामस्य कुतो भिक्षायाच्ञेति। सिद्ध आह शृणु। शिवात्मत्वाद्भिक्षायाच्ञाऽस्य त्रिमूर्तेर्भक्तानुग्रहार्थम्। श्रीदत्तस्य तीर्थयात्रानुष्ठानादि लोकशिक्षार्थम्। कालवशाद्गुप्ततीर्थानि भक्तनुग्रहार्थं प्रकाशयामास। स्वयं तीर्थरूपस्याटनं परोपकारार्थम्। खलवञ्चनाय गुप्तोऽभूत्।।७-१२।। तेजस्वी कथं गुप्तो भवेत्। तथा कस्तूरीगन्धश्च। यथाऽज्ञातोऽपि कल्पद्रुः सान्निध्यात्कल्पितकामधुक् तथा गुरुः। तत्र येन गुरोः पावनमहिमा प्रकटितस्तच्छृणु।।१३-१५।। करवीरे वेदशाखादिनिपुणोऽध्यापकः आद्यशाखीयः स्वकर्मनिरतः कश्चन विप्रोऽभूत्। तस्य धीमन्दः सुतो जातः। विप्रो मृतः। मूर्खपुत्रो ववृधे। द्विजैः स गृह्योक्तविधानेन संस्कृतः। पशुप्रायस्य मूर्खस्य तस्य सन्ध्यावन्दनगायत्रीवार्ताऽपि न।।१६-२०।। यत्रान्ये पठन्ति तत्रायं मन्दधीः पठित्वा तदेव विस्मरति स्म। बुधास्तं विनिन्द्याहुः। हे दुर्मते, विद्वत्कुले भूत्वा मूर्खोऽभूः।।२१-२२।। ते पिता ज्ञानी वेदादिवित्। तदुदरे कथँ पाषाणतुल्यस्त्वम्। धिक्ते जीवनम्। पितृनाम कलङ्कितम्। गले शिलां बद्ध्वाऽऽपो विशात्र भूत्वा त्वं सूकरोऽसि। दुराचारस्य ते गतिर्यमपुरे। नृषु विद्वानधिकः। विद्या निधिरेव स्वाधीनः। विद्वान्सम्पद्भोगभाक्। स च सर्वैः पूज्यते। वयोधिकोऽप्यविद्वान्नहि पूज्यतेऽल्पोऽपि विद्वान् श्रेष्ठैः पूज्यते।।२३-२८।। यस्य सोदरा न तस्य विद्यैव सोदराः। अतो विद्याऽभ्यसनीया। विद्वान्सर्वत्र पूज्यते।।२९।।स्वजनहीनो विदेशस्थोऽपि विद्वान्स्वजनैरिव तत्रत्यैः पूज्यते। विद्यावान् ज्ञानी भवति। तद्देहे सर्वदेवास्तिष्ठन्ति। स पूजामर्हति। लोकवन्द्योऽपि भूपो विद्यावन्तमर्चति। यस्य न धनं तस्य विद्या धनम्। ततो विद्याभ्यासः कार्यो विद्याहीनः पशुः। इति श्रुत्वा मूर्खः प्रणम्याह। सत्यमुक्तम्। जन्मान्तरे मे विद्याभ्यासो न कृतः। ततो विद्या न लभ्यतेऽत्र प्रयत्न उपायो वाऽस्ति चेद् ब्रूत।।३०-३६।। इति श्रुत्वा ते प्रहस्योचुः। नेह जन्मनि ते विद्या। जन्मान्तरे भविष्यति।।३७।। क्व ते विद्यावार्ता। त्वं नृपशुः। रे मूर्ख कुलनाशक, भिक्षयोदरं भरेति श्रुत्वा सोऽनुतप्तो विरक्तो वनं गत्वाऽऽह। धीहीनं मां दूषयन्त्यतः प्राणास्त्यक्ष्ये। पशोर्मे जीवितेन किम्। धिङ्मे जीवनम्। मत्तः श्वा वरः। मे जीवितेनालमिति विरज्य भिल्लवाट्यां कृष्णायाः प्राक्तटे यत्र जगन्माता भुवनेश्वरी तत्र देव्या दर्शनं कृत्वा दुःखितः स स्नानादि त्यक्त्वा देव्याः समीपे प्रायोपवेशनं चक्रे। एवं त्रिदिनं भृशं निर्विण्णो देवि, प्रसीदेत्युक्त्वोपवासं चक्रे।।३८-४५।। स्वप्नेऽपि देव्याः प्रसादो

नाप्तः। द्विज आह। भवान्यम्ब कुतो मामुपेक्षसे। इत्याक्रोशेन जिह्वां छेत्तुं देवीपदे आर्पयत् पुनश्चाह। न प्रसीदसि चेन्निश्चयेन शिरश्छित्त्वा दास्ये। एवं निर्विण्णं तस्मिन् शिरश्छेत्तुमुद्यते च स्वप्नेऽम्बा तमाह ।।४६-४९।। शृणु बाल क्रोधं मा कार्षीः परतीरे उदुम्बरमूले महाञ्छिवावतारोऽस्ति तं शरणं गच्छ। स तेऽभीष्टं पूरयतीति स्वप्ने श्रुत्वा स प्रबुद्धः सत्वरं कृष्णामुत्तीर्य तत्रोपविष्टं श्रीगुरुं ददर्श। तत्पदे शिरो निधाय तुष्टाव। तुष्टः प्रसन्नो गुरुस्तमाश्वास्य।।५०-५४।। तन्मूर्ध्नि करं दधौ। तदा छिन्नापि जिह्वा ववृधे। स ज्ञानी बभूव। वेदशास्त्रादि सर्वं वेद। सर्वत्र पूज्यश्चाभूत्। काको मानसं प्राप्य यथा राजहंसो भवति, यथा च चिन्तामणिस्पर्शाल्लोहं स्वर्णं भवति, यथा च जम्बूनद्यां पतिता मृत्स्वर्णं भवति, तथा छिन्नजिह्वोऽपि गुरुहस्तस्पर्शात्सुजिह्वो वेदशास्त्राद्यभिज्ञोऽभूत्। श्रीनामधारक सुकारकशक्तिधर्तुः श्रीसद्गुरोः सुमहिमा न हि मानमेति।। माहात्म्यमस्य वसतेरपि कोऽत्र वेद प्रायः स्वयं स भगवान् गुरुरेव वेद।। अत एव सरस्वतीद्विजः खलु गङ्गाधरभूसुरात्मजः।। सुविचित्रचरित्रमात्मनः प्रजगौ लघ्वपि तद्धरेन्मनः।।६०-६१।।

।।इति सप्तदशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ अष्टादशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

भिक्षार्थं गत्वा कुसुमितलतावेल्लितद्वारदेशं गेहं विप्रस्य प्रभुरतिदरिद्रस्य भुक्त्वाऽपि शाकम्।।
छित्त्वा वल्लीं स्ववसतिमगाल्लतामूलदेशेलेभेऽर्थौघं द्विजवर इहाष्टादशे चाशिषोऽपि।।१।।

नामधारक आह। स्वामिन्सिद्ध, जय। त्वं भवतारकोऽसि। त्वया कथासुधया मे कर्णे पूर्णे। कामधुक्चरितं श्रुत्वाऽपि न तृप्तिः। किन्त्वतीव पिपासा वर्धते। गुरुपादाब्जचिन्तकस्य कथं तावता तृप्तिः। पुनः पाययेति विनीतो भक्तस्तत्पदे शिरो दधौ। तुष्टः सिद्धो हसन्नाह। शृणु। विस्तरात्कथयामि। हे शिष्याग्र्य, ते वाणी धन्या सदा त्वद्भक्तिः श्रीगुरुपदे। त्वत्प्रश्नान्मेऽपि लाभो यतस्तत्पदे स्थिते। उदुम्बरस्थानमहिमा कथितोऽग्रतः कथयिष्ये। तत्र भक्ततारको गुरुः किञ्चित्कालं स्थित्वा ततः प्रसिद्धोऽभूत् ।।१-९।। भक्तानुग्रहार्थं ततो वरुणासङ्गमं गत्वा ततो दक्षिणतोऽगमत्। कृष्णास्थतीर्थानि पुनानः कृष्णापञ्चनदीसङ्गमे द्वादशवर्षाण्यस्थात्।।१०-११।। काशीसम तत्पुरं प्रयागसमं च दृष्ट्वा तत्र तस्थौ। कृष्णावेणीपञ्चनदीसङ्गमोऽनुत्तमः। कुरुक्षेत्राधिपुण्यं पावनं तत्क्षेत्रम्। अत्रामितानि तीर्थानि। ततः श्रीगुरुः स्थितः। पुराणोक्ताः पञ्चगङ्गाः शृणु। शिवा, भद्रा, भोगवती, कुम्भी, सरस्वतीत्येताः पञ्चमहापापहाः कृष्णया सङ्गताः। सङ्गमोऽयं पापहा प्रयागाधिपुण्यप्रदः।।१२-१७।। पूर्वेऽमरपुरग्रामो दक्षिणे प्रयागो मनोहरः सङ्गमः।।१८।। मध्ये उदुम्बरः कल्पद्रुः। षट्कूलतीर्थसन्निधौ अमरेश्वरः। वाराणस्यां पञ्चगङ्गायुता भागीरथी तथाऽत्रेयं कृष्णाऽमरेश्वरसन्निधौ चतुःषष्टियोगिन्यो लोकपावनं शक्तितीर्थं चामरलिङ्गं सुन्दरं विश्वनाथ इव साक्षाद्ब्रह्म। यत्सेवनान्मर्त्योऽप्यमर्त्यो भवेत्।।१९-२२।। प्रयागे माघस्नानाद्यत्पुण्यं ततः शतगुणमत्रैकस्नानतः। प्रसङ्गेनापि स्नानात् प्रयागाधिफलम्। यत्र साक्षात्परब्रह्मामरेश्वरोऽतस्तत्र कोटितीर्थानि। यत्र कृष्णा दक्षिणवाहिनी तत्रामितानि तीर्थानि। विस्तरभयादष्टतीर्थानि वक्ष्यन्ते ।।२२-२६।। यत्र कृष्णा पश्चिमवाहिनी तत्र ब्रह्महत्यादिहृच्छुक्लतीर्थं उदुम्बरसमीपे धनुरन्तरेण पापविनाशं काम्यं, वरदं, अमरेश्वरं चेति त्रीणि तीर्थानि। अन्यान्यमितानि तद्वर्णने विस्तरो भवेत्। अत्र द्वादशाब्दानि तस्थौ। यत्र कृष्णावेणीपञ्चनद्यो मिलितास्तच्छ्रेष्ठं स्थानं तन्माहात्म्यं को वदेत्। ब्रह्महत्यादि स्नानान्नश्यति। सकलाभीष्टदस्यास्योत्तमं माहात्म्यम्। यद्दर्शनात्कामपूर्तिस्तत्स्नानमाहात्म्यम् को वदेत्। यत्र कल्पतरुस्तत्र नृणां किं दुर्लभम्। कलौ कालवशाद्गुप्तं गुरुणा प्रकटितम्। भक्ततारणाय तीर्थख्यापनाय च।।२७-३६।। अत्र श्रीगुरुः स्थित्वा प्रतिदिनं भिक्षार्थं अमरपुरग्रामं ययौ। तस्मिन्ग्रामे एको भाविको विप्रः। तद्भार्या च पतिव्रताऽभूत्। सात्त्विकः क्षीणो दीनः स यायावरवृत्तिः स्वकर्मरतोऽभूत्।।३७-३९।। तस्याङ्गणे शाकवल्ली विस्तृता। यस्याः कुटुम्बभरणक्षमा अमिताः शम्बाः।।४०।। यद्दिने भिक्षा न लभ्यते तद्दिने शम्बापाकं कृत्वा सकुटुम्बं सोऽश्नाति। दरिद्रोऽपि शान्तो विप्रः पञ्चयज्ञपरोऽतिथिप्रियः। तद्वेश्म

श्रीगुरुर्भिक्षार्थमागतः। विप्रः सम्मुखं गत्वा तमानीय षोडशोपचारैः सम्पूज्य सादरं भक्त्या शाकं ददौ।।४१-४४।। शाकभिक्षां भुक्त्वा तुष्टो गुरुस्तमाश्वास्याह। दारिद्रं ते नष्टमिति। ततो गच्छन्निष्टदो भगवान्वितततां ममतामिव तां करेण धृत्वोत्पाट्य सङ्गमं ययौ। तदा ससुता दुःखिता ब्राह्मणी प्राह। हा कष्टं मेऽदृष्टं दुष्टम्। यतयेऽस्माभिरुपद्रवो न दत्तोऽथापि नो ग्रासो हृतः। वल्लीं छित्त्वा भुवि जहौ। एवं दुःखितां तां पतिराहादृष्टं ज्ञात्वौषधै रोगमिव श्रेयोघ्नं रोषं सद्धिया जहि। प्रारब्धं नः प्रमाणम्। यद्भावि तदीशेच्छया भविष्यति। तदधीनं जगत्। विभुर्गुणकर्मभिः सृष्ट्यादिकृदपि नाज्यते। सोऽसक्तोऽनहङ्कारोऽन्नमापिपीलिकाभ्यो दत्ते। आयुरन्नं प्रयच्छतीति श्रुतिस्मृती वदतः। सिंहायान्वहं हस्त्याहारं दत्ते।।४५-५३।। पूर्वमाहारं निर्माय चतुरशीतिलक्षस्थूलसूक्ष्मभूतानि सृजति। स समदृक् भूपं रङ्कं च पुष्णाति। यस्य यथाऽर्जितं तथा तस्मै दत्ते। कोऽन्यो भोक्ता। मूर्खः स्वकर्मान्यत्रेक्षते। पूर्वं यत्स्वयमुप्तं तद्भोग्यम्। त्वं स्वकर्मास्मृत्वा यतौ दोषं योजयसि। मे ग्रासानेन हृत इत्यविद्यावृता ब्रूषे। स तारको नो गृहे भिक्षां बुभुजे। दारिद्रं हृतवान्। ममाहमिति संरूढग्रंथिभेत्ताऽपि सः। इति स्त्रियं बोधेनाश्वास्य वल्लीं दूरतस्त्यक्त्वाऽङ्गणस्थं वल्ल्या आलवालमुत्खाय गुरोः प्रसादाद्धनपूर्णं घटं लब्ध्वा हृष्टो विप्रो गृहं नीत्वा स्त्रियै प्राह। चित्रं पश्य। यतिः प्रसन्नोऽभूदतो वल्लीं चिच्छेद। यतः महानिधिर्लब्धः।।५४-६१।। नायं नरः साक्षाद्योगी महेश्वरो दैन्यहरो नो लब्धः। दर्शनार्थं चरेति सस्त्रीको गुरुं गत्वाऽभ्यर्च्य धनलाभादि कथयामास।।६२-६५।। श्रीगुरुः प्राह। हे विप्र, क्वापीदं न प्रकाशय। प्रकाशितेऽस्मिन् ते गृहे लक्ष्मीर्न स्थास्यति। ते कुलेऽखण्डा श्रीर्निवसिष्यति। मत्प्रसादात्ते कुलं पुत्राद्यैर्नन्दते। इति वरं लब्ध्वाऽऽज्ञप्तो विप्रः सस्त्रीको गृहं गतः। एवं दैन्यहारिणी गुरुकृपा। यस्योपरि गुरोः कृपा कुतोऽस्य दैन्यम्। यद्द्वारि कल्पवृक्षस्तत्र दैन्यं कथं तिष्ठेत्। दैन्ययुक्तोऽपि गुरुभजनात्सर्वपूज्यः समुच्यते।।६६-७०।। यो गुरुं भजेत्सोऽत्र परत्र च सिद्धिभाक्। तद्गृहेऽष्टैश्वर्ययुक्ताऽखण्डा श्रीः। एवं गुरोर्महिमा। हे नामधारकातो गुरुं भज। कामधेनुर्गृहमेष्यति।।७१-७२।। श्लोक।। श्रोतारस्ते सत्कथास्वादुपानं कुर्वन्त्वेतत्प्रार्थयेऽहं समानम्।। मानं हित्वा विप्रगङ्गाधरस्य पुत्रो भक्तः सर्वदेवावरस्य।।७३।।

।।इति अष्टादशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ एकोनविंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

अमरापुर ऊनविंशकेऽनुगगङ्गानुजपा उदुम्बरे।। वरदे स निधाय पादुके गुरुराश्वास्य च योगिनीरगात्।।१।।

सिद्धचरणौ धृत्वा नत्वा च शिष्यो नामधारक आह। हे सिद्धाज्ञानध्वान्तज्योतिस्त्वं जय। योगिराजस्त्वं मनोहरो भवसागरतारकश्चासि। मोहरात्र्यामज्ञानध्वान्ते निद्रितं मे मन उद्बोध्य गुरुलीलामृतासवं त्वया मह्यं दत्तम्।।३।। उदितं ज्ञानार्कं दृष्ट्वा प्रबुद्धः मे चेतः। त्वया कृपया बोधितोऽस्मि।।४।। हे वदान्य योगीशाग्रतः कथां कथयेति पादलग्नोऽभवत्। सन्तुष्टः सिद्ध आह। अनुपमं माहात्म्यं मुदा विस्ताराद्वक्ष्ये शृणु। श्रीगुरुः प्रीत्योदुम्बरस्याधः स्थितः। तच्छ्रुत्वा नामधारक आह। पुण्यवृक्षान् त्यक्त्वाऽस्य कुत उदुम्बरे प्रीतिः। वेदादिष्वश्वत्थः श्रेष्ठो मतोऽथाप्युदुम्बरप्रीतेः कारणं किं वद।।५-९।। सिद्ध आह। यदा क्रुद्धो नृसिंहो नखैर्हिरण्यकशिपोः कोष्ठं विदार्यान्त्राणि मालावत्कण्ठे दधौ तदा दैत्योदरे वडवानलवद्दीप्तं कालकूटवदसह्यं विषं नखेषु लग्नम्।।१०-१२।। तेन नखास्तप्ताः। दुःसहवेदना च जाता। तदा नखतापशान्तये लक्ष्म्योदुम्बरफलानि दत्तानि। तदौदुम्बरस्पर्शाद्विषाग्निः शान्तः। नृसिंहः शान्तिं ययौ। उग्रोऽपि शान्तो नृसिंहो लक्ष्मीमालिङ्गयत्। उभावपि प्रसन्नो वृक्षाय वरं ददतुः। नृसिंह आह। हे उदुम्बर, त्वं कल्पवृक्षः सदा फलाढ्यो भविष्यसि। ये भक्त्या त्वां भजन्ति तत्कामसिद्धि शीघ्रं भविष्यति। त्वद्दर्शनात्सर्वविषशान्तिः। ये त्वां भजन्ति तेषां सर्वकामसिद्धिः पापक्षयश्च। त्वत्सेवनाद्वन्ध्या पुत्रवती दरिद्रः श्रीमांश्चाशु भविष्यति।।१३-२०।। त्वच्छायाजपानुष्ठानादनन्तफलमिष्टलाभ- श्च। त्वत्सेवको व्याधिहीनो भवेत्। त्वदर्चनाद्ब्रह्महत्यादिनाशः। त्वद्भजकानां शीघ्रं सङ्कल्पितकामसिद्धिः। त्वदधीना सर्वे देवाः। श्रिया सहाहमपि त्वयि वसामीति हृषीकेशो नृसिंहो वरं ददौ।।२२-२५।। तस्मादुदुम्बरः कलौ कल्पतरुः यत्फलादुग्रो नृसिंहः शान्तोऽभूत्। यतस्तस्मै वरो दत्तस्तत्रैव श्रीनृसिंहसरस्वती वसति।।२६-२७।। यतोऽवतरान्तरे स्वविषशान्तिर्जाता ततस्तत्रेष्टदो वसति। सुलभोऽयं कल्पतरुः श्रीगुरुस्थित्या विशेषतः कामदः।।२८-२९।। तत्र चन्द्रमौलिर्ब्रह्मविष्णुशिवरूपी नृदेहः श्रीगुरुर्भक्ततारणार्थं भूमौ अवतीर्य तीर्थानि पावयन्गुप्तरूपेण स्थितो मध्याह्ने महोत्सवं चक्रे। अमरेश्वराच्चतुःषष्टियोगिन्य एत्य श्रीगुरुं भक्त्या (सं-)पूज्य नत्वा प्रार्थ्य स्वाश्रमं नीत्वा गन्धादिभिरपूजयन्।।३०-३४।। गुरुस्तत्र प्रत्यहं भुक्त्वोदुम्बरे तिष्ठति। तच्चेष्टामविज्ञाय विस्मिता द्विजा आहुः। अहो भिक्षार्थमयं न गच्छति। द्वीपेऽरण्येऽशनं विना कथं कालं नयति। गुप्ताऽस्य चेष्टा कश्चिन्नरं संस्थाप्य कुतो भिक्षामानयतीति ज्ञेयेति विचार्यैकं नरं तत्र स्थापयामासुः। स विलीय स्थितोऽपि मध्याह्ने भीतोऽभवत्।।३५-३८।। गुरोरन्तं परीक्षितुमिच्छन्ति ते नरकभाजः। स भीतो ग्रामं गतः। तत्र कृषिरक्षको गङ्गानुजभक्तो जलमध्यात् पूजार्थमागता योगिनीर्वीक्ष्य जलमध्ये मार्गं च वीक्ष्य विस्मित आह। कोऽयं यतिः जलमार्गः कथम्। द्विभागं जलं दृश्यते। इत्थं ध्यायन्योगिनीभिः पूजितं भोजितं पुनः पूर्ववत्स्थितं च दृष्ट्वा विस्मितः स्वगतं प्राह। ईशावतारोऽयमतो देवकन्या आनर्चुरिति। ततः परेद्युः स महोत्सवं दृष्ट्वा योगिन्या पूजितं च ताभिः सह प्रवाहमध्ये मार्गं च वीक्ष्य स्वयं

स च तेनैव मार्गेणान्वगात्।।३९-४६।। तीरतो द्विभागं जलं मध्ये रत्नाञ्चितगोपुरं चापश्यत्।।४७।। दीपहस्ताः श्रीगुरुं नीराज्यामरावतीसमं सूर्याभं पुरं नीत्वा रत्नखचितसिंहासने उपवेश्य देवकन्या विधिना पूज्य षड्रसचतुर्विधान्नैर्भोजयामासुः। भुक्तो गुरुर्नरं वीक्ष्याह। किमर्थमागतोऽसीत्यपृच्छत्स गुरुं प्राह दर्शनायागतोऽस्मि। हे गौरीरमण, स्वामिंस्त्वं केवलं त्रिमूर्तिः।।४८-५२।। मे त्वत्स्वरूपज्ञानं न। हे दयाब्धे संसारवेष्टितं मामुद्धर। त्वं विश्वतारकोऽत्रावतीर्णोऽसि। अज्ञानान्धलोकस्य ज्योतीरूपोऽसि। यस्य त्वद्दर्शनं भवेत्स ऐहिकामुष्मिकार्थान् शीघ्रं लभते। इति स्तोत्रैः स्तुतो श्रीगुरुस्तमाश्वास्य तुष्ट आह।।५३-५६।। ते सर्वं दैन्यं नष्टम्। यद्यद्वाञ्छसि तल्लभेत्। यदिह दृष्टं तत् यावदत्र तिष्ठामि तावन्मा प्रकाशय। ते सद्गतिर्भविष्यति।।५७-५८।। इत्युक्त्वा गुरुरुदुम्बरं प्राप्तः। स तु गङ्गानुजो भक्त्या तं नत्वा गुरुणाऽऽज्ञप्तः स्वक्षेत्रमेत्य गुरुप्रसादान्निधिं लब्ध्वा ज्ञानवानभूत्। स ततः पुत्रपौत्रयुक्तो महानन्देन नित्यं गुरुसेवापरायणोऽभूत्। एवं कलत्रयुक्तः स भाविकः प्रत्यहं गुरुं भेजे। एकदा माघे पूर्णिमायां गुरुं प्रणम्य विनत आह। गुरो, माघस्नानं प्रयागे महाफलं श्रुतम्। काशी च महाफला।।५९-६४।। कथम्भूता काशी, वाराणसी, प्रयागश्च जातिहीनोऽहं न जाने। स्वामिन्कृपया वद।।६५।। श्रीगुरुराह। कृष्णापञ्चनदीयोगः प्रयागः। काशी च युगालयम्। कोल्हापुरं च गयेति त्रिस्थली। यदीच्छसि तां दर्शयामीति व्याघ्राजिनारूढः श्रीगुरुः पादुकां दृढं धारयित्वा प्रातः प्रयागमेत्य स्नात्वा तेन सह काशीं गत्वा विश्वेश्वरं प्रदर्श्य मध्याह्ने मनोगत्या गयामपि गत्वैवं त्रिस्थलीं नीत्वा सायं तेन सह स्वाश्रमं ययौ। गङ्गानुजो दृष्ट्वैवं चकितोऽभवत्।।६६-७०।। विश्वनाटक एवं स्थित्वाऽपि कीर्तिं प्रकटिता ज्ञात्वा स्थानमाहात्म्यं प्रकाश्यामरेश्वरमनुनीय गन्तुमुपचक्रमे।।७१-७२।। योगिन्यो जिगमिषु तं ज्ञात्वा विनताः सकरुणमाहुः। कुतोऽस्मानुपेक्षसे। नित्यं त्वद्दर्शनात्तापत्रयनाशः। ते निकटेऽन्नपूर्णातस्त्वां त्यक्तुं क उत्सहेत्।।७३-७४।। इति श्रुत्वा हृष्टो भक्तवत्सलः ताभ्यो वरं दास्यन्नाह। सदाऽप्रकटरूपेणोदुम्बरे तिष्ठामि। मनोहरेऽत्र कल्पवृक्षे भवतीभिः स्थेयम्। अन्नपूर्णां ध्रुवं स्थापयामि। कल्पवृक्षे भवतीभिश्च स्थातव्यम्। अमरपुरे पश्चिमतो मम स्थानं ख्यातं भविष्यति। ये वः पूजयिष्यन्ति तेभ्यः कामदा भवत। युष्मानुदुम्बरं पादुके चार्चन्ति तेषां कामसिद्धिः।।७५-८०।। अत्रान्नपूर्णा तिष्ठेत्। नित्यं द्विजाराधनं कामसिद्धिः पुरुषार्थश्च।।८१।। पापनाशकाम्यसिद्धतीर्थे स्नात्वा सप्तवारमुदुम्बरं वश्चाभिषिञ्चति वृद्धा वन्ध्याऽपि सा दीर्घायुषं पुत्रं लभेत्। अत्र स्नानाद्ब्रह्महत्यादिपापनाशः। ग्रहणेऽर्कसंक्रान्तौ स्नानादश्वमेधाधिफलम्। सोमवत्यमाव्यतीपातादिषु एकवारस्नानाद्यद्गङ्गायां स्वर्णशृङ्गिण्यो रौप्यखुराः सालङ्कृताः कपिलाः सहस्रधेनव उत्तमविप्रेभ्यो दीयन्ते ततोऽप्यधिकं फलम्। एकविप्रभोजनात्कोटिब्राह्मणभोजनफलम्। शुद्धमनसैकमन्त्रजपाद्धोमाच्च कोटिजपहोमफलम्।।८२-८८।। रुद्रैकादशिन्यभिषेतकादतिरुद्राभिषेकफलम् ।।८९।। मन्दगत्या प्रदक्षिणाया पदे पदे वाजपेयफलम्। तथैव द्विवारं प्रदक्षिणायाः नमस्कारस्य च फलम। अङ्गहीनः कुष्ठी वा लक्षप्रदक्षिणतो देवसमाङ्गः। ईदृशे स्थाने कल्पवृक्षे मूढदृष्ट्या विलीय तिष्ठामीत्याभाष्य तत्र तिष्ठन्नपि गन्धर्वपुरं ययौ। विश्वरूपो जगन्नाथः सर्वगतोऽप्युदुम्बरे नित्यं तिष्ठति। लोकदृष्ट्याऽन्यत्र गतोऽप्युदुम्बरे तिष्ठतीति कृष्णातीरे सद्गुरोर्महिमा जातः। गन्धर्वपुरमहिमानं वक्ष्ये इति। गङ्गाधरपुत्रः सरस्वतीसंज्ञो भक्त्या कथेयमवगाह्येति प्राह।।९०-९८।। गुरुचरित्रमिदं खलु कामधुग्भजति यः सततं तदनन्यभुक्।। निधिरहो न जहाति तदालयं तत इदं विदिता भजतालयम्।।९९।। **।।इति एकोनविंशोऽध्यायः।।**

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ विंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

प्रेतार्तिहृताभ्रौ दत्तौ मृत एकः।। वर्ण्याप तदम्बा विंशे तनुमध्याम्।।१।।

सिद्धयोगिपदं धृत्वा भक्त्या पदयोः शिरं स्थापयित्वा जयेति वदन्नाह। हे सिद्धमौले स्वामिन्, गन्धर्वपुरं गतोऽपि गुरुरुदुम्बरेऽदृश्यतया स्थितः। योगिनीभ्यो वरं दत्वा यातोऽप्यत्र वरद इति ब्रूषे। तर्हि गुरुस्थाने उदुम्बरे केन वरो लब्धस्तन्मेऽखिलं वद।।१-५।। इति श्रुत्वा सिद्ध आह। हे बाल, कृष्णातीरमाहात्म्यं शृणु। कति लीला वक्ष्यामि। सर्वदा यत्र प्रीत्या गुरोर्वासस्तत्र कल्पितफलावाप्तिर्यस्य कल्पद्रुर्नाम स किं न देयात्। तत्स्थानवर्णने मे सामर्थ्यं न। एकं निदर्शनं वक्ष्ये शृणु। शिरोलग्रामस्थगङ्गाधराख्यविप्रभार्या धर्मज्ञा सुशीला मृतपुत्राऽऽस। तस्याः पञ्च सुता जाता मृताश्च। देवाराधनव्रतोपवासादिना गहनपूर्वकर्मजं दुःखं न नष्टम्।।६-१३।। सा कर्मविपाकज्ञं विप्रं पुत्रशोकदं पूर्वकर्मापृच्छत्। विप्र आह। सन्तानक्षयकारणं प्राग्जन्मदोषं शृणु।।१४-१५।। योऽधमो गर्भपातकर्ता स जन्मान्तरे मृतपुत्रो भवति।।१६।। परद्रव्यहर्ताऽश्वगोहन्ताऽपि तथा। हे ब्राह्मणि, ते पूर्वजन्मदोषो दृश्यते तं शृणु। त्वया जन्मान्तरे शौनकगोत्रीयब्राह्मणस्य शतद्रव्यमपहृतम्। तेन याचितमपि न दत्तम्। स द्रव्यलोभेन त्वामुद्दिश्य महादोषामात्महत्यां कृत्वा पिशाचोऽभूत्स भ्रूणहा ते गर्भान्पातयतीदृक्ते कर्म तस्य भोगादेव क्षयो नान्यथा।।१७-२१।। इति श्रुत्वा खिन्नाऽनुतप्ता सा द्विजपादयोः शिरो निधाय विनयावनता सती सकरुणमाह। अहं चण्डाला पापिनी मयोल्बणं विषं भुक्तं तच्छमायौषधं देहि।।२२-२४।। विप्र आह। ब्रह्महत्या ते कृता। स मृतः पिशाचोऽभूत्। तस्यौर्ध्वदैहिकादि न जातम्। त्वया तद्धनं च हृतम्। तस्योद्धारान्त्यसंस्कारं कृत्वा तद्गोत्रीयब्राह्मणाय शतद्रव्यं देहि। तेन ते शुद्धिस्त्वं कृतार्था च भविष्यसि। कृष्णातीरे मासमुपवासं कुरु। कृष्णापञ्चगङ्गासङ्गमे यथाविधि स्नात्वोदुम्बरं कल्पतरुं भक्त्याऽर्चय।।२५-२९।। पापनाशतीर्थे सप्तवारं स्नात्वोदुम्बरमभिषिच्य पुनः काम्यतीर्थे विधिवत्स्नात्वा गुरुपादुके भक्त्याभिषिच्य भावेन मासमात्रं पूजय। पावने नृसिंहसरस्वतीस्थाने ते दोषा नश्यन्ति। पूर्णायुः पुत्रश्च भविष्यति। एवं मासं चरित्वा शतद्रव्यं च तद्गोत्राय दत्त्वा।।३०-३३।। मासमात्रमेवं प्रेतनाम्ना चरित्वौर्ध्वदेहिकं कुरु। ते कष्टं सफलं भवेत्। श्रीगुरुस्त्वां पायात्।।३४।। तत्स्मरणं कृत्वा पादुके पूजय। तेऽघनाशो भविष्यति प्रेतोद्धारश्च।।३५।। इति श्रुत्वा सा चिन्तान्विताऽऽह। शतद्रव्यं गृहे न कदापि लभ्येत। एकभावेनाहं मासमात्रं गुरुपूजोपवासादि करिष्ये। इति तन्निश्चयं ज्ञात्वा विप्र आह।।३६-३८।। यदि द्रव्यं नास्ति तर्हि निर्मलमनसा गुरुपादार्चनं कुरु। स पापं हरिष्यति। यस्योदुम्बरे निरन्तरं वासः स कृपालुस्ते दोषं वारयिष्यति। गुर्वाज्ञया यथाशक्ति द्रव्यव्ययं कुरु। इति श्रुत्वा तुष्टा सा गुरुस्थानं गत्वा।।३९-४२।। सङ्गमे पापनाशतीर्थे विधिवत्स्नात्वा सप्तवारं स्नापयित्वोदुम्बरं प्रदक्षिणीकृत्योपवासपराऽभजत्। ततस्तृतीये दिने स्वप्ने पिशाचस्तां भीषयित्वा प्राह। मे द्रव्यं देहि। न चेत्त्वां हन्मि। ते वंशं नाशयिष्यामि। व्यर्थोऽयं ते श्रमस्ते वंशे पुत्रोऽपि न भविष्यतीति तां हन्तुमागतः।।४३-४७।। तदा भीतोदुम्बरे श्रीगुरुं दृष्ट्वा तत्पृष्ठतो गता। तस्यै

अभयं दत्त्वा पिशाचं निवार्याह। कस्मादेनां हंसीति। पिशाच आह। अनया जन्मान्तरेऽर्थोऽपहृतस्ततो मया प्राणास्त्यक्ताः। स्वामिन्मच्छत्रुपक्षपातस्ते नोचितो यतस्त्वं तापसो यतिः।।४८-५१।। तच्छ्रुत्वा कुपितो गुरुराह। भक्तान्पीडयसि चेत्ते शासनं करिष्ये। येन सद्गतिस्तत्ते हितं वच्मि। तच्छृणोषि चेत्पिशाचत्वपरिहारो भविष्यति। नान्यथा। इयं शक्त्या यद्द्रव्यं दास्यति तन्नाङ्गीकरोषि चेन्न ते गतिः। इतो व्रज।।५२-५४।। वंशवृद्धिपूर्वकं भक्तं रक्षामि। पुनर्द्रष्टुमेष्यसि चेद्दण्ड्यो भविष्यसि। तच्छ्रुत्वा पिशाच आह। ते पदे दृष्टे। स्वामिन्मामुद्धर। क्षमस्व। यथोद्धारो मे भवेत्तथाऽङ्गीकरोमि। श्रीगुरुराह। भावेनेयं दाशाहिकीं क्रियां भक्त्या करिष्यति। तेन ते सद्गतिर्भविष्यतीति तमुक्त्वा ब्राह्मणीं प्राह। शक्त्याऽनुकूलद्रव्येण प्रेतनाम्ना क्रियां कुरु। ब्रह्महत्यादोषनाशस्ते शतायुःपुत्राश्च भविष्यन्ति।।५५-६०।। अष्टतीर्थस्नानपूर्वकं तन्नाम्ना क्रियां कृत्वा सप्ताहमुदुम्बरस्नपनं कुर्विति स्वप्ने दृष्ट्वोत्थाय चकिता सा पुनःपुनश्चिन्तयामास।।६१-६२।। श्रीगुर्वाज्ञया सोक्तवदाचरत्। ब्रह्महत्या नष्टा। पिशाचो मुक्तः। ततोऽन्यदिने स्वप्ने द्वौ नारिकेलौ दत्त्वा तामाह। व्रतं समाप्य पारणां कृत्वा फले भुङ्क्ष्व। सन्ततिवृद्धिर्भविष्यति न संशयः। ततः सा बुद्ध्वा पत्ये तन्निवेद्य तथैव चक्रे। स्पर्शस्पर्शाल्लोहं स्वर्णमिव गुरुप्रसादान्निर्मलाऽभूत्। ततो गुरुकृपया सा गर्भिणी भूत्वा पुत्रौ प्रासूत। विप्रो हृष्टः।।६३-६८।। ततो ज्येष्ठस्य व्रतबन्धं कर्तुं पितरौ मुदा सम्भारांश्चक्रतुः।।६९।। पूर्वेद्युर्व्याधिग्रस्तः कुमारोऽभूत्। अनेके रोगा अपि तेषु तीव्रो धनुर्वातः सद्यः प्राणहरोऽभूत्। तेनार्भकस्यावयवा वक्रीभूता। एवं त्रिदिनं पीडितो बालो रात्रौ मृत्युं गतः। माता बहु विलप्य शीर्षं उदरं च पाषाणेनाताडयत्। शश्वत्पुत्रगुणान्स्मृत्वा दुःखार्दिता भुवि देहं त्यक्त्वा मृतप्रायोऽभूत्।।७०-७६।। शवे पतित्वा तमालिङ्ग्य च मायावेष्टिता रुदती।।७७।। साऽऽह। रे सुत, त्वं मे प्राणरक्षक क्व यास्यसि। कथं ते मनं कठोरम्। रन्तुं क्व गतोऽसि। पयो मे स्रवते। प्राणप्रिय, शीघ्रमेहि।।७८-७९।। कथं ते गुणा विस्मर्यन्ते। त्वं नो निधिः। मञ्जुलं ते वाक्यं कथं विस्मर्यते। त्वादृशं पुत्रं नेक्षे। स्वप्ननिधिवत्त्वया भ्रान्तिर्दत्ता। ये पञ्च पुत्रा जातास्तेषु त्वं निधिः। गर्भाधानात्संतोषः सुतो भविष्यतीत्यानन्ददा दोहदा अप्यासन्। कदापि दुश्चित्ता नाभवम्। आनन्दोऽभूत्। सत्पुत्रो भविष्यतीति श्रीगुरुणा वरो दत्तः तेन वरदपिण्डोऽयमिति हृष्टाऽस्मि। प्रसवादारभ्य सौख्यं त्वया दत्तम्। प्रियोऽयमिति ते रक्षणं कृतम्। पुरा बहु दुःखं जातं तत्ते दर्शनान्नष्टम्। दुर्गात्तारयिष्यसीति विश्वासः कृतः।।८०-८७।। एवं दुःखितां विलपन्तीं तां वारयञ्जन आह।।८८।। यद्भावि तद्देवादीनां न मुञ्चति। धात्रा ललाटे लिखितं निश्चलम्। अवतारा अपि न स्थिराः। यूयं तु मर्त्या इति बोधिताऽपि दुःखिता साऽऽह। येनाश्वास्य फले दत्ते, भुवि यत्ख्यातिर्यस्योदुम्बरे वसतिस्तेन दत्तोऽयं सुतः मे वरो दत्तश्च तस्य वाचो मिथ्या किम्। मद्भक्त्या तस्यास्तु। पुत्रेण सहासूंस्त्यक्ष्ये इति गुरुं स्मृत्वाऽहाहो कथं मां पीडयसि। त्वद्वाक्येऽहं विश्वस्ता। त्वं सत्यवाक्सत्यसङ्कल्प इति। अद्य विश्वासघात कृतः। त्वं त्रिमूर्त्यवतारो नृसिंहसरस्वती। बिभीषणध्रुवाद्यैः कथं ते वचः सत्यं मन्तव्यम्। कथं मामुपेक्षसे। त्वामुद्दिश्य प्राणांस्त्यजामि।।८९-९७।। अत्र सेवकाः प्रदक्षिणा उदुम्बरार्चनं पुरश्चरणं च कुर्वते। तथा मयाऽपि कृतम्। फललब्ध्यालम्। ते स्थाने को विश्वासस्तेऽग्रे प्राणांस्त्यक्ष्ये।।९८-९९।। हे विश्वासघातक, ते कीर्तिः प्रसरतु। येऽग्रे भजन्ति तेषां कथं विश्वासः। ब्रह्मग्रहदोषार्ताऽहं पदलग्नाऽभवम्। मामङ्गीकृत्य जहास्ययं कस्ते धर्मः। व्याघ्रभीत्या शरणं गतां गां यथा यवनो हन्ति तथा मे जातम्। देवदर्शनार्थं देवालयं गतस्योपरि यथा देवालयः पतति तथा मे जातम्। किं वाच्यम्। मम पुत्रप्राणान्कथं न रक्षसि। हे गुरो, वदेत्यहोरात्रं शोकदुःखपीडिताऽभूत्। तदा

सूर्योऽप्युदितः।।१००-५।। द्विजा आगत्याहुः। व्यर्थं किं रोदिषि। तवेदं मौर्ख्यम्। यद्यद्यदा यदा भावि तदन्यथा कर्तुं कः शक्यः। नदीतटे संस्कर्तुं शवं देहि।।६-७।। इति श्रुत्वा रुदती साऽऽह। मया सहाग्निर्देयः। शवं न दास्ये। पुत्रेण साकं अग्निं प्रवेक्ष्यमीति शवं कुक्षौ बबन्ध। लोका ऊचुः। कर्कशेयं पुत्रेण सहात्मदानं क्व धर्मः न दृष्टो न श्रुतश्चात्महत्या महादोषेति नानाप्रकारैर्बोधयामासुः। सा निश्चयेनाह। प्राणांस्त्यक्ष्य इति। मध्याह्ने व्यतीतेऽपि शवं दग्धुं नादान्नापि गङ्गां ययौ। ग्रामे महानाकान्तोऽभूत्तदा ब्रह्मचारी तामेत्य ज्ञानमुपादिशत्।।८-१४।। चित्रं जातम्। ब्रह्मचारी तापसः सुज्ञानं बोधयामास। स न ब्रह्मचारी किन्तु रूपान्तरेण भक्तवत्सलः त्रीशः श्रीनृसिंहसरस्वत्येव। तल्लीलां सरस्वती अग्रतो वक्ष्यति। यच्छ्रवणाच्छतायुषो भविष्यन्ति।।११७।। ये भक्तिपूर्वकमिदं हि गुरोश्चरित्रं शृण्वन्ति वाऽपि च पठन्ति सदा पवित्रम्।। व्याधिः स्पृशत्यपि न कश्चन तच्छरीरं पूर्णायुरस्य च भवेत्खलु वच्मि सारम्।।११८।।

।।इति विंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ एकविंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

विद्युन्मालवत्संबन्धं पुत्रादेः सन् चोक्त्वा बोधम्।। सत्यै चक्रे जीवोपेतं सैकविंशेऽसौ तत्पोतम्।।१।।

सिद्ध आह। प्राप्तो ब्रह्मचारी खिन्नां मृतपुत्रां तत्त्वमाह। हे नारि, मौर्ख्याद्दुःखं मा कुरु। क्षणभङ्गुरेऽत्र संसारे कश्चिरं जीवी। क्व उत्पन्नः को मृतः कुत उत्पन्नः। दृश्यमानास्तु जलबुद्बुदा इव न स्थिराः।।२-३।। कर्मणा पञ्चभूतसंयोग एव व्यक्ता तनुः। कर्मक्षये नश्यति। मायापाशवेष्टिताः पञ्चभूतात्मकदेहं पुत्रादिकं मन्यते भ्रान्त्यैव। मायामयसत्त्वरजतमोगुणैर्मनो विक्रियते। तेन अहन्तादिभ्रमः। सत्त्वाद्देवत्वं रजसा मर्त्यत्वं तमसाऽधमत्वं यद्यत्कर्म सुकृतं दुष्कृतं वाऽऽचीर्णं तद्वशात्सुखं दुःखं च भोग्यम्। यथाऽस्य गुणवासना तदधीनानीन्द्रियादीनि चेष्टन्ते। मायापाशबद्धास्तद्वशाल्लिप्यन्ते सुखदुःखभाजश्च भवन्ति। संसारेऽत्र स्वकर्मगुणोद्भवा जीवाः स्वार्जितानुसारेण सुखदुःखभाजः। कल्पकोट्यायुषो देवा अपि कर्मणा न त्यक्ताः नृणां तु का कथा।।४-११।। जीवा देहाधीनाः। देहः कालाधीनो नानागुणकर्मभिर्देहधारी चेष्टते। यो देहधारी तस्यैते षड्विकाराः। कुतो देहस्य तत्सम्बन्धस्य च स्थैर्यम्। अत एव बुधा जन्ममरणाभ्यां न सुखदुःखभाजः। पूर्वमव्यक्तोऽपि गर्भगतो व्यक्तो भूत्वाऽन्तेऽव्यक्ततामेति। जलबुद्बुदा इव देहा न स्थिराः। गर्भगतोऽप्यस्थिरो ज्ञेयः। यावत्कर्मानुबन्धस्तावत्सुखदुःखफलभाक् ।।१७।। स्वार्जितभुक्कश्चिद्बाल्ये कश्चित्तारुण्येऽन्यत्र वा म्रियते।।१८।। मायापाशवेष्टिता मूढाः मातापितृसुतादिबुद्ध्या भ्रमन्ति। बाह्ये शुद्धोऽप्यन्तर्मलमूत्रमांसादियुग्रेतोरक्तोद्भवो देहः कथं शुचिः।।२०।। धात्रा ललाटे लिखितं शुभाशुभकर्म भोग्यम्। केऽपि कालं कर्मापि न जेष्यन्ति। अतो देहस्य नित्यत्वं नास्ति स्वप्नलब्धनिधिवत्। जागृतौ इन्द्रजालवत् देहस्य को बुधः स्थैर्यं मन्यते।।२३।। सम्बन्धस्य नित्यत्वं चेत्पूर्वजन्मनि त्वं कस्य का वाऽऽसीः। पूर्वं ते नृजन्म चेत्कस्य माता भार्या वाऽग्रतो वा कस्य का वा भविष्यसि वद। पञ्चभूतात्मको देहश्चर्मादिवेष्टितस्तस्य ममत्वेनायं वृथा शोकः। कः पुत्रो कुतो मृत्युर्व्यर्थं भ्रमाच्छोचसि। शास्त्रलौकिकरीतितः संस्कर्तुं शवं देहीति ब्रह्मचार्युक्तं सा प्रणताऽऽह।।२९।। स्वामिन्कृपया परमो धर्म उक्तः। मे मनो न स्थिरम्।।३०।। प्रारब्धं प्रमाणं चेत्किमर्थं भजनम्। स्पर्शस्पर्शात्स्वर्णत्वं लोहं न याति किम्। दैवहीनया मे ते पदे धृतेऽभयं दत्त्वा मामुपेक्षसे किम्। ज्वरार्ताय गृहङ्गतायागददानेन वैद्यः शं कुरुते। प्रभुः शरणागतमापन्नं सम्पन्नं करोति। मया त्रिमूर्तिर्गुरुराश्रितो। वरश्च दत्तः। सोऽन्यथा कथम्।।३१-३५।। आराधनाद्वरो दत्तः तद्वचसा स्थिरा निश्चिन्ताऽभवम्। एवं मयि स्थितायां स विश्वासघातकोऽभूत्। अहो मे मौर्ख्यम्। तदग्रे प्राणास्त्यक्ष्येऽयं देहस्तस्मै देयः तत्कीर्तिवृद्धिरस्तु।।३६-३८।। इति श्रुत्वा तद्भावं ज्ञात्वोपायमाह।।३९।। गुरौ तव निष्ठा। शतायुः पुत्रो लब्धः स दैवान्मृतश्चेद्यत्र कृष्णापञ्चनदीयोगे उदुम्बरे वरो लब्धस्तत्र देहं त्यज।।३९-४१।। इति श्रुत्वा शवं कुक्षौ बद्ध्वोदुम्बरमेत्य क्रुधा पादुकयोः शीर्षं ताडयामास। रक्तेन पादुकाभिषेकं चक्रे। सर्वशोकाधिकः पुत्रशोकः पित्रोः क्षयरोगः। सूर्योऽस्तं गतः। विप्राः शवं दग्धुमयाचन्त। नारण्ये नराः। निश्यत्र कथं स्थेयम्। कर्कशे, शवं

देहीत्युक्त्वाऽपि शवं न ददौ। पादुकयोः पतितोच्चै रुरोद। द्विजा ऊचुरत्र न स्थेयम्। अत्र तस्करबाधाऽतो गृहं यामोऽद्य स्नात्वोपोष्य प्रातरेत्य शवदाहः कार्यः।।४२-४९।। रात्रौ दुर्गन्धे उद्भूते कर्कशा शवं दास्यतीति ते ग्रामं ययुः। पितरौ तत्र स्थितौ। रात्रिर्जाता। द्विदिनं विनिद्रा सा शुशोच। निशीथे तस्याः स्वप्ने जटाभस्मभूषितो व्याघ्रचर्मधृग्रुद्राक्षयोगदण्डशूलधारी तां प्राह। कुतो ममोपरि आक्रोशसि। कुमारस्य किं जातम्। चिकित्सां कुर्वे। इत्युक्त्वाऽभयं दत्त्वाऽऽह। शवमुखं विदारय। वाय्वावेशान्मृतमपि जीवयामि।।५०-५६।। श्लो. प्राणो नामैष वायुः स बहिर्यातो मुहुर्मया। आनीय पूर्वन्न्यस्तस्त्यजातः शुचमङ्गने।।५७।। इति श्रुत्वा प्रबुद्धा भीता प्राह। कुतोऽसौ भ्रान्तिः। प्रेते जीवद्दशा कुतः।।५८।। यच्चिन्त्यते तत्स्वप्ने दृश्यते। क्व नृसिंहः क्वेयं भ्रान्तिः। न्यूनं नः प्रारब्धम्। देवः किं (न) करिष्यति। मया मौर्ख्याद्गुरूपरि दोषः स्थाप्यते। इति चिन्तया शवं दूरतः स्थापयामास। सर्वाङ्गमुष्णं जातम्। सर्वसन्धिषु चैतन्यं प्राप्तम्।।५९-६१।। शवाङ्गे भूतावेशोऽभवत्किमित्युक्त्वा भीता शवं दूरतोऽत्यजत्।।६२।। सर्वसन्धिषु चैतन्यं व्याप्तम्। बाल उत्थितः। स प्राहाम्ब, क्षुधितोऽस्मि। शीघ्रमन्नं देहीति रुदन्बालोऽम्बां प्राप। तस्याः द्वात्रिंशद्धाराभिः क्षीरमस्रवत्। सा तन्मुखे ददौ। पूर्वं सन्देहयुक्ताऽपि सा हृष्टा कटौ तमादाय भर्तारमेत्य सम्बोध्य तस्मै वृत्तं शशंस गुरोश्चरित्रम।।६३-६६।। ततो दम्पती उदुम्बरं प्रदक्षिणीकृत्य भक्त्या साष्टाङ्गं नत्वोचतुः।।६७।। भक्त्या समंत्रविधिना शमीपत्रपुष्पादिना (सं)पूज्य नीराज्य गीताद्यैस्तुष्ट्वा भावमयं तं भावेनानर्चतुः। तदा सूर्योदयोऽभूच्छवं दग्धुं विप्रा आगताः।।६८-७५।। ते तं जीवन्तं दृष्ट्वा विस्मिताः। तत्र सर्वे भुक्त्वा मुदा गृहं ययुः। एवं कामदः श्रीगुरुस्थानमहिमा। सर्वकथने ग्रन्थविस्तर इति संक्षेपतो माहात्म्यमुक्तम्। कृत्स्नं वक्तुं कः क्षमः। तत्र सर्वदा गुरुः स्थितः। तदाराधनात्कामपूर्तिः। वन्ध्या सुपुत्रं, दरिद्रः श्रियं, रोग्यारोग्यं लभेन्नात्रापमृत्युः। भक्त्या भजतां शीघ्रं कामसिद्धिर्न संशयः। अङ्गहीनः कुष्ठी वा पादुकार्चनात्सुवर्णदेही भवेत्। हृच्छूलगण्डमालापस्मारादयो नश्यन्ति। मन्दधीमूकबधिरा अपि शुभा भवन्ति। यत्रोदुम्बरे श्रीगुरुस्तत्र सर्वे पुरुषार्थाः सिद्ध्यन्ति।।७६-८५।। यस्य नाम कल्पद्रुमः तत्र सर्वकामसिद्धिः किं ब्रुवे। ख्यातो यो नृसिंहसरस्वती सर्वं तन्माहात्म्यं वक्तुं न क्षमः। शृण्वतां सर्वाभीष्टसिद्धिकृत्कामधुक्चरितम्।।८६-८८।। अत एव हि गङ्गाधरपुत्रः श्रोतॄन्सरस्वतीसंज्ञः।। प्रार्थयतेऽत्र परत्र च सिद्ध्यभिलाषुक इदं शृणोतु ज्ञः।।८९।।

।।इति एकविंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ द्वाविंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

गन्धर्वं प्राप्य भीमामरदुहितृयुतिं भिक्षार्थमथ गुरुर्गत्वादीनद्विजैको गतरदमहिषीं वन्ध्यां भरवहाम्।।
दृष्ट्वा दुग्धं ययाचे तदनु सुवदना स्त्रीः क्षीरमदुहदद्वाविंशेऽदात्पयोऽस्मै तदु वरदगुरुः पीत्वाऽगमदसौ।।१।।

नामधारकः सिद्धपदं धृत्वा हस्तौ सन्धाय विनयेनाह। भो योगीश सिद्ध जय। त्वं भक्ततारकोऽज्ञानध्वान्तज्योतिस्त्वम्। भवत्पदस्पर्शाज्ज्ञानं परमार्थलाभश्चाभूत्। गुरुर्ज्ञानमार्गदर्शकस्तारकः। परमपुरुषस्त्वं सिद्धयोगी।।१-४।। त्वया कामधुक् गुरुचरितं विस्तराच्छ्रावितं तेन न तृप्तिः। गुरौ गन्धर्वं गतेऽग्रतो वृत्तं कथयेति श्रुत्वा सिद्ध आह। त्वं (गुरु-)कृपाबालकोऽसि। ते मनो जीवितं च धन्यम्। त्वं पुण्यः पावनोऽसि। ते प्रश्नैर्मनस्तुष्टम्। चरितवर्णने आह्लादो वर्ततेऽत्रानन्तोऽनुपमो महिमा जातः। श्रीगुरुर्गुप्तरूपेणास्थात्। यत्रोदग्वाहिनी भीमामरजा कामधुगश्वत्थश्च तन्महास्थानं वरदम्।।५-११।। भीमामरजासङ्गमः प्रयागसमोऽत्राष्टतीर्थानि। अपारं तीर्थमाहात्म्यं तेऽग्रे कथयिष्ये।।१२-१३।। भक्तोद्धारस्तीर्थमहिमाख्यापकोऽत्रोवास। यत्पदे सर्वतीर्थानीति श्रुतिर्वक्ति तस्य तीर्थैः किम्। भक्ततारणार्थं तीर्थान्यटति। गुप्तः स्थितोऽप्यत्र प्रकटोऽभूत्। तत्क्रमेण कथयिष्ये। श्रीगुरोः प्राकट्ये कारणं शृणु। रम्ये सङ्गमे वसंस्त्रिमूर्त्यवतारो गुरुः प्रकटोऽभूत्। सहस्रकिरणोऽर्कः कथं गुप्तो भवेत्।।१४-१९।। ग्रामे वसन्प्रत्यहं मध्याह्ने भिक्षार्थं गन्धर्वपुरं याति। तद्ग्रामे शतं वेदविद्विप्रगृहाणि।।२०-२१।। तत्र कश्चिद्दरिद्रो विप्रः। तद्भार्या पतिव्रता ।।२२।। तद्गृहे वृद्धा दन्तहीना स्यूतनसा वन्ध्या महिषी। तां क्षारमृदाहरणार्थं कर्षकाः प्रत्यहं धनं दत्वा नयन्ति। तेन धनेन स वृत्तिं कल्पयति। श्रीगुरुस्तद्गृहं गतः। नित्यं श्रोत्रियविप्राणां नो गृहे षड्रसान्नं, तद्धित्वाऽयं यतिः कथं दरिद्रमन्दिरं यातीति विप्रा निन्दां चक्रुः। भक्तवत्सलोऽप्रपञ्चो गुरुर्हिताय तद्गृहं तीर्थीकरोति। यथा दुर्योधनेनाहूतोऽपि कृष्णः प्रीत्या विदुरालयं गतः। तथाऽस्यापि सात्त्विकोपरि कृपा। योऽत्र परत्र च भक्तेभ्यो गतिं दत्ते।।२३-३०।। भक्तकृपालोः श्रीमत्तैः किम्। यः क्षणाद्रङ्काय राज्यं राति। यस्मै कुप्येत स क्षणाद्भस्मसाद्भवेत्। दरिद्रायापि यः क्षितिमण्डलं दातुं क्षमः। धात्रा लिखितानि दुष्टाक्षराणि गुरुपदस्पर्शाद्भद्राणि भवन्ति। गुरुविरुदावलिवर्णनेऽहं न क्षमः। गुरुर्यद्गृहं गतस्तस्य सुपुण्यम्। एकदा महिषी केनापि न नीता। गृहे स्थिता। तद्गृहं वैशाखमासे मध्याह्ने भिक्षार्थं गुरुर्ययौ। विप्रो यायावरवृत्त्यर्थं गतो गृहे स्त्री स्थिता। साभिक्षां ददात्विति श्रुत्वा सहसाऽऽगत्य विनयावनता प्राह।।३१-३९।। वृत्त्यर्थं यातोऽपि पतिरुत्कृष्टधान्यं गृहीत्वा शीघ्रमायास्यति। तावद्भवन्त उपविशन्त्विति पीठं ददौ।।४०।। हसन्गुरूपविश्य स्त्रियं प्राह। भिक्षार्थं पयो न दास्यसि किम्। पतिरायास्यतीति कुतो भाषसे। ते द्वारीयं महिषी। क्षीरं देहि। इति श्रुत्वा साऽऽह। दन्तहीना वृद्धेयं महिषी वन्ध्या जन्मतोऽपि सकृद्गर्भं नाधात्। महिषवद्रक्षिता। स्यूतनसेयं भारार्थं योजिता। तल्लब्धद्रव्येणास्माकं योगक्षेमम् ।।।४१-४५।। गुरुः प्राह। मिथ्या मा वादीः। शीघ्रं महिषीं दुग्ध्वा पयो मे देहीति श्रुत्वा विश्वासं कृत्वा काष्ठपात्रमादाय दोग्धमुपाविशत्।।४६-४७।। गुरुवाक्यं कामधुङ्मत्वा तां

दुग्ध्वा घटद्वयमितं दुग्धं लेभे। अहो ईशोऽयं यद्वाक्यात्किमिदं चित्रं जातमिति विस्मिता सा गृहं नीत्वा पयोऽधिश्रित्य कोष्णं चक्रे। सङ्गमं यास्ये, शीघ्रं देहि, विलम्बं मा कुर्विति गुरुणोक्ता सा शीघ्रं तस्मै ददौ। श्रीगुरुः क्षीरं प्राश्य तुष्टो वरं दास्यन्नाह। सदाऽखण्डा लक्ष्मीस्ते गृहे तिष्ठतु।।४८-५३।। पुत्रपौत्रश्रीयुक्ता यूयं सदा निश्चिन्ता भवतेत्युक्त्वा सङ्गमं ययौ। ततो गृही विप्र एत्य गुरुमाहात्म्यं श्रुत्वा साश्चर्यं प्राहेश्वरोऽयमवतीर्णोऽस्मद्दृष्ट्या नरोऽप्ययं परमपूरुषः।।५४-५६।। इत्युक्त्वा भार्यामाह। सर्वाभीष्टार्थदो गुरुर्हृष्टः। दारिद्र्यं दोषाश्च नष्टाः। तद्दर्शनायाद्यागच्छेति स सस्त्रीकः सारार्तिको गुरुमेत्य भक्त्या (सं)पूज्य शश्वत्तुष्टाव। तुष्टो गुरुः पूर्ववद्वरं ददौ। लब्धवरः सस्त्रीको विप्रो गृहं गतः। स कन्यपुत्रयुक् पूर्णायुः सुधीश्चाभवत्। एवं यस्योपरि गुरोः कृपा तस्य कुतो दैन्यम्। सोऽष्टैश्वर्यभाग्भवेत्।।५७-६१।। अत एव सरस्वतीद्विजः स तु गङ्गाधरभूसुरात्मजः।। वदति श्रवणं करोत्विदं रसिको भाविक आशु दैन्यदम्।।६२।।

।।इति चूर्णिकायां द्वाविंशोऽध्यायः।।

श्रीगुरुसंहिताचूर्णिका

अथ त्रयोविंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

राट् त्रयोविंश आकर्ण्य सत्तद्यशः स्रग्विणीं स्वां पुरीमानयत्तद्वशः।।
श्रीगुरू रक्षसेऽदाद्गतिं राजवद्राजदत्ते मठे विश्ववासोऽवसत्।।१।।

सिद्धं आह नामधारकोऽग्रतः कथां कथय। सिद्ध आह। हे बाल, गुरुलीलां शृणु। यद्गृहे महिषी दुग्धा तेन गुणाः प्रकाशिताः।। १-२।। परेद्युर्द्रव्यं दत्त्वा भारवाहार्थं महिषीं नेतुमागतान्कृषिकान्विप्र आह। दुग्धदां महिषीं न दास्ये। पश्यतेदं घटद्वयं पूर्णं दुग्धमिति। ततस्ते विस्मिता आहुरहो दन्तहीना वन्ध्येयं गर्भिणी न जाता, न सूता, कथं दुग्धेति। तत्रत्यो राजाऽपि तच्छ्रुत्वा विप्रमेत्य नत्वा सर्वं वृत्तमादितः पप्रच्छ।।३-७।। विप्रस्तमाहात्रावतीर्ण ईश्वर एव नदीतीरेऽस्ति तस्यायं महिमा।।८।। स भिक्षार्थं नित्यं गृहमेति। गतेऽह्नि गृहे महिषीं दृष्टा। क्षीरं याचितम्। पत्न्या वन्ध्येयमित्युक्तः क्रुद्धो दोग्धुमादिशत्। तद्वाक्याद्घटद्वयं दुग्धं लब्धम्। इति श्रुत्वा राजा सत्वरं चतुरङ्गसैन्यस्त्रीपुत्रयुक्।।९-११।। लोलदङ्गो गुरुमेत्य भक्त्या गुरुं साष्टाङ्गं नत्वाऽऽह। हे जगद्गुरो, जगज्ज्योतिस्त्वं जय। त्रिमूर्तेस्ते महिमवर्णनेऽहं न शक्तः। मन्दधीर्मायावेष्टितोऽहं त्वां न जाने। त्वं तारकोऽसि। संसारान्मामुद्धरागाधेऽविद्याब्धौ मग्नं मां तारय। त्वं विश्वकर्ताऽतस्ते पदे धृते। नृरूप इत्यन्यदृष्ट्या प्रतीतोऽपि त्वमजः इच्छामात्रेणेदं सृजसि। ते महिमस्तुतौ मन्दधीरहं न शक्तः। त्वं व्योमकेशश्चिन्मात्रो गुरुः। इति भक्त्या स्तुत्वाऽनमत्। तुष्टः श्रीगुरुस्तमाश्वास्याहाहं तापसो यतिर्वने तिष्ठामि। त्वं किमर्थं ससम्भ्रमं कौतुकादागतोऽसि। आगमनकारणं वद।।१२-२०।। इत्युक्तो राजा नत्वाऽऽह। किं ते वनवासेन। त्वं जनतारको नारायणो भक्तोद्धारायावतीर्णोऽसि। यथा भक्तेच्छा तथा तांस्तोषयसि। वेदादिषु ते बिरुदालयः ख्याताः। हे भक्तवत्सल, ते कीर्तिः ख्याता।।२१-२३।। गाणगापुरस्थानं पावनं कुरु। ग्रामे वासं कृत्वाऽनुष्ठानं कुरु। मठं निर्माय दास्येऽस्मानुद्धरेति भक्त्या पदे दधौ। श्रीगुरुः स्वगतं प्राह। परेच्छया कञ्चित्कालं प्राकट्येनात्र स्थेयम्। भक्तान् त्रातुं राज्ञो मनोरथं पूरयितुं चेति निश्चित्याह। यथा ते चित्ते भक्तिस्तथा निश्चितं कुर्विति श्रुत्वा तुष्टो भूपो गुरुं सुखासने उपवेश्य।।२४-२९।। मृदङ्गादिरम्यनानावाद्यघोषैर्मङ्गलगीतैश्च पुरं निन्येऽश्वा गजाश्चाग्रे जग्मुः। यानस्थं भूषितं श्रीगुरुं सस्त्रीको राजाऽभजत्। द्विजा वेदघोषं चक्रुः। बन्दिनस्त्रिमूर्तेर्बिरुदावलीः उच्चैर्जगुः। एवं गुरौ ग्रामसमीपं नीते सारार्तिका नागरिकाः सम्मुखं प्रापुः। एवं महोत्सवेन राज्ञानीतो गुरुः पुरं विवेश। ग्रामपश्चिमे महोन्नतोऽश्वत्थस्तत्र प्राणिभयङ्करः करालो ब्रह्मराक्षसोऽभूत्तद्भयात्तत्र गृहाणि शून्यानि। स महाक्रूर आगतं श्रीगुरुं दृष्ट्वाऽश्वत्थादवरुह्य पदौ धृत्वा प्रार्थयन्नाह।।३०-३८।। ते दर्शनान्मे दोषाः नष्टाः। कृपालो मामुद्धर।।३९-४०।। गुरुस्तन्मूर्ध्नि करं दधौ। तदा स नृरूपो भूत्वा गुरुपदयोरपतत्।।४१।। गुरुस्तमाह। शीघ्रं सङ्गमे स्नानं कुरु। मुक्तो भविष्यसीति श्रुत्वा सङ्गमं गत्वा स्नात्वा ज्ञानी भूत्वा देहं त्यक्त्वा मुक्तः। तद्दृष्ट्वा लोका ऊचुः। सत्यमेवायं त्रिमूर्त्यवतार इति। ततस्तत्रैव कृते मठे श्रीगुरुस्तस्थौ। नृपश्रेष्ठो भक्त्याऽन्वहं नानोपचारैस्तमानर्चानेकवाद्यघोषैः गीतैश्च

तुष्टाव। सङ्गमेऽन्वहमनुष्ठातुं गुरौ गते नृपः सैन्येन सहानुयाति। मध्याह्ने मठं याते तथैव मुदा सम्मुखं याति।।४२-४८।। कदाचिच्छिबिकायां गुरुमुपवेश्य सैन्येन सहानुयातीति भक्तवत्सलो भक्ताधीनतयाऽस्थात्। एवं ग्रामान्तरेऽपि महिमा ख्यातोऽभूत्। लोका दर्शनार्थमेत्य विप्रभोजनं चक्रुः। कुमसीग्रामे तपस्वी मानसार्चनेन नृसिंहपूजकस्त्रिविक्रमभारती तच्छ्रुत्वाऽऽह। दाम्भिकोऽयं यतिः। ईदृक्चेष्टा तुर्याश्रमे योग्या किमिति। सर्वसाक्षी गुरुस्तत्कृतनिन्दां ज्ञातवान्। हे नामधारकाग्रतोऽपूर्वां कथां सावधानतयाऽवधारय।।५६।। सर्वाभीष्टप्रदं चित्तहारि श्रोतश्चित्रं साधुचेतोविहारि।। शृण्वेवं मे विप्रगङ्गाधरस्य पुत्रस्येयं प्रार्थनाऽर्थादरस्य।।५७।।

।।इति त्रयोविंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ चतुर्विंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

निन्दां कर्तृयतित्रविक्रमं प्राप्य श्रीगुरुराश्वदर्शयत्।। सैन्यं न्यासिवपुः क्षणं चतुर्विंशे यानग राजवद्विराट्।।१।।

नामधारक आह। हे सिद्धाग्रतः कथां कथय। सिद्ध आह। हे वत्साभिनवचरितं शृणु। कुमसीग्रामे त्रिविक्रमभारता निन्दतीति विश्वसाक्षी गुरू राज्ञे निवेद्याह। यत्र मन्निन्दकस्त्रिविक्रमस्तत्र कुमसीग्रामे गन्तव्यमिति श्रुत्वा हृष्टो राजा गुरुमलङ्कृत्यान्दोलिकायामुपवेश्य हस्त्यश्वादिभिर्नानावादित्रगीताभिश्च महासम्भ्रमेण कुमसीग्रामं निन्ये।।१-८।। तदा नित्यवन्नृसिंहमानसपूजारतोऽपि त्रिविक्रमश्चञ्चलचित्तो भूत्वा चिन्तयन्नाह। हे नृहरे मामुपेक्षसे किम्। तपो वृथा जातमिति। अत्रान्तरे मानसपूजायां नदीतीरस्थं नृहरिं दृष्ट्वा ययौ। तत्र दण्डधारि सर्वं सैन्यं दृष्ट्वा विस्मितोऽभूत्। साष्टाङ्गं प्रणम्य दण्डधारिणः सर्वान्यतिरूपान्दृष्ट्वाऽत्र के ज्येष्ठाः के वा कनिष्ठा इति ज्ञातुमक्षमो भ्रान्तः सन्नत्वाऽऽह। हे त्रिमूर्ते, त्वं जगद्गुरुर्ब्रह्माविष्णुशिवरूपोऽसि। मायाजालवेष्टितोऽहं ते रूपं न जाने। कृपां कृत्वा स्वरूपं मे दर्शय।।९-१७।। ते रूपविज्ञानं मे न। हे गुरुनाथ, दयस्व। चर्मदृष्ट्या त्वामीक्षितुं न क्षमः।।१८।। त्वं सर्वव्यापको नृसिंहोऽसि। सर्वेऽमी यतयो दर्शिताः। कस्याग्रे मुखं दर्शयामि। त्वं त्रिमूर्तिः। स्वामिन्स्वरूपं दर्शय। बहुकालं तपस्तप्तं, नृहरिर्मनसाऽर्चितस्तत्फलं त्विदम्। साक्षात्ते मूर्तिर्दृष्टा।।१९-२१।। त्वं विश्वतारकोऽस्मानुद्धर्तुमत्रावतीर्णोऽसि। चिन्मयं ते स्वरूपं दर्शयेति स्तुत्वा भक्त्या ननाम। तदा तुष्टो गुरुः स्वरूपेणास्थात्। तदा त्रिविक्रमश्चतुरङ्गसैन्यं तन्मध्ये श्रीगुरुं च व्यक्तं ददर्श। तं विस्मितं गुरुराह। दाम्भिकोऽयमिति यं निन्दसि स एवाहं त्वां प्रष्टुमागतोऽस्मि। त्वं लोके ख्यातोऽसि। तर्हि कथं दम्भः। विस्तरेण वद। ते चित्ते हरिर्वसति। स ते ज्ञापयिष्यति।।२२-२७।। इति श्रुत्वा नत्वा त्रिविक्रम आहाविद्यामयो मूढोऽस्मि। सद्गुरो, क्षमस्व। त्वं त्रिमूर्त्यवतारो विश्वतारको मायां प्रवर्तयसि। अज्ञानपटवेष्टितोऽहं मायाब्धौ निमग्नोऽस्मि। हे स्वामिन्मायामोहावृतोऽहं दिवान्धवत्परमार्थं त्वां न जाने। अद्य ज्योतिःस्वरूपस्त्वं लब्धोऽसि। हे देवराज, क्षमस्व। स्वदासमुद्धराविद्याब्धौ पतित्वा प्राक्तनोर्मिभिर्भ्रमन्परपारं नेक्षे। मां ज्ञाननावि समारोप्य हे कृपाब्धे स्वामिन्परपारं निजस्थानं नय। यस्योपरि ते कृपा तत्र दुःखं दोषाश्च कुतः। स कलिकालजित्परमार्थैक्यं याति।।२८-३५।। तथैवाद्य मे निजरूपं दर्शितम्। भक्तवत्सल श्रीगुरो, तेऽपारो महिमा। जगद्गुरो, जय। त्वं भवाब्धितारकस्त्रिमूर्त्यवतारोऽसि। त्वत्पददर्शनादनायासात्कृतार्थोऽस्मि। त्वं चिन्तामणिरनायासाद्भेदहर्ता। यथा गङ्गा सगरानुद्दधार, यथा विदुरगृहं विष्णुः स्वयं ययौ, तथा भक्तवत्सल त्वमागतोऽसि। ते महिमवर्णनेऽहं न क्षमः। इति बहुस्तोत्रैः स्तुतः श्रीगुरुर्भ्रमहृद्वरं दास्यन्नाह। त्वद्भक्त्या तुष्टोऽस्म्यत्रैव पुनरावृत्तिहीना सद्गतिस्तेऽस्तु। ते परार्थो लब्धस्त्वं परमात्म्यैक्यं गच्छसीति श्रीगुरुः प्रोक्त्वा तं तत्रैव स्थापयित्वा क्षणात्ससैन्यभूपेन गन्धर्वपुरं प्राप।।३६-४४।। एवं त्रिमूर्त्यवतारो नृरूपेण वर्ततेऽस्यापारमहिमा। अयं न परः पुरुष इति यो वदेत्स पापी सप्तजन्मपर्यन्तं यमलोके वसति। गुरुस्त्रिमूर्त्यात्मेति वेदादिषु प्रसिद्धः सतां मतोऽतो मद्वाक्याल्लोकस्तत्पदलग्नो भवतु। सुलभाऽमृतप्रपेयं ज्ञानीह कथामृतं पिबतु।।४५-४९।। गङ्गाधरस्य नन्दन एवं चरितं गुरोर्जगौ व्यासात्। भक्त्या शृण्वन्त्येषां पुमर्थलाभो भवेदनायासात्।।५०।। **।।इति चतुर्विंशोऽध्यायः।।**

श्रीगुरुसंहिताचूर्णिका

अथ पञ्चविंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

मत्तावाप्तौ श्रुतिनयविज्ञौ म्लेच्छाज्ञप्तौ द्विजविजिगीषू।। भिक्षुर्निन्ये श्रितशिबिकौ तौ गुर्वग्र्यं पञ्चसहितविंशे।।१।।

हे गुरुश्रेष्ठ सिद्ध महायोगिन् जय। त्वं सुबोधद इति मे निश्चयः ।।१।। यः कृपालुः सर्वेशोऽवतीर्य नृवद्भाति स ज्ञानिनां प्रत्यक्षः। तेन त्रिविक्रमाय रूपं दर्शितं श्रुतम्। ततोऽग्रतो जाता कथां वद। सिद्ध आहाखिला गुरुलीलाऽगम्या कालान्तरेणाप्यतः सङ्क्षेपाद्वच्मि।।२-४।। सर्वमहिमाख्याने ग्रन्थविस्तरो भवेदतः किञ्चित्सारं वच्मि। अग्रेऽपूर्वं जातम्। वैडूर्यनगरे कश्चिद्यवनराजो ब्रह्मद्वेषी क्रूरो हिंस्रोऽपि स्वाग्रे बलाद्विप्रानाहूयाह। विद्वद्भिरत्र सभायां सार्थवेदाः पठनीयाः।।५-८।। तेभ्यो धनं दास्ये। यो वेदार्थं वक्ति स मे मतो विशेषतः पूज्यश्चेति श्रुत्वा बुधा ऊचुर्वयं मन्दा न वेदज्ञा इति। मूढास्तु द्रव्यकाङ्क्षया म्लेच्छाग्रे वेदादिकं जगुः। यज्ञकाण्डार्थं श्रुत्वा दुर्बुद्धी राजाऽऽह। पशुघ्ना याज्ञिकाः कुतोऽस्मान्निन्दन्तीति विनिन्द्यार्थशंसिभ्यो धनं मानं च ददौ। तच्छ्रुत्वा द्रव्यलुब्धा यवनमेत्य वेदार्थमूचुः। एवं वेदशास्त्रनिपुणा अपि मूढा दुराचारा मत्ताः कलिप्रिया विप्रा म्लेच्छाग्रे वेदमाहुः। तत्रैकदा मन्दभाग्यौ वेदशास्त्रज्ञौ द्विजावेत्य।।९-१७।। ऊचतुरावां त्रिवेदज्ञौ शास्त्रज्ञौ चेति स्वयं स्वकीर्तिं शंसन्तावूचतुः। क्वापि भूतलेऽस्मत्तुल्या न दृष्टाः। आवां राष्ट्राण्यटन्ताविहागतौ। ते राष्ट्रे वादार्हा विप्राः सन्ति चेद्दर्शयावाभ्यां सह तेऽग्रे वादो भवत्विति श्रुत्वाऽभिमानी राजा स्वपुरस्थानाहूय। ये वादेनैतौ जेष्यन्ति तेभ्यो बहु धनं दास्ये।।१८-२२।। ते प्राहुरीदृग्योग्यताऽस्माकं न। क्वाप्यनयोः पराभवो न। अस्माकं मध्ये एतौ श्रेष्ठौ। आभ्यां मानं देहीत्युक्तो राजा मानं दत्वा तौ वस्त्राभरणैर्भूषयित्वा गजावारोह्य वाद्यघोषेण पुरे भ्रामयन्नाह।।२३-२६।। अहं राजा यवनानामिमौ ब्राह्मणानां राजानौ। म्लेच्छाग्रे वेदपाठकौ तौ आवां राजानाविति मन्यमानौ तद्राष्ट्रे महातमसाऽऽवृतौ विप्रान्दूषयामासतुः। एवं मदव्याप्तौ मत्तगजाविवान्धौ तौ कदाचिद्राजानमूचतुः। आवयोर्योग्यता भूयसी ख्यातैकोऽपि वादी न दृष्टोऽतो वृथा विद्याभ्यासः। विद्वद्भिर्वादः कार्य इतीच्छाऽत आज्ञापय। भूतले यत्र क्वापि वादी कश्चिदुपलभ्येत चेज्जेष्यावो न विवदिष्यति चेज्जयपत्रं ग्रहीष्यावः। राजोवाच तथा गत्वा विप्रपराभवः कार्यः। एवमाज्ञप्तौ तौ ग्रामाद्ग्रामान्तरं पर्यटन्तौ जयपत्राणि गृहीत्वा विचेरतुः। तत्समीपे स्थातुं कोऽपि न शशाक।।२७-३५।। एवं पर्यटन्तौ तौ दक्षिणदिशमेत्य कुमसीग्रामे वेदशास्त्रज्ञं कीर्तिमन्तं त्रिविक्रमं श्रुत्वाऽऽगत्योचुस्त्वं त्रिवेदज्ञोऽसि चेद्वादं कुरु, जयपत्रं वा देहीति।।३६-३९।। त्रिविक्रम आहैकमपि वेदं न जाने। वेदशास्त्रज्ञता चेत्कुतो मे वनवासः। वेदज्ञा हि राजपूज्या भवादृशा भोगान्भुञ्जते। न तथाविधोऽहमरण्यवासी तापसो भिक्षुः। मेऽभिमानो नष्टः। किं जयेनाजयेन वा। मया सह वादेन को लाभः। युवां तूत्कृष्टौ। विप्रावूचतुः। कोऽस्माञ्जेष्यति। भूमौ न दृष्टो नापि श्रुतः।।४०-४४।। समानोऽपि न दृष्टोऽतोऽसङ्ख्यानीमानि जयपत्राणि वीक्ष्य तथैव त्वयाऽपि देयं, वादो वा कार्य इति श्रुत्वाऽनेकप्रकारैर्बोधितावपि तौ पत्रं देहीत्यूचतुः।।४५-४७।। मत्तावन्धाविमौ विप्रौ शिक्षार्थं गन्धर्वपुरं नेतव्यौ। आभ्यां विप्रा धिक्कृता एवं विचार्याह। हे विप्रौ, गन्धर्वपुरमागच्छतम्। तत्र नो गुरुरास्ते। तदग्रे पत्रं दास्येऽथवा

भवत्कामोपशमो भविष्यतीत्युक्त्वा त्रिविक्रमो निर्ययौ। यानस्थौ मूढौ द्विजाधमौ तौ अनुजग्मुरतोऽल्पायुषौ जातौ। श्रीगुरोः स्थानं भीमातीरे त्रिविक्रम एत्य।।४८-५४।। भक्त्या श्रीगुरुं नत्वाऽऽह। हे व्योमकेशादिपुरुष कृपालो भक्तवत्सल भवाब्धितारक श्रीगुरो, जय। य ईशं त्वां न वेत्ति सोऽधो गमिष्यति। इति स्तुत्वाऽऽनन्दाश्रुपूर्णो रोमाञ्चितदेहो रुद्धकण्ठस्त्रिविक्रमो गुरुपदे शिरोऽधात्स तमुत्थाप्य दययाऽऽलिङ्ग्याहाद्यागमनकारणं किम्। किं ते कार्यं, सविस्तरं ब्रूहीति गुरुणा पृष्टस्त्रिविक्रम ऊचे। मदोन्मत्तावेतौ विप्रौ वादार्थमागत्योचतुः। आवां चतुर्वेदशास्त्रमीमांसानिपुणौ वादज्ञौ। कश्चिद्वादं न कुर्याच्चज्जयपत्रं गृह्णीव इति। बोधितावपि मे वाचो नाङ्गीचक्रतुरतोऽत्रानीतौ। भवान्गुरुतमः इति श्रुत्वा हसन्गुरुर्विप्रौ वीक्ष्योवाच ।।५५-६४।। किमर्थमायातौ, वादेन किं, वादेन विप्रपराभवाच्च को लाभः। जयोऽजयो वा नस्तुल्यः। तापसा यतयो वयम्। यतौ जिते वां कः पुरुषार्थलाभ इति श्रुत्वा तावूचतुः। भिक्षो, महीं पर्यटतोर्नौ वादी न लब्धः। केऽपि समीपं नागताः। पण्डिता जिताः। वादविमुखाः पत्राणीमानि ददुरीदृक्पत्रदाने कः प्रयासः। कुपितस्त्रिविक्रमो वामिहानयामास। युवयोः पाण्डित्याभिमानश्चेच्छीघ्रं वेदव्याकरणादिविवादः क्रियताम्। वयं चतुर्वेदविदोऽस्मत्तुल्याः क्वापि न। युवां भिक्षू वेदपारगौ किम्। श्रीगुरुराह। गर्वो वां सर्वथा माऽस्तु। दैत्यराक्षसा गर्वेणैव मृताः। बलेर्गर्वेण किं जातम्। बाणो रावणश्च गर्वेणैव मृतः।।६५-७३।। को वेदान्तं यायाद्ब्रह्माद्या अपि न विदुर्वृथाऽयं गर्वोऽनन्ता वेदाः। हितेच्छा चेत्सर्वदा गर्वस्त्याज्यः। वेदानन्त्ये युवां कथं चतुर्वेदज्ञौ। विप्रौ गर्वेणोचतुर्वयं साङ्गवेदज्ञाः। एवं अभिमानोक्त्या वदतोस्तयोर्गतिं शृणु।। तौ ब्राह्मणौ श्रीगुरुराह शाखा विभागशो वेदचतुष्टयस्य।। ताः श्रोतृवर्गाहमपि प्रवक्ष्ये गङ्गाधरार्भोऽजमवेक्ष्य लक्ष्ये ।।७४-७८।।

।।इति पञ्चविंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ षड्विंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

चित्रपदोक्तिभिरीशः षड्युतविंश उवाच।। वेदतदङ्गविशाखा यं प्रणमन्ति हि लेखाः।।१।।

श्रीगुरुर्ब्राह्मणौ प्राह। युक्त्या भ्रमो न कार्यः। ब्रह्मापि वेदान्तं न यातोऽनन्ता हि वेदाः। व्यासो नारायणोऽत्रावतीर्य वेदान्विस्तीर्य व्याससंज्ञां प्राप।.१-२।। तेनापि सम्पूर्णा नोक्तास्तस्य पैलो वैशम्पायनो जैमिनिः सुमन्तुरिति चत्वारः शिष्या वेदाभ्यासार्थं स्थिताः। एकैकवेदावसानं कल्पान्तेऽपि न लभ्यते। युवां कथं चतुर्वेदज्ञाः। पूर्वेऽप्यृषयो वेदान्तं नापुः। ब्रह्मकल्पत्रय भरद्वाजो ब्रह्मचर्येणाशेषवेदान्तं गन्तुमैच्छत्। स तपसा ब्रह्माणं प्रसादयामास। ब्रह्माऽऽह किमिच्छसीति। स आह प्रसन्नोऽसि चेत्सर्वान्वेदान्दर्शयाध्यापय चेति वरो देय इति पदे दधौ।।।३-११।। ब्रह्माऽऽहामितान्वेदान्कथं ग्रहीतुमिच्छसि। ते मेऽप्यगोचराः।।१२।। सावधानतया पश्य। शक्तोऽसि चेत्पठेत्युक्त्वा गिरिप्रायाञ्ज्योतिर्मयान्वेदराशीन्दर्शयामास। तान्सूर्याभांस्त्रीन्राशीन्वीक्ष्य स भीत आह। ब्रह्मचर्याश्रमे त्रयः कल्पा अतीताः। स्वल्पो वेदः पठित एतान्कदा पठिष्यामि। क्षमस्व। वेदान्तं द्रष्टुं न क्षमोऽहम्। यथाशक्ति पठामि। बहुवेदपठनेच्छयेहागमम्। त्वं शरणागतत्राता। यथेच्छसि तथा कुर्विति पदलग्नोऽभूत्प्रसन्नो ब्रह्मा तस्मै मुष्टित्रयमितं वेदं ददौ। त्रिवेदमन्त्रजालानि पृथक्कृत्य भरद्वाजः पठितुमारेभेऽद्यापि सोऽन्तं न गतः। वेदाश्चत्वारि वाचः ।।१३-२२।। पूर्णैकवेदपाठे महाप्रयासोऽत एव विभक्ताः स्वल्पाः शाखाः पठनीया इति श्रुत्वा शिष्या नत्वोचुः। हे नारायण गुरो, कृपां कुर्विति सकरुणं श्रुत्वा तुष्टो व्यासः पैलमाहूयाह। ध्यानपूर्वकं ऋग्वेदं पठेति। पैल आहास्य लक्षणं ध्यानं भेदांश्च कथय। शक्त्या भक्त्या धर्मेण पठिष्यामि। त्वं नः कृपानिधिः। कामधेनुः। व्यास आह। ऋग्वेदध्यानं वर्णाकृतिरूपशाखाश्च वच्मि। शृणु। ऋग्वेदस्यायुर्वेद उपवेदः, आत्रेयगोत्रं, ब्रह्मा देवता, गायत्री छन्दः, रक्तवर्णः, पद्मपत्रनेत्रं, विभक्तगलः।।२३-३२।। द्वयरत्निमात्राङ्गः, कुञ्चितश्मश्रुकेशोऽस्य भेदास्तु। चर्चा श्रावकश्चर्चकः श्रवणीयपारः क्रमपारः।।३३-३४।। जटा रथक्रमो दण्डक्रमश्चैतत्पारायणं पुण्यम्। आश्वलायनी, साङ्ख्यायनी, शाकला, बाष्कला, माण्डूक्याश्चेति पञ्च शाखा। एवं पैलाय व्यासेनर्ग्वेद उक्तः। अत्र कलौ चत्वारो वेदाः कथं पठिताः। कथं वां सर्वाध्ययनयोग्यता। एकं नारायणं व्यासं हित्वाऽष्टविकृतिसहितां साङ्गां एकां शाखां भूतलेऽत्र को वेद। व्यासेन पैलाय विस्तरादृग्वेद उक्तः ।।३५-४१।। व्यास आह। हे वैशम्पायन, यजुर्वेदं शृणु। धनुर्वेदोऽस्योपवेदः। भारद्वाजगोत्रं, रुद्रो देवता, त्रिष्टुप्छंदः, कृशदीर्घः, कपालधग्रम्यः, पद्मायतपत्रसुवर्णाक्षः पञ्चारत्निमितस्ताम्रवर्णो यजुर्वेदोऽस्य षडशीतिर्भेदास्तत्र चरकाः, आह्वरकाः, कठाः, प्राच्यकठाः, कपिष्ठलाः, शारायणीया, वारायणीया, वार्तान्तवेयाः, श्वेततरा, मैत्रायणीया इति दश।।४२-४८।। तत्र मैत्रायणीयानां मानवदुन्दुभैकेयवाराहहारिद्रवेय-।।४९-५०।। श्यामश्यामायणीया इति सप्त भेदाः। वाजसनेयानामष्टदश भेदाः। वाजसेनेयबौधेयजाबालकाण्वमाध्यन्दिन-शापेयतापनीयकापालपौण्ड्रवत्सावटिकपरमावटिकपाराशर्यवैनेयवैधेयौघेयगालव- बैजवकात्यायनीया इति। औख्याः काण्डिकेया इति द्वौ तैत्तिरीयभेदौ। तत्र

काण्डिकेयाः पञ्चधा।।५१-५९।। यज्ञादिज्ञापिका।।६०।। आपस्तम्बशाखा। सत्याषाढी बौधायनी हिरण्यकेश्यौखेयेति। प्रतिपदमनुपदच्छन्दोभाषाधर्ममीमांसा-न्यायतर्क इत्युपाङ्गानि। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि। (परि)शिष्टान्यष्टादश। मन्दधीनामनुग्रहार्थमेवं वेदराशेः शाखा उक्ताः। यथारुचि ग्राह्याः। वैशम्पायन आह। कृपया शाखाभेदतो यजुर्वेदविस्तारः कृतः ।।६१-७०।। का मूलशाखेति मम सन्देहं निवारय। व्यास आह। शिष्य, साधूक्तं शृणु। मुनयो मन्त्रब्राह्मणसंहिता यजुर्मूलं वदन्ति। अरणं ब्राह्मणकाण्डान्तर्गतं मूलं यज्ञादिकर्मोपयुक्तम्। यजुर्वेदस्यादितोऽभ्यासं कुरु। इति श्रुत्वा नत्वा वैशम्पायन आह। त्रीन्ग्रन्थान्कथयेति श्रुत्वा व्यासः सविस्तरं ग्रन्थत्रयं स्पष्टं कथयामास।।७१-७६।। श्रीगुरुर्विप्रौ प्राह। व्यासो जैमिनीमाहूय सामवेदमाह। गान्धर्वोऽस्योपवेदः। विष्णुर्देवता। जगतीछन्दः। काश्यपगोत्रम्।।७८-७९।। स्रग्वी शुद्धवस्त्रः शुचिः क्षमावान्दान्तश्चर्मदण्डधरः स्वर्णवर्णाक्षः श्वेतः षडरत्निमात्राङ्गः सामवेदोऽस्य हि सहस्रं शाखा एकं नारायणं हित्वा सर्वा ज्ञातुं कोऽपि न शक्तोऽथापि सप्तभेदाञ्छृणु। आसुरायणीयवार्तान्तवेयवासुरायणीय-प्राञ्जलिऋग्विधानप्राचीनयोग्यज्ञानयोग्या इति। राणायनीयशाट्यायनीयशाट्य- मुद्गलखल्वलमहाखल्वललाङ्गलकौथुम- गौतमजैमिनीया इति राणायनीयभेदाः ।।८०-८९।। श्रीगुरुराहादितः सामवेदं भुवि को जानीयात्। कथं युवां त्रिवेदज्ञौ ब्रूतम्। व्यासः सुमन्तवेऽथर्ववेदमाहोपवेदोऽस्यास्त्ररूपो बैजानगोत्रमिन्द्रो देवता त्रिष्टुप्छन्दः। चण्डस्तीक्ष्णः कृष्णवर्णः कामरूपी क्षुद्रकर्मा स्वभार्यातुष्टः सप्तारत्निप्रमाणोऽथर्वाऽस्य नव भेदाः। पैप्पलादान्तस्तौतौतब्रह्मदावलशौनकीय-देवर्षचरणविद्या इति। विधानकल्पनक्षत्रकल्पसंहिताकल्पशान्तिकल्प- ।।९०-९९।। विधिविधानकल्प इति अस्य पञ्च कल्पाः। एवं व्यासेन भाषितम्। पुराऽस्मिन्भारतखण्डे बहवो वर्णाश्रमाचाररतास्ततो वेदाः प्रतिष्ठिताः। कलियुगेऽस्मिंस्त्यक्तस्वकर्माणो ब्राह्मणाः स्युरतो वेदा लुप्ताः। कर्मभ्रष्टानां म्लेच्छाग्रे वेदपाठकानां मन्दधीनां मन्त्रसत्त्वं निर्गतम्।।१००-३।। पूर्वं विप्राणां देवत्वं महत्त्वं च ततो भूसुरा इति सर्वमान्या राजानोऽपि तत्पदसेवकाः। सर्वस्वं दत्तमपि तेऽस्पृहा नाङ्गीचक्रुः। वेदमन्त्रबलात्त्रिमूर्तयस्तदधीना इन्द्रादयो भीत्या नतास्तिष्ठन्ति। तेषां वाक्कल्पद्रुमकामधेनुवत्। तैरद्रिस्तृणीकृतस्तृण-मप्यद्रिवत्कृतम्।।४-७।। विष्णुर्देवप्रभावाद्विप्रान्स्वदैवतं मत्वाऽऽनर्च। देवाधीनं जगत्सर्वं मन्त्राधीनं च दैवतम्। ते मन्त्रा ब्राह्मणाधीना ब्राह्मणो मम देवता इति।।८-९।। अतः पूर्वं द्विजा महान्तोऽधुना स्वमार्गं त्यक्त्वा कुमार्गरता हीनसेवकाः सत्त्वहीनास्ते वेदविक्रयजीविनः। हीनानां पुरतो वेदपाठकानां मुखमपि नावलोक्यम्। ते ब्रह्मराक्षसा भवन्ति। एवं चतुर्वेदविस्तारः। भूपृष्ठे तं को वेद। प्रायो वेदा लुप्ताः। युवां तु कथं सर्ववेदज्ञौ। दुर्बुद्ध्या द्विजक्षोभात्को लाभः। केनायं दुर्बोधः कृतः। इतः शीघ्रं गच्छतम्। स्वयं स्वस्तुतिं कृत्वा जयपत्राणि प्रदर्श्य कुतस्त्रिविक्रमात्पत्रं याचितम्।।११०-१६।। मद्वाक्यं श्रुत्वा दुराग्रहं त्यक्त्वा व्यर्थं प्राणान्न त्यजतमिति दयालुगुरुवाक्यं श्रुत्वाऽपि तावूचतुः। पत्रं देहि। यदि वादो न, पत्रमपि न लब्धश्चेद्राजाग्रे कथं नौ मानः। सिद्ध आहैवं मदोन्मत्तयोः स्वहितमजानतोस्तयोर्मृत्युरुपागतः।।१७-१२०।। गङ्गाधरद्विजवरस्य सरस्वतीति ख्यातः सुतः सकलसम्मत ईशभक्तः।। श्रोतॄन्समाहिततया श्रवणाय नूनं लीलामृतस्य हि समर्थयते स्म भूयः।।१२१।।

।।इति षड्विंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ सप्तविंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

अपि क्व यदीक्षणादपराजिताः स बुरुडवदनाच्छ्रुतीः समवाचयत्।।
अनयदुभमिते द्विजौ च पिशाचतां सुगतिमथ गतौ च तौ द्विषडब्दतः।।१।।

सिद्धपदलग्नो नामधारको विनयेनाह। हे सिद्धयोगिंस्त्वं तारको ज्ञानप्रकाशाय स्वपदं दर्शितवानसि। गुरुणा वेदा विस्तरेणोक्तास्ततः किं जातं तद्वद।।१-३।। सिद्ध आहानुपमं माहात्म्यं शृणु। बहुप्रकारैर्बोधितावपि तौ जयपत्रं वादं वा दीयतामित्यूचतुः।।४-५।। इति श्रुत्वा गुरुः कुपित आह। यथेच्छसि तथा भविष्यतीति।।६।। सर्पोदरं दष्टुं यथा मूषक इच्छति, ज्वलद्दीपं वाऽत्तुं यथा पतङ्गो धावति, तथा तौ मदोन्मत्तौ गुरुं प्रभुमज्ञात्वा बलान्मर्तुमुद्युक्तौ। अत्रान्तरे दूरं यान्तं नरं दृष्ट्वा श्रीगुरुः शिष्यमाह तमुपाह्वयेति। शिष्यः शीघ्रं गत्वा तं श्रीगुरुसमीपमानयत्। श्रीगुरुस्तमाह कस्त्वं, का ते जातिः, क्व वा जन्म, कुतो गच्छसि वदेति। स आह। हीनो मातङ्गनामको नीचोऽहं ग्रामाद्बहिर्मे स्थानम्।।७-१२।। सर्वभूतकृपालोस्ते प्रश्नान्ममोद्धारोऽभूदिति दण्डवन्ननाम। परपुरुषो गुरुर्दयादृष्ट्या तं ददर्श। स्पर्शस्पर्शाल्लोहं स्वर्णमिव गुरुदृष्ट्या स पूतोऽभूत्। ततः शिष्यकरे दण्डं दत्वा सप्तरेखा लेखयामास। एकैकरेखामाक्रमस्वेति गुरुणोक्तो हीनस्तथाऽकरोत्।।१३-१६।। आद्यां गतं तं गुरुराह। क्व ते जन्मेति। स आह मैन्दोऽहमिति। द्वितीयां गत्वाहारण्यरक्षकः किरातजोऽहमिति। तृतीयां गतो लब्धस्मृतिराहाहं नदीतीरस्थो गङ्गापुत्र इति। तुर्यां गत्वाऽऽह। शूद्रजातीयोऽहं स्ववृत्तिगः स्वामिंस्त्वयाऽऽहूत आगतोऽस्मीति। पञ्चमीं गत्वाऽऽह सोमदत्ताख्यो वैश्योऽहमिति। षष्ठीं गत्वाऽऽह गोदावरीसंज्ञः क्षत्रियोऽहमिति।।१७-२१।। सप्तमीं गत्वाऽऽह। वेदशास्त्रज्ञोऽध्यापको-ऽग्रजातीयोऽहमिति। गुरुराह वेदशास्त्रज्ञोऽसि चेद्वादार्थमागतावेतौ वादेन पराजहीति। तद्देहेऽभिमन्त्रितं भस्म चिक्षेप। तदा तस्य ज्ञानप्रकाशोऽभूत्। मानससरो गतः काको हंस इव गुरुदृष्ट्या हीनोऽपि ज्ञानवानभूत्। नृसिंहसरस्वती त्रिमूर्त्यवतारः। तं नृदृष्ट्या यः पश्यति सोऽधो यायात्। स हीनोऽपि वेदशास्त्रज्ञो भूत्वा विदुषां शृण्वतां सर्वं पपाठ। वादार्थमागतौ तौ भीतौ हृच्छूलार्दितौ बधिरौ मूकवज्जातौ कम्पितौ तौ गुरुपादयोः पतित्वोचतुर्वां(र्नौ) का गतिः। गुरुद्रोहः कृतः। विप्रा धिक्कृताः। त्वं शिवोऽवतीर्णोऽसि। क्षमस्व।।२२-३०।। आवां तामसौ मायावेष्टितौ कुतो वां(नौ) ते स्वरूपज्ञानम्। त्वं लीलया तृणमप्यद्रीकरोषि। ते क्रुधाऽद्रिरपि भस्मसाद्भवेत्। त्वं त्रिजगद्गुरुः। सत्त्वरजतमोगुणैः स्थितिसृष्टिसंहारान्करोषि। त्वन्माहात्म्यवर्णने वां(नौ) न शक्तिः। हे शरणागतवरदावामुद्धरेति स्तुतो गुरुराह। युवाभ्यां त्रिविक्रमः क्षोभितोऽन्येऽपि दोषाः कृताः। द्विजा जीताश्चातो राक्षसौ भवतम्। स्वार्जितं पुण्यं पापं च स्वयं भोग्यम्। नान्यथा निष्कृतिः सद्गतिश्च। विप्रौ गुरुपदलग्नावूचतुः। कदाऽस्माद्दुःखार्णवादुद्धारः। श्रीगुरुः कृपयाऽऽह। द्वादशाब्दपर्यन्तं वो राक्षसत्वं भविष्यति।।३१-३९।। वां पश्चात्तापोऽभूत्ततः शान्तता भवेत्। भवत्पापशुद्धौ नारायणानुवाकं पठन्द्विज एष्यति। अग्रवाक्योच्चारणाद्वां सद्गतिर्भविष्यति।।४०-४२।। गङ्गास्थानं

वामुचितम्। तत्र गच्छतम्। इत्युक्तौ तौ जग्मतुः। ग्रामाद्बहिर्गत्वा हृच्छूलार्दितौ तौ नदीं गत्वा मृतौ। कृतकर्मणः फलं कोऽन्योऽनुभविष्यति। गुरुवचः सत्यम्। आत्मघातकौ तौ द्वादशाब्दान्राक्षसौ भूत्वा सद्गतिं गतौ। हे नामधारक ततो वृत्तां पावनीं कथां शृणु। हीनोऽपि विद्वान्भूत्वाऽतीतं सप्तमं जन्म स्मृत्वा विप्रोऽस्मीति निश्चित्य भक्त्या गुरुं प्रणम्य नम्र आह। हे सद्गुरो, त्वं मायान्धकारज्योतिः।।४३-४८।। पुरा विप्रोऽप्यहं कथं जातिहीनोऽभवम्। महामुने, त्रिकालज्ञ, स्वामिन्विस्तराद्वद। दुर्धिया मया जन्मान्तरे को दोषः कृतः। हे स्वामिन्पिनाकिन्कथयेति श्रुत्वा भगवान्स्फुटं प्राह। हे नामधारक, तत्ते वक्ष्ये। तद्गङ्गाधरसुतो वक्ष्यति। एतच्चरितामृतसेवी ज्ञानी पतितश्च पूतो भवेत्।। पुण्यां सुपावनकथां कथयिष्यतीनां या राति संश्रवणमात्रत एव कामान्।। धर्मार्थकामचतुर्विधमुक्तिदात्री त्रात्रीयमेनस उताखिलभव्यधात्री।।५३।।

।।इति सप्तविंशोऽध्यायः।।

श्रीगुरुसंहिताचूर्णिका

अथ अष्टाविंशोऽध्यायः

अध्यासारसंग्रहश्लोकोऽयम्-

अकथयदसावष्टाविंशे स्वकर्मविपाकतो विविधकुगतिं हीनत्वाप्तिं सचिह्नपुनर्भवम्।
तदघहतये प्रायश्चित्तं च कृच्छ्रजपादिकं पतितमकरोद्भूयोऽज्ञं सा मनोहारिणी कथा।।१।।

नामधारक आहाग्रतः कथां कथय। गुरुकथा स्वाद्वी अतो मे महोत्सवः। सिद्ध आह। शृणु। सर्वे दोषा नश्यन्ति ज्ञानमुदेष्यति।।१-२।। श्रीगुरुः पतितं प्राह। चण्डालयोनिप्रापकं कर्म शृणु। पुण्यपापाभ्यामूर्ध्वाधो गतिः कर्मविपाके उक्ता। ब्रह्मक्षत्रविशः शूद्राश्च दुराचाररताश्चेच्चण्डालतां यान्ति। शूद्रसङ्गाद्ब्राह्मण्यां जातश्चाण्डालः। एषा षोडशी जातिरियं मूलजातिर्ब्राह्मणादीनां तज्जातिप्रापकदोषाञ्छृणु। अनाचारो ब्राह्मणो हीनजातिगः। मातृपितृगुरुकुलस्त्रीत्यागी, कुलदेवं विहायान्यदेवपूजकोऽसत्यवक्ता, जीवहिंसारतः, कन्याक्रयी, मृषा दिव्यकृच्छ्रद्रहस्तेन भोक्ताऽश्वक्रयी।।३-१२।। शूद्रीरतो, दासीरतो, दैवपित्र्यकर्मणि क्रोधेन भाण्डादिभङ्क्ताऽरण्यदाहको, गोवत्सवियोगकृद्यश्च मातृपितृसुतांस्त्यक्त्वा विभक्तस्तिष्ठति, यो द्विजो वृषभमारुह्य गच्छति, शूद्रान्नभोक्ता, तीर्थादौ गत्वा श्राद्धाद्यकर्ता, तीर्थप्रतिग्रही, स्वधर्मरहितः, ईश्वरायासमर्प्य कपिलगोदुग्धपाता, शालग्रामार्थमपि तुलसीछेत्ता, सेवामकृत्वापि मातापित्रोररक्षिता, यश्चान्यां भार्यामुद्वाह्य पूर्वां परित्यजति, आयान्तमतिथिं ज्ञात्वाऽपि वेदमभ्यस्य चिरेणान्नदाता।।१३-२२।। योग्यब्राह्मणनिन्दकोऽयोग्यपूजकः, परवृत्तिहर्ता, वापीकूपतडागदेवलिङ्गपूजा- विप्रगृहभङ्गकृद्विश्वासघातकृत्स्वामिगुरुद्विषन्मित्रस्त्रीसङ्गकृद्द्वयोर्भार्ययोः सत्यो- रेकतरस्या वैषम्यकृदतिथये विलम्बेनान्नदाता, संध्याकाले भोक्ता, प्रतिश्रुतवचनस्यान्यथा कर्ता, संध्याकाले शयिता, भूपो दत्तभूम्यपहर्ता, वैश्वदेवकालेऽभ्यागताय दुष्टोत्तरदाता, दुरुक्त्यान्नदाता, गङ्गादितीर्थनिन्दकः, एकादश्यां भोक्ता, रणे स्वामिहापकः, व्रताहे पर्वसु दिवा च स्त्रीसङ्गकर्ता, शूद्राय वेदवक्ता।।२३-३१।। काले श्राद्धाकर्ता, स्वपुण्यख्यापकः, पान्थभेदकर्ता, प्रपाविघ्नकर्ता, नाडीज्ञानचिकित्साज्ञानेन विनौषधदाता, वेदमार्गहापको, जारणमारणमोहनादिकृत्, गुरुं नरबुद्ध्या द्रष्टा, देवान्तमभ्यर्च्यापि हरिहरनिन्दकः, निजकर्मत्याजकः, परकर्मरतः, शूद्राच्छ्वचर्मस्थगङ्गोदकवन्मन्त्रग्रहीता, श्राद्धे पिण्डाद्यदाता, विधवारतोऽतिथये गालिदाता, मातृपितृगुरुद्वेषी, यो गुरुनिन्दां श्रुत्वा हृष्यति, विप्रद्वेष्टा, ब्रह्मराक्षसयोनिभाग्वेदचर्चाकृत् एते सर्वे चण्डालयोनिगाः।३२-४१।। गुरुदेवभक्तोऽप्यन्यदेवनिन्दकोऽपस्मारदारिद्र्यभाक्। सुखार्थं पितरौ गुरुं च त्यक्त्वा यः पृथक्तिष्ठति स बुरडयोनिं गत्वा महारोगार्दितो भविष्यति। विप्रावमानकृद्वेददूषकः कर्मभ्रष्टश्च मूत्रकृच्छ्ररुजार्दितो भविष्यति। लोकमर्मस्पृग्वक्ता दुष्कृतवक्ता च भवान्तरे हृद्रोगी महाकष्टभाक्च। गर्भपातकर्त्री वन्ध्या वा भविष्यति। श्रावितमपि धर्मशास्त्रादि न शृणोति बह्वन्नादं निन्दति च स बधिरोऽन्धश्च। पतितमैत्रीकृद्गार्दभीं योनिमेष्यति। हीनादौषधसेवी च मृगयोनिम्। ब्रह्महा

क्षयरोगी, मद्यपः श्यावदन्तः, सुवर्णहर्ता कुनखी, गुरुतल्पगः कुष्ठी।।४२-५०।। अश्वगोहन्ताऽपुत्रः। यस्यानुतापो जातः स दोषहीनो भवेत्। पूर्वं पापभोगः पश्चाद्भवान्तरे रोगाः। विश्वासघातकृदन्नवैरी वान्तियुक्च। परसेवकं निष्काश्याङ्गीकरोति स बन्धनालयेघोरयातनाभाक्।।५१-५३।। परस्त्रीहर्ता दारुणनरकभाक्। ततो मतिहीनः सन् क्लेशाननुभविष्यति। सर्पहन्ता सर्पयोनिग इत्याद्या अनेकदोषाः। अथ चौर्यं शृणु। सुवर्णहर्ता प्रमेहव्याधियुक्। पुस्तकहर्ता जन्मान्धः। वस्त्रहर्ता पतितः श्वित्री च। गणद्रव्यहर्ता गण्डमालार्तः। श्वासाद्यातुरद्रव्यहर्ता कारायां बध्यत इति ब्रह्माण्डपुराणादिषूक्तम्। परद्रव्यहर्ता, परन्यासहर्ता, परद्वेष्टा च, जन्मान्तरेऽपुत्रः।।५४-५९।। अन्नहर्ता गुल्मी, धान्यहर्ता रक्तगात्रः, तैलहृद्दुर्गन्धी, ब्रह्मस्वपरस्त्रीहर्ता ब्रह्मराक्षसः, मौक्तिमाणिक्यादिहर्ता हीनजातिगः, पत्रफलादिहृत्खर्ज्वार्तः, रक्ताशी गोदेहरक्तपजन्तुः, कांस्यकार्पासलोहादिहृन्नरकगामी ततः श्वेतकुष्ठी च।।६०-६४।। देवद्रव्यहर्ता, देवकार्यघाती, अभक्ष्यभक्षकश्च, पाण्डुरोगी। परनिक्षेपहर्ता शोकभाक्। जन्मान्तरं शृणु। धनहृत् उष्ट्रः। फलहृद्वनचरः। जलहर्ता चातकः। गृहोपकरणहर्ता काकः। मधुहृन्मक्षिका। गोरसहृत्कुष्ठी।।६५-६८।। एवं सहस्रशो जन्मान्तरदा दोषाः। शान्तिपर्वोक्तं व्यभिचारफलं शृणु। परस्त्र्यालिङ्गनाज्जन्मशतं श्वयोनिः. ततोऽतिदुःखदं सर्पजन्म। कुदृष्ट्या परस्त्रीयोनिवीक्षकोऽन्धः। बन्धुस्त्रीगो गर्दभस्ततः सर्पश्च। जारकर्मकृन्नरकभागी। मित्रस्त्रीभुक् श्वा। मातुलस्त्रीभुगश्वः। दुर्बुद्ध्या परस्त्रीमुखद्रष्टा नेत्ररोगी। शूद्ररता विप्रस्त्री स शूद्रश्चोभौ कृमियोनिं गमिष्यतः।।६९-७५।। सदा शूद्रसंसर्गकृद्दुर्भगा। व्यभिचारिणी तु शुनी। एवं गुरुवाक्यं श्रुत्वा त्रिविक्रमोऽपृच्छत्।।७६-७७।। स्वामिन्धर्माः प्रकाशिताः। कदाचित्पापं जातं चेत्कथं तच्छान्तिः। गुरुराह। प्रायश्चित्तविधिः शृणु। पश्चात्तापश्चेत्पापं नश्यति। कृतं महापापं हृदि लग्नं चेत्कर्मविपाकोक्तं प्रायश्चित्तं शृणु। मुनिप्रोक्तानि तद्विधानानि बहूनि तत्र मे मतं शृणु। पूर्वं सदसि गोवृषनिष्क्रयरूपो ब्रह्मदण्डः स्थाप्यः। तत्र परिषदुक्तं शक्त्याऽब्दादि चरेत्, धेनवो वा देयास्तदभावे निष्कं तदर्धं पादो वा। स्थूलसूक्ष्मपापानुसारेण कृच्छ्रा अनुष्ठेयाः। अज्ञानकृतपापे प्रायश्चित्तो गुरुसेवा वा कार्या। सौम्यपापे गुञ्जामात्रस्वर्णदानम्। योजनपर्यन्तं तीर्थयात्रा। स्त्रीपुंसयोरेकतराघेऽपि द्वयोः प्रायश्चित्तम्।।७८-८६।। सामान्यपापनाशार्थं अयुतगायत्रीजपः, गायत्र्या सहस्रमाज्याहुतयो वा स्वशाखावेदपाठो वा कृच्छ्रसिद्धिः। कृच्छ्रसंख्यायां प्राजापत्यो ग्राह्यः। क्रमात्त्र्यहमेकभक्तनक्तायाचिताभुक्त्या द्वादशदिनैः प्राजापत्यः। श्रीगुरुस्मरणात्सामान्यपापक्षयः। मासमात्रं दिवा पञ्चदश रोत्रौ द्वादश ग्रासा भोज्याः। अयाचितान्नस्याष्टौ अष्टौ वाऽतः सौम्यपापनाशोऽञ्जलिमितं वाऽन्नं भोज्यम्। त्र्यहमुपवासस्त्र्यहं घृताशनं पापहन्तु। त्र्यहं घृतं, त्र्यहं दुग्धं, त्र्यहं वायुं च भक्षेद्वा।।८७-९५।। त्र्यहं क्षीराशनाद्वाऽघनाशोऽक्तस्य तिलाशनात्पापनाशः। शक्तश्चेत्पश्चात्तापेन पर्णकृच्छ्रं चरेत्सप्ताहम्। बिल्वाश्वत्थाब्जकुशदूर्वोदकाशनं पर्णकृच्छ्रः। चान्द्रायणं वा कार्यम्। शुक्ले कुक्कुटाण्डमितान्ग्रासान्वर्धयेत्।।९६-९९।। कृष्णे -हासयेदेवं पूर्णिमायां ग्रासाः पञ्चदशामायामुपोषणमिति।।१००।। सभायां सत्यमेवोक्त्वा तदुक्तं प्रायश्चित्तं भक्त्याऽऽचरणाच्छुद्धिः। तीर्थयात्रां शृणु। मासमात्रं वाराणसीस्नानात्सर्वपापक्षयः। तथाऽन्यतीर्थेऽगस्त्यवचनात्सहस्र- गायत्रीजपाच्छुद्धिः। सेतुबन्धे समुद्रस्नानाद्भ्रूणहत्याकृतघ्नादिपापनाशः।।१-४।। तत्र विधिवत्कोटिगायत्रीजपा- त्सुवर्णहर्तृशुद्धिः। अष्टलक्षगायत्रीजपाद्गुरु- तल्पगशुद्धिः। मन्त्रजपाच्छुद्धिः शृणु। पावमानीजपाद्ब्रह्महत्यानाशः। मासमात्रमिन्द्रमित्रमिति जपादपि तथा। शान्तिसूक्तात् सुरापानाद्यघलयः। शुनःशेपसूक्तजपात्स्वर्णहर्तृशुद्धिः। मासमात्रं हविष्याशी शान्तिकं पठेत्। ततो गुरुतल्पगादिशुद्धिः। पञ्चमहापापी पञ्चमासान्षण्मासान्वा मिताहारः पुंसूक्तं जपेत्ततः शुद्धिः। तथा भक्त्या

त्रिसुपर्णजपात्सर्वपापनाशः। भक्त्या नारायणोपनिषत्पाठात्पञ्चमहापापनाशः।।५-१३।। गायत्रीजपात्सर्वपाप- नाशोऽघमर्षणसूक्तजपाच्च सप्तजन्मपापनाशः। भक्त्या विष्णुसूक्तजपादपि तथा। अज्ञातदोषनाशार्थं पञ्चगव्यं पिबेदनुतापाच्छुद्धिः। पूर्वदिने उपोष्य नीलधेनोः प्रस्थमात्रं मूत्रं, कृष्णाया अङ्गुष्ठार्धं गोमयं, ताम्रायाः सप्तप्रस्थमितं क्षीरं, श्वेतायाः प्रस्थत्रयमितं दधि, कपिलायाः प्रस्थमितं घृतं, तावद्दर्भोदकं च पात्रे एकीकृत्येरावतीदंविष्णुर्मानस्तोके प्रजापत एभिर्मन्त्रैः गायत्र्या सप्रणवव्याहृतिभिश्च हुत्वा।।१४-२३।। अनुतप्तो 'यत्त्वगस्थि' इत्यनेन पिबेच्छुद्धो भवेत्। उक्तवर्णगोऽलाभे दर्शनाद्दोषहर्त्र्या उत्तमायाः कपिलायाः पञ्चगव्यं ग्राह्यम्।।२४-२५।। ब्रह्महा, सुरापी, गुरुतल्पगः, स्वर्णस्तेयी चेति सर्वपापिभ्योऽपि महापातकिनस्तत्संसर्गी च तत्समाः। उपपापलघुपापेभ्य एतानि पञ्चमहापापानि दुष्परिहाराणि। पापं प्रायश्चित्तेन शोधयेत्। सद्गुर्वनुग्रहान्महापापलयः। स्वधर्मनिरतवेदज्ञविप्रानुग्रहादपि शुद्धिः। इति श्रीगुरूक्तं श्रुत्वा विप्रास्तुष्टा ऊचुर्ज्ञानं प्रकाशितमिति। श्रीगुरुः पतितं प्राह। पूर्वं मातापितृद्वेषाच्चाण्डालोऽभूः।।२५-३२।। अथ शुद्धिं शृणु। मासमात्रं सङ्गमस्नानाद्दोषान्हित्वा पुनर्विप्रो भविष्यसि। स आह। स्वामिंस्ते दर्शनाच्छुद्धोऽस्मि। यथा मानससरोगतः काको हंसो भवति तथा ते दृष्ट्या पूतोऽस्मि न संशयः। स्वामिन् शरणागततारकातो मां पाहि। स्पर्शस्पर्शाल्लोहं स्वर्णं भूत्वा पुनर्लोहं भवति किम्। स्वामिन् जगद्गुरो, त्वद्दृष्ट्या पूतोऽस्मि। सर्वज्ञ प्रभो, ज्ञानिनं मामभिमन्त्र्य विप्रैर्योजयेति श्रुत्वा गुरुर्हसन्नाह। हीनं त्वां विप्र इति को वदेत्। हीनरक्तरेतोयोगाज्जातस्तत्र वृद्धश्च कथं विप्रः स्यादिदं ते वाक्यं निन्दास्पदम्। पुरा गाधिराजपुत्रो विश्वामित्र आत्मानं ब्रह्मर्षिं कर्तुमुद्यतः ।।३३-४०।। अनेकवर्षक्लेशात् तपोबलाच्च स्वस्य ब्रह्मर्षित्वं चिकीर्षुः समर्था यूयं मे ब्रह्मर्षित्वं दातुमर्हथेतीन्द्रादिदेवान्प्रार्थयामास। तैरुक्तं नो मताद्वसिष्ठगुरोस्तत्स्वीकुर्विति। तथेति स वसिष्ठमेत्याह। बहुकालं तपस्तप्तं मां ब्रह्मर्षिं कुरु। वसिष्ठ आह। हे क्षत्रियापवित्र विश्वामित्रेदं देहं त्यक्त्वा विप्रकुले भूत्वा व्रतबन्धाद्गायत्रीं लब्ध्वा मान्यो ब्रह्मर्षिर्भविष्यसि। यत्नादपि नाधुनेति श्रुत्वा स कुपितो वसिष्ठस्य पुत्रशतं जघान। तथाऽपि वसिष्ठो न तमोऽभजन्नापि ब्रह्मर्षित्वं ददौ। ततः कोपाद्वसिष्ठं हन्तुं पर्वतं गृहीत्वा यावत्प्रवृत्तः।।४१-४९।। तावद्विवेकी भूत्वाऽऽह। वसिष्ठे हते न मां कोऽपि ब्रह्मर्षे वदेदेतदनुसारिणो देवर्षयोऽतोऽस्य हनने महादोष इति गिरिं त्यक्त्वाऽनुतप्तो वसिष्ठं शरणं ययौ। स राजर्षे इति प्राह। तुष्टो विश्वामित्र आह। ते वचः सत्यम्। ब्रह्मर्षित्वं मे देहि। वसिष्ठ आह। सूर्यकिरणैस्तपसाऽमुं देहं दग्ध्वा नूत्नवदन्यं दर्शय। स तथेत्यङ्गीकृत्य तपसा सूर्यकिरणैः देहं दग्ध्वाऽनुष्ठानसामर्थ्यान्नूत्नं दिव्यदेहं दधौ। ततः पूजितं ज्ञं विश्वामित्रं ब्रह्मर्षिं लोको भुवने मेने। तत्र का कथाऽनुतप्तत्वात्त्वं वर्ष्मेदं त्यक्त्वा जन्मान्तरे विप्रो भविष्यसि।।५०-५९।। इतो गच्छेति पुनः पुनरुक्तोऽपि लब्धसुखः स नीचत्वं नैच्छत्। लब्धं धनं रङ्कस्त्यक्तुमिच्छति किम्? क्षुधिता गौर्दैवाल्लब्धं सुघासं त्यक्त्वा मनसाऽपि गन्तुमिच्छेत्किम्? तथा स लब्धज्ञानः स्वगृहं गन्तुं नैच्छत्। आत्मानं विप्रं मेने। तदा ससुता भार्याऽऽगत्योवाचोन्मत्तोऽयमभवत्किम्? मा स्पृशेति तां निवार्य क्रुधा ताडयितुं प्रवृत्तः। दुःखिता सा गुरुं नत्वाऽऽह। मां त्यक्तुमिच्छतीमं बोधय। कन्याः पुत्राश्च मे बहवस्तान्को रक्षेन्मा त्यक्त्वा क्वायं याति। नोपदेक्ष्यसि चेत्प्राणांस्त्यक्ष्ये।।६०-६८।। इति श्रुत्वा गुरुर्हसंस्तमाहूय धर्मतत्त्वमाह। मे वचः श्रुत्वा गृहं गच्छ। स्त्रीपुत्रक्षोभात्कथं ते सद्गतिः। अत्रेन्द्रियतोषं कृत्वा धर्ममयो भूत्वा भवाब्धेस्तरसि। प्रागेव स्त्रीर्न विवाह्या। विवाह्य त्यागे महादोषः। सूर्यादिसाक्षितस्त्वयैषाङ्गीकृताऽस्यास्त्यागे ते दोषो गतिश्च नेत्युक्तो नत्वा पतित आह। ज्ञानी भूत्वा कथं हीनत्वं यास्ये। श्रीगुरुः स्वगतमाहास्य देहस्थभस्मक्षालनाज्ज्ञानं नश्येदिति विचार्याह। शीघ्रं धनलुब्धमन्वेष्यानयेत्युक्तः शिष्यो वाणिज्यरतं द्विजमानयत्।।६९-७७।। गुरुस्तमाह।

पतितं स्नापय। ततोऽसौ नष्टज्ञानः संसारासक्तो भविष्यतीत्युक्तः स घटाम्बुना तं स्नापयामास। ततो विभूतिक्षालनात्सर्वं विस्मृत्य भ्रान्तः स्त्रीपुत्रमुखं विलोक्य तानालिङ्ग्याह। क्षणं भ्रान्तोऽभवम्। किमर्थं यूयमागताः। किं कार्यं ब्रूत। एवं विस्मितः स तैः सह गृहं गत्वा वृत्तं श्रुत्वा चकितोऽभूत्।।७८-८२।। विस्मिताः सकौतुका लोका ऊचुश्चित्रमिदमिति। त्रिविक्रम आह। गुरो, मे महासंशयः। कृपां कृत्वा शृणु। जातिहीनायापि दत्तं ज्ञानं क्षणात्कथं नष्टम् ।।८३-८६।। तन्मे शसेति पदे दधौ। गुरुः प्राह। भस्म क्षिप्त्वा ज्ञानं दत्तं तत्क्षालनान्नष्टम्। एवं तन्महिमा। शिवोऽपि तद्धत्ते। महात्मकरस्पर्शात्तत्प्रपञ्चं ब्रह्म कुर्यात्। तच्छ्रुत्वा त्रिविक्रम आह। भस्ममाहात्म्यं वद। श्रीगुरुस्तन्माहात्म्याहेति सिद्धो विस्तरान्नामधारकमाह ।।८७-९१।। कथाऽग्रतः पावनपावनी सा सिद्धेन चोक्ताऽपि सरस्वती ताम्।। स्वभाषया वक्ति तया प्रसीदेद्द्रव्यक्रियाकारकचेतनात्मा ।।१९२।।

।।इति अष्टाविंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ एकोनत्रिंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

नवद्वययुतेन तेन मुनिना स पृष्टोऽवदद्विभूतिमहिमानमानतपदास्त्रपायावदत्।।
कुमारहरवादमप्यथ स वामदेवो ददौ गतिं भसितधारणेन विधिवच्च पृथ्वीवरः।।१।।

नामधारक आह। हे सिद्ध, गुरुणा पुरा त्रिविक्रमायोक्तं श्रुतम्। हे कृपाब्धे, ततो वृत्तां कथां कथय। गुरुचरितं श्रोतुमुत्सहे। इति श्रुत्वा सिद्धो गुरूक्तं भस्ममाहात्म्यं वक्तुमारेभे। गुरुस्त्रिविक्रममाह। सत्पृष्टम्। सावधानेन शृणु। पुरा कृतयुगे वामदेवयोगी मुक्तसङ्गः स्वैरं चचार। शुद्धो बुद्धो ज्ञोऽसङ्गो कामादिहीनो मुक्तस्तुष्टोऽस्पृहो मौनी जटी भस्मलिप्तो वल्कलाजिनधृक्स भ्रमन्यत्र न नृसंचारस्तत्क्रौञ्चवनं प्राप।।१-८।। तत्र घोरः क्रूरो नृपश्वादिभक्षको ब्रह्मराक्षसोऽभूत् तत्रागतं महामुनिं दृष्ट्वा क्षुधितः शीघ्रं तमत्तुं दन्तान्खादयित्वा मुखं प्रसार्यात्तुं प्राप। निःशङ्को ज्ञानी वामदेवः प्राप्तममुं दृष्ट्वाऽपि न चचाल। समीचीनो ग्रासो लब्ध इत्यभ्युत्पत्य तं चकर्ष। मुन्यङ्गस्पर्शाज्ज्ञानी भूत्वा पूर्वजातिस्मरोऽभूत्। स्पर्शस्पर्शाल्लोहं स्वर्णमिव, काको मानससरोगतो हंस इव, जम्बूनदीं गता मृत्स्वर्णमिव पापोऽपि स मुनिस्पर्शाद्विपापोऽभूत्।।९-१७।। अन्यत्सर्वं सुलभं सद्दर्शनं दुर्लभं यत्सद्यः पुनाति। नृगजादिभक्षणाद्यस्य क्षुन्न शान्ताऽब्धिपानातृट् च, स पापिष्टः मुनिस्पर्शात्क्षुत्तृट्क्रोधादिभिः शान्तो ज्ञानी सन्मुनिपदे धृत्वाऽऽह। त्राहि त्राहि। गुरो, त्वं साक्षादीशः। घोरसंसारमग्नं मां तारय। दातः कृपाब्धे, मामुद्धर। ते दृष्ट्या मे दोषा नष्टाः। कृपालो, मे दुराशयः पावितः। एवं भक्त्या स्तुतः कृपालुर्वामदेवमुनिस्तं प्राह। क्व ते जन्म। नृहीने घोरेऽरण्ये कुतस्तिष्ठसि।।१८-२६।। इति श्रुत्वा विनतो राक्षस आह। ते कृपयाऽनेकजन्मज्ञानं जातम्। तत्र पूर्वं पञ्चविंशं जन्मोत्कृष्टं स्मर्यते। यवनदेशे दुर्जयाख्यो राजाऽहं दुराचारोऽभवम्। बहुलोका हिंसिताः। प्रजाः पीडिताः। मदोन्मत्तत्वेनानेकस्त्रियो वृताः। बलादन्याश्चानीताः। प्रत्यहमेकैका भुक्ता त्यक्ता सा पुनर्न दृष्टा। एकस्मिन्नेव दिवसे भुक्त्वाऽन्तर्गृहे रुद्धास्ताः क्रुद्धा मह्यं शापं ददुः।।२७-३४।। सर्वभूपाञ्जित्वा बलात्तत्स्त्रिय आनीय सकृद्भुक्त्वा रुद्धाः।।३५।। रूपवतीः स्त्रियो बलाद्द्रव्यदानेन वाऽऽनीताः। मद्देशीयविप्रा देशान्तरं गतास्ततोऽपि बलात्ततस्त्रिय आनीय भुक्ताः। साध्वीसुवासिनीरजस्वला अविवाहितकन्याश्चाहृताः। एवं मदात्सर्वदेशा उपद्रुताः। विप्राणां त्रिशतानि, नृपाणां चतुःशता, विशां षट्शतानि, शूद्राणां सहस्त्रं, चण्डालानां शतं, पुलिन्दानां सहस्त्रं, मैन्दानां पञ्चशतानि, रजकाणां चतुःशतानि स्त्रियोऽमिता वाराङ्गनाश्च मत्तेन मया भुक्ताः अथापि कुबुद्धेर्मे न तृप्तिः। आभिर्मद्यपस्य विषयासक्तस्य मे कामशान्तिर्नाभूत्। एवं वर्तमानस्य मे क्षयोऽभूत्।।२६-४४।। परैर्ऋद्धं राष्ट्रं हृतम्। ततो मृतं मां यमदूता यमपुरं नीत्वा घोरे नरकेऽक्षिपन्। दशवारं दिव्यवर्षसहस्राणि पितृभिः सह दारुणा नरकयातना भुक्ता। ततो दिव्यवर्षशतं विरूपं सहस्रशिश्नाङ्गं क्षुत्क्षामं प्रेतजन्माभूत्पुनर्यमपथं गत्वा दुर्गतिर्भुक्ता। द्वितीयं जीवहिंसकं व्याघ्रजन्माभूत्। तृतीयमाजगरम्। चतुर्थं सालावृकम्। पञ्चमं ग्रामवाराहम्। षष्ठं शरठजन्म। सप्तमं श्वजन्म। अष्टमं जम्बूकजन्म। नवमं हारिणम्।

दशमं शशकम्। एकादशं वानरम्। द्वादशं चिल्लजन्म। त्रयोदशं माण्डूकम्। चतुर्दशं वायसम्। पञ्चदशं ऋक्षजन्म। षोडशमारण्यकुक्कुटम्।।४४-५३।। सप्तदशं गार्दभमन्धम्। अष्टादशं मार्जारम्। ततो मण्डूकजन्म। विंशं वायसम्। एकविंशं मत्स्यम्। द्वाविंशं मूषकम्। त्रयोविंशं दिवान्धजन्म। चतुर्विंशं कौञ्जरम्। पञ्चविंशेऽस्मिन्ब्रह्मराक्षसोऽभवम्। अहोरात्रं कष्टार्दितः निराहारोऽरण्यवासी दुःखितस्त्वां दृष्ट्वाऽत्तुं वेगादेत्य ते स्पर्शाज्जातिस्मरोऽभवम्। स्वामिन्सहस्रजन्मपापं नष्टम्। इतःपरं जन्म माऽस्तु। घोरसंसारात्समुद्धर। मुने, त्वं तारको दैवात्सङ्गतोऽसि। यत्स्पर्शाज्ज्ञानं जातमीदृक्ते पदमाहात्म्यम्।।५४-६२।। भगवंस्तत्वं सामान्यनृवन्न। तेऽङ्गमाहात्म्यं दयया कथय। पापो दुराचारोऽपि तेऽङ्गस्पर्शाज्ज्ञानी अभवम्। कोऽयं महिमा। स्वामिंस्त्वमीशोऽस्मानुद्धर्तुं प्राप्तोऽसीति भाति। तुष्टो वामदेव आह। मेऽङ्गस्थभस्ममहिमाऽयम्। सर्वाङ्गं भस्मलिप्तम्। किञ्चित्ते देहे लग्नं तेनानेकजन्मज्ञापकं ज्ञानं जातम्। भस्ममहिमा ब्रह्मादीनामगोचरः। यच्छिवेनाङ्गभूषणं कृतं तन्माहात्म्यं नृणां वक्तुमशक्यम्। शिव एव तद्वेत्ति। अपारं भस्ममाहात्म्यमत्रैकं निदर्शनं शृणु। कश्चित्कर्मभ्रष्टो दुराचारो द्राविडविप्रः शूद्रीरतोऽभूत्।।६३-७२।। स विप्रैर्बहिष्कृतः बान्धवैः पितृभ्यां च हापितोऽपि शूद्रीं वृत्वा तयाऽरीरमत्स पापो दुराचारश्चौर्येणोदरंभरिरेकदा निशि व्यभिचारार्थमुद्युक्तोऽभूत्स शूद्रेण हत्वा ग्रामाद्बहिर्घोरस्थाने निष्कासितः। तं मृतप्रायं दृष्ट्वा भस्मराशिस्थो क्षुधितः श्वा विलोक्यात्तुं प्राप।।७३-७७।। श्वकुक्षिलग्नं भस्म म्रियमाणस्य मूर्धवक्षोबाहुषु लग्नम्।।७८।। मृत्युसमये यमदूता एत्य तं बद्ध्वा सन्ताड्य यमलोकं नेतुमुद्युक्तास्तावच्छिवदूता दृष्ट्वैत्य भस्मलिप्तं कैलासार्हं के क्व नयन्तीति कुपिताः शिवपुरमस्य योग्यं न दुर्गतिरिति तान्हन्तुं प्रवृत्ताः।।७९-८१।। तदा ते तं त्यक्त्वा भीता यममेत्योचुर्भुवि नो न गतिः। घोरपापमानेतुं गतान्नो दृष्ट्वा शिवदूता एत्य बलात्तं गृहीत्वा नो बद्धुमुद्यता इतः परं नृलोके कथं गतिः। शिवदूता हन्तीति श्रुत्वा कुपितो यमः शीघ्रं तानेत्याह। कुतः किङ्करा हताः प्रेतश्च हतोऽयं कैलासार्हः किम्। नदीवालुकामधिकमस्य पापम्। घोरोऽयं शिवपुरार्हः किम्। कथं विमाने उपवेश्य मौढ्यान्नयतेति श्रुत्वा त ऊचुरस्य शीर्षादिषु भस्म लग्नमेवं विलोक्यापि ते दूताः कथं नेतुं प्रवृत्ताः।।८२-९१।। ईशाज्ञा तु भस्माङ्कितः कैलासमानेतव्यः शाश्वतोऽयं तस्य लोक इति। भस्माङ्कितमानेतुं ते दूताः कथमागताः। वध्या अपि ते धर्मेण मोचिताः। अतो दूतान्सन्मतिमुपादिश। पापा अपि भस्मलिप्ता न दण्ड्याः। कदापि तान्दोषा न स्पृशन्ति। ते स्वर्गार्हा इति यमो धर्म्यं वचः श्रुत्वा स्वदूतानाह। भस्माङ्किताः शैवा दूरतस्त्याज्याः। तेऽनेकदोषदूषिता अपि न मत्पुरार्हाः। रुद्राक्षत्रिपुण्ड्रधारिणो रुद्राज्ञया दूरतस्त्याज्या इति। भक्त्या मे तद्धृतम्। देवानां दुर्लभम्।।९२-१००।। यत्सदा प्रीत्या शिवो धत्ते तन्माहात्म्यं वक्तुं कः शक्तः।।१।। राक्षस आह। हे जगज्जीवन वामदेव, मामुद्धर। त्वमीशोऽसि। अनेकजन्मस्मृतिदौ ते पादौ दृष्टौ। प्राक्पुण्येन ते सङ्गतिः। पुरा राज्ये कृतं पुण्यं स्मृतम्। वने वाप्यो बद्धाः। विप्रेभ्यो वृत्तयो दत्ताः। अन्येऽगणिता दोषाः कृताः। मृतं मां नीत्वा चित्रगुप्तेनामन्त्र्य यम एतत्पुण्यमाहैष्ये पञ्चविंशे जन्मनि फलिष्यति। तत्पुण्यफलात्ते पादौ दृष्टौ। स्वामिन्मामुद्धर। जगद्गुरो, कीदृग्भस्मविधानं स्पष्टं विस्तरात्कथय। वामदेव आह। भस्मधारणविधिं वच्मि शृणु।।२-११०।। एकदा मन्दराद्रौ क्रीडार्थं कोटिगणयुक्शिव आगतः। त्रयस्त्रिंशत्कोटिदेवयुक्तेन्द्रो दिक्पालाश्चागताः। चित्रसेनादिगन्धर्वा यक्षखेचरपन्नगविद्याधरकिम्पुरुष- सिद्धसाध्यगुह्यकाः बृहस्पतिर्नारदो वसिष्ठोऽर्यमा पितृभिः सह ऋषयो मानसा दक्षाद्या उर्वश्याद्यप्सरस आदित्यविश्ववसवो मातृभिः सह चण्डिकाश्विनौ मरुद्गणो महाकालो महानीलो भूतेशो नन्दिकेशो यष्टिधरौ च। मणिभद्रो वीरभद्रो वृकोदरः षट्कर्णः शङ्खकर्णः।।११-१९।। कुम्भोदरो मन्दोदरो विकटः कर्णधारो धारकेतुर्भृङ्गीरटो भूतनाथो

नानावर्णाङ्गरूपाः प्रमथाः।।२०-२१।। तान् शृणु। केचित्कृष्णाः पीताः श्वेता रक्ता हरिता धूम्रा विचित्रा मण्डूकाभाः नानावस्त्रवाहनभूषणाः केचित् व्याघ्रमुखाः वराहगजनक्रश्वमृगमुखाः ऊर्ध्वमुखाः केचिच्छरभसिंहचिल्लबकमुखा अमुखाश्च।।२२-२६।। एकद्वित्रिचतुर्मुखा अनेकमुखाः। एकद्वित्रिचतुःपञ्च- षट्कराः। अपदाः बहुपदाः अकर्णाः अनेककर्णाः।।२७-२९।। केचिदेकनयना अनेकनयनाश्च। स्थूलाः कुब्जाः। एवमेभिर्गणैर्युक्तो मूर्तिमद्ब्रह्मैव शिवः सप्तप्रभावलियुक्तसिंहासने स्थितः। आद्या रक्ता रत्नानुरञ्जिता प्रभावलिः। द्वितीया स्वर्णनिर्मिता पीता। तृतीया नीलोज्ज्वला। चतुर्थी शुभ्राऽब्जमण्डिता। पञ्चमी वैडूर्याभा मुक्ताञ्चिता। षष्ठी सप्तमी च रत्नजडिता विश्वकर्मघटिता। आभिः सिंहासनं भातम्। ईदृक्सिंहासने कोट्यर्कभो देदीप्यमानस्त्रिपुरारी रेजे। प्रलयैकीभूतसप्ताब्धिगर्जनः।।३०-३९।। ज्वालामाली वह्निभालाक्षो जटाधृक्पूर्ण- चन्द्रभूषणः। यन्नेत्रेषु रत्नदीप्तिस्तौ वासुकीतक्षकौ यद्दक्षिणवामकर्णकुण्डले। नीलकण्ठो नागाभरणः सर्पकङ्कणोऽङ्गुलिगतसर्पमुद्रः सर्पमेखलो व्याघ्रचर्मधृग्दर्पणाभः कर्पूरगौरः कर्कोटकमहापद्मनूपुरो निष्कलङ्कचन्द्रमुखो योगिध्येयः। पशुपतिर्भक्तवत्सलो रत्नजडितकुण्डलान्वितमुकुटधृङ्नागहारः सर्पवेष्टितो नीलकण्ठः। सर्पमयसर्वाङ्गभूषणः शुभ्रकमलार्चितश्चन्दनलिप्तः कर्पूररञ्जितः।।४०-४८।। सायुधभुजङ्गसारदशबाहुयुक्तः।।४९।। त्रिशूलडमरु- खड्गपानपात्रखट्वाङ्गबाणपरश्वङ्कुशमृगपिनाकधारी रेजे। अस्य सालङ्कृतभास्वत्पञ्च- मुखानि शृणु। निष्कलङ्कचन्द्रदुग्धफेनभो भस्मोद्धूलिताङ्गो मन्मथदाहको नागोपवीती चन्द्रसूर्याग्निलोचनः सर्वेशो विरूपाभो भाति। एकं चन्द्रमौलि सुहास्यं पश्चिमदिङ्मुखं शुभ्रतिलकम्। द्वितीयं ताम्रं रम्यं दाडिमपुष्पाभमुदग्गतं प्रातःकालीनार्कमण्डलवद्भाति। तृतीयं पूर्वदिग्गतं चन्द्रार्धभूषितं जटाधरं नागवेष्टितम्।।५०-५९।। चतुर्थं दंष्ट्राकरालं नीलं विस्तीर्णं भाति। यतोऽग्निवज्ज्वाला निर्गता एवं भक्ताभयकरस्य मुखम्। मध्ये पञ्चमं व्यक्ताव्यक्तस्वरूपं साकारं निराकारं सगुणं निर्गुणं लक्ष्यालक्ष्यरूपम्। एवं परब्रह्मरूपः सर्वेश्वरो यत्कण्ठमालाः कालव्यालादयः। यत्पादतले रक्ताब्जसदृशे। चन्द्रार्धसमा नखाः। यः सर्पालङ्कृतो व्याघ्रचर्माच्छन्नो नागबद्धो गम्भीरावर्तत्रिवलिनाभिर्भक्तमनोहरो रोमाञ्चिततनुर्भक्तवत्सलः परमार्थदः पार्वत्या भूषितः।।६०-६८।। पार्वत्याः सौन्दर्यं वागगोचरम्। स्वतेजोरञ्जिताऽपि नानालङ्कारयुक्ता। चन्द्राभमन्दहास्यमुखी, स्वर्णचम्पकगौरी, मुक्ताहारकण्ठी, रत्नमुकुटा, नागभूषिता, यन्मुकुटोपरिस्थपुष्पमधुलिहो गायका इवाभान्ति।।६९-७३।। एवं जगन्माता विश्ववन्द्या परमेश्वरी। यस्याः सरला नासिका। तत्र सोज्ज्वलं नानारत्नयुक्तमौक्तिकं भाति। प्रवालसमाधरा रत्नपङ्क्तिसमदन्ती।।७४-७६।। जगन्मातू रत्नमयकर्णभूषणे। कुचयोः पीतवर्णचोली। कण्ठे रत्नमया निष्कहाराः। एवं महामाया भूषिता।।७७।। स्तनस्रवद्दुग्धं दैवात्सर्पाः पिबन्ति। दाडिमावस्त्रपरिहिता कुङ्कुमचर्चिता भक्तवत्सला गिरिजा। यद्बाहू सरलौ मणिबन्धयो रत्नजडितकङ्कणानि। पदयो रत्नाञ्चितनूपुरे। एवं ध्यायतां गणानां कृपादृष्ट्याऽनुगृह्णन्ती। अष्टमीचन्द्रवल्ललाटे रत्नाञ्चिततिलकः। सा नानालङ्कारभूषिता, शम्भुकान्ता जगन्माता। तत्सौन्दर्यं को वदेत्। ईदृश्या पार्वत्या सहोपविष्टं शिवं द्रष्टुं सगण इन्द्रः सर्वे देवा ऋषयः कुमारा अप्यागताः। तत्र सनत्कुमारः शिवपादौ धृत्वा नत्वा विनयेनाह।।७८-८६।। भो उमाकान्त विश्वकृच्छम्भो, जय। त्रैलोक्ये धर्मार्थकाममोक्षदाता त्वम्। भवोत्तारणाय पापक्षयाय च त्वया सर्वधर्मा उक्ताः। अद्य स्वल्पायासं महाफलमेकसाधनं याचे यतश्चतुर्वर्गः फलिष्यति। हे भूरिद, सर्वपुण्यानि बह्वायासानि तस्मात्स्वामिन्हितार्थं मर्त्यानां सुकरं वदेति पुष्टस्तुष्ट ईशः सर्वेषां शृण्वतां कुमारमाह।।८७-९२।। द्रुतपुण्यदं परं चतुर्वर्गसाधनं वेदादिमतं धर्म्यं स्वर्ग्यं सुकरमनन्तपुण्यदं सर्वे शृण्वन्तु भस्मत्रिपुण्ड्रधारणम्। सनत्कुमार

आह। कोऽस्य विधिर्द्रव्यं च। क्व धार्यम्। का शक्तिः, का देवता, कः कर्ता। किं प्रमाणं, केन मन्त्रेण धार्यं चेति पदे दधौ।।९३-९५।। शिव आह। गोमयद्रव्यं देवताग्निस्ततो जाबालोक्तवत्कार्यं पूर्वयज्ञसम्भूतं वा भस्म बहुपुण्यम्। सद्योजातमिति गृहीत्वा, अग्निरित्यादिनाऽभिमन्त्र्य, मानस्तोक इत्यङ्गुष्ठेन मर्दयित्वा, त्र्यम्बकमिति शिरसि धृत्वा, त्र्यायुषमिति मन्त्रैर्यथास्थानं त्रिपुण्ड्रान्धारयेत्।।९६-२०१।। प्रतिस्थानं भ्रूसमानरेषात्रयं नाधिकम्। प्रथमं मध्यानामिकाङ्गुष्ठैर्ललाटे ततोऽन्यत्र। देवताध्यानपूर्वकं धारणमेकैकं देवाद्या नव। अकारोऽर्णो गार्हपत्योऽग्निर्भूस्तत्त्वं, रजोगुणः।।२-३।। ऋग्वेदः, क्रियाशक्तिः, प्रातःसवनं, ब्रह्मदेवः पूर्वत्र। द्वितीयरेखायां तु उकारोऽर्णो, दक्षिणाग्निः, खं तत्त्वं, यजुर्वेदो, माध्यन्दिनं सवनमिच्छाशक्तिरन्तरात्मा, विष्णुर्देवः। तृतीयरेखायां मकारोऽर्णः. आहवनीयोऽग्निः, स्वस्तत्त्वं, ज्ञानशक्तिस्तृतीयसवनं, शिवो देव इत्थं तिस्रो लेखा लेख्याः। भस्मत्रिपुण्ड्रमीशव्रतं वेदमतं धृतं चेन्मुक्तिकामस्य न पुनरावृत्तिः। सर्वे कामाः पुरुषार्थाश्च सिध्यन्ति। प्रत्यहं श्रौते स्मार्तेऽपि कर्मणि वर्णाश्रमैर्धार्यम्। महापापोपपापानि नश्यन्ति। धर्ता पुण्यात्मा भवेत्।।५-१३।। स्त्रीक्षत्रवीरात्महन्ता धारणाच्छुद्धात्मा भवेत्। यथाविधि भक्त्या धारयन्तो वेदवन्द्याः। विध्यज्ञाने भक्त्याऽपि धारणान्मुक्तिर्नात्र कार्या विचारणा।।१४-१७।। परद्रव्यपरस्त्रीसङ्गः, परनिन्दकः, क्षेत्रहर्ता, परपीडकः, सस्यारामभङ्क्ता, मिथ्यापैशून्यवक्ता, वेदक्रयी, कूटसाक्ष्यदो, दुर्वक्ता, वृत्त्यर्थं कौटिल्यकृद्गोभूमहिष्यादिप्रतिग्रहीता, नीचाच्च धान्यादिग्रहीता, दासीवेश्यारजस्वलावृषल्यादिगः।।१८-२३।। कन्याविधवादिगः, मांसगोरसादिक्रयकृज्ज्ञाताज्ञातामितपापकृदनुतप्तो भस्मत्रिपुण्ड्रधारणाच्छुद्धात्मा जायते।।२४-२६।। भस्ममाहात्म्यं सर्वपापघ्नं शिवनिन्दकं न पुनाति। शिवद्रव्यहर्तृशैवनिन्दकपापिनिष्कृतिर्न क्वापि। यस्य कण्ठे रुद्राक्षमाला, भाले त्रिपुण्ड्रः, स त्रिलोक्यपूज्यः। भूमौ यानि तीर्थानि तानि भस्मधारणात्स्नातानि सर्वे मन्त्रा जप्ताश्च। सहस्रजन्माघं क्षालितं पितरोऽप्युद्धताश्च। भस्मधारणादिहाखिलं सुखं दीर्घायुर्व्याधिनाशः।।२७-३३।। दिव्यमैश्वर्यं ज्ञानं चान्ते दिव्यविमाने समुपवेश्याप्सरसःसेवितं स्वर्लोकं नयन्ति। स सिद्धादिदेववन्द्यः स्वर्गे चिरं सुखं भुक्त्वा ततः कल्पशतं ब्रह्मलोके तिष्ठति। ततो ब्रह्मकल्पत्रयं वैकुण्ठे स्थित्वाऽथ शिवसायुज्यं प्राप्नोति न संशयः। हे सनत्कुमार, तस्मात्त्वं त्रिपुण्ड्रधारयेदं वेदोपनिषन्मतं चतुर्विधपुरुषार्थसाधनम्। एतन्मयोक्तं श्रुत्वा सर्वे धारयन्तु। इत्युक्त्वा शिवः कैलासं ययौ। हृष्टः सनत्कुमारो ब्रह्मलोकं गतः।।३४-४३।। इति श्रुत्वा तुष्टो राक्षसो दयालुवामदेवस्य पदे दधौ। वामदेव आहेदृग्भस्ममाहात्म्यम्। मदङ्गस्पर्शात्ते ज्ञानं जातमित्युक्त्वाऽभिमन्त्र्य भस्म राक्षसायादात्। स च त्रिपुण्ड्रान्धृत्वा सद्यस्तेजोमयो ब्रह्मानन्दमयः सूर्यवद्दिव्यदेहो रेजे। ततो वामदेवं प्रदक्षिणीकृत्य ननाम। तावत्स्वर्गात्सूर्याभं विमानमागतम्। स दिव्यविमानमारुह्य स्वर्लोकं ययौ। एवं वामदेवमुनिस्तस्मै परलोकं ददौ। स महादेवः प्रत्यक्षः शिवः। त्रिमूर्त्यवतारोऽयं जगद्गुरुर्वामदेवो नर इव जगदुद्धाराय पर्यटति।।४४-५२।। वरिष्ठं भस्ममाहात्म्यं गुरुहस्ताद्विशेषतः। यतो ब्रह्मराक्षस पारङ्गतः। अनेके मन्त्रादयः सन्ति ते गुरुं विना न साध्याः। अतो वेदादिर्वक्ति 'नास्ति तत्त्वं गुरोः परम्' इति। ऋषिभ्योऽपि सूतो ब्रूते विशेषतो गुरुहस्तात्सिद्धिस्तस्माद्गुरुर्मुख्यं कारणम्। इति श्रीगुरुस्त्रिविक्रममाह। सतत्पदयोः शीर्षं दधौ। स गुरुं नत्वाऽऽदिष्टः स्वस्थानं गतः। श्रीगुरूपदेशेन सर्वे ज्ञानिनोऽभवन्।।५३-५७।। इति सिद्धविदा परमादरतः कथिताऽत्र कथा परमादरतः।। अवतीह तु भाविकलोकमसाविति शिष्यमुवाच मता मम सा।।२५८।। नृसिंहसंज्ञः स्वकुलेट्सरस्वती यतीशभक्तः प्रथितः सरस्वती।। गुरोश्चरित्रं पठितोऽपि शृण्वतश्चतुःपुमर्थप्रदमाह चादृतः।।२५९।।

।।इति एकोनत्रिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ त्रिंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

गोपीनाथसुतोऽत्रिसुतभजनात्पुत्रमापोद्वाहर्ध्वंतत्स्त्री रुग्णं तमनयदथो पत्तनं गाणगाख्यम्।।
मन्दाक्रान्ताध्वनि स तु पुरस्योपकण्ठं ममारत्रिंशे तत्स्त्रीनिकटमथ गतो भूतिरुद्राक्षधृक्सन्।।१।।

नामधारकः सिद्धपदे धृत्वा प्रणत आह। सिद्धयोगिञ्जय। त्वं भवतारकोऽज्ञानध्वान्तज्योतिश्च। स्वामिंस्ते कृपयाऽविद्याब्धिमग्नोऽपि तत उत्तीर्णोऽस्मि। त्वया पन्था दर्शितः। परमार्थो लब्धश्च। त्वं विश्वत्राता गुरुनाथोऽसि। गुरुचरित्रामृतरसः प्राशितोऽपि मे मनो न तृप्तम्। तत्तृष्णा वर्धते। त्वत्प्रत्युपकारो वंशपरम्परयाऽपि न क्रियते। दयाब्धे, ते निजरूपं दर्शितम्। पूर्वं नवा कथा श्राविता पतितमुखेन वेदा वाचिताः। त्रिविक्रमाय ज्ञानमुक्तं ततोऽग्रतो जातां कथां वद।।८।। सिद्धस्तुष्टस्तमाश्वास्याह। धन्योऽसि सर्वेष्टं त्वयाऽर्जितम्। तवोपरि श्रीगुरोः कृपाऽस्ति। सर्वार्थभाक्त्वम्। भवाब्धिं तीर्णोऽसि। धन्या ते वाणी। ते मनो गुरुपदे लग्नम्। ते प्रश्नादतीव सन्तोषः। एकैकमहिमाख्याने ग्रन्थो विस्तरेत्। ततः संक्षेपात्कथां वच्मि। तत्र गांधर्वे नित्यनूतन इव महिमा जातः। नृवद्दृष्टोऽपि त्रिमूर्त्यवतारोऽयम्। तन्महिमा विदुषामप्यगम्योऽहं मन्दधीस्तद्वर्णने न क्षमः। नृदेहं स्वीकृत्य यः पावनं चरित्रं चक्रे तस्य गांधर्वे विशेषतः ख्यातिर्जाता।।९-१७।। ततः सर्वत्र प्रकाशोऽभूत्। गुरुदर्शनाय भक्ता दूरादेत्य पूर्णकामाः स्युः। दैन्यार्तः श्रीयुक्तः, वन्ध्या सुपुत्रा, कुष्ठी सुवर्णाङ्गः, अन्धश्चक्षुष्मान्, बधिरश्च सुश्रवा अभूत्। अपस्मारादिरोगाश्च नष्टाः। स्पर्शस्पर्शादयसः सुवर्णत्वे न चित्रम्। तथा गुरुकृपया सर्वाभीष्टाप्तिर्न चित्रा। चित्रं शृणु। माहुरे धनी गोपीनाथविप्रोऽभूत्तत्पुत्रा मृतास्तेन पत्न्या सह श्रीदत्त आराधितः।।१८-२३।। ततो दत्ताख्यः पुत्रश्चिरं जीवितः। तौ एकं तं पुत्रं प्रेम्णा पुपुषतुः। पञ्चमेऽब्दे तस्य व्रतबन्धः कृतः। द्वादशे विवाहः कृतः। सुन्दरी सती स्नुषा लब्धा।।२४-२६।। कामस्य रतिरिव। हृष्टौ पितरौ तौ पालयामासतुः। परस्परप्रेमयुतौ समवयस्कौ सुचिह्नौ षोडशाब्दौ जातौ। क्षणं परस्परविरहं सोढुमशक्तौ। अथ दैवाद्विप्रपुत्रो रोगग्रस्तोऽप्यौषधादिनाऽऽरोग्यं नाप। अरुच्याऽन्नं जहौ। तत्स्त्री सावित्री अप्यन्नं जहौ। पत्युर्भुक्तोच्छिष्टौषधं भेजे। एवं त्र्यब्दान्भर्ता सह क्लिष्टा। यक्ष्मणा पतिदेहो यथा क्षीणस्तथैव साध्व्याः। सा पतिपादोदकं पीत्वा कालं निन्ये।।२७-३५।। भर्ता यावदश्नाति तावदेव पतिदेवता सा। तथैवौषधम्। पित्रादिभिर्वारिता बोधिताऽपि सा पतिं न जहौ। दिव्याभरणादीनि हित्वा पतिं प्राणादपि परं मेने न सुखम्। उभयोः पितरौ धनिकौ तौ वीक्ष्यातिदुःखितौ। तैर्मन्त्रजपहोमादौ बहु द्रव्यं व्ययीकृतम्। रसायनौषधादि दत्तम्। दृढमूलो रोगो न शान्तः। ज्योतिषिकं पृष्ट्वा कुलदेवं सम्पूज्यापि नारोग्यमभूत्।।३६-४२।। वैद्या ऊचुः। इतः परं शिवस्त्राता, नात्र नृयत्न इति श्रुत्वा दुःखितौ पितरौ ऊचतुः। हा जगन्नाथ दत्तात्रेय,।।४३-४४।। त्वामाराध्याप्तोऽप्येकः पुत्रो रङ्कस्य निधिरिव पापिनोर्नौ एवं जातः। तं न रक्षसि चेत्तेऽग्रे प्राणान्दास्याव इति दुःखितौ

पितरावालिङ्ग्याश्वास्य पुत्र आह। पूर्वं वां यदृणं गृहीतं ततोऽधिकं कुतो देयम्। ऋणानुसार्यत्र सम्बन्ध इति श्रुत्वा तदुपरि पतितौ दुःखितौ पितरौ प्रोचुस्त्वं नौ त्रातेति निश्चयः। निराशौ मा कुरु। दुःखाब्दौ नौ त्यक्त्वा ते गमनं नोचितम्। कोऽयं धर्मः। वार्धक्ये को नस्त्रातेति श्रुत्वाऽऽक्रन्दन्सुत आह। सर्वमीश्वराधीनं मर्त्ययत्नः कियान्।।५२।। एकघटीस्तन्यदानोपकारोऽपि न वार्यते। कथं मातुरृणोद्धारः ।।५३।। त्वत्कुक्षौ भूत्वा पदे पदे दुःखं दत्तम्। न सुखम्। एवं पितरावुक्त्वा पत्नीमाह। हे प्रिये, मे दिवसाः पूर्णाः। मदर्थं वृथा कष्टं ते कृतम्। अहं ते पूर्वजन्मवैरी। यद्यत्र तिष्ठसि चेत्त्वां मत्पिता पुत्रवद्रक्षेत्। कष्टं मनुषे चेत्पितुर्गृहं गच्छ। ते सौन्दर्यं दैवहीनस्य मेऽनुपयुक्तम्। मे दुरङ्गस्पर्शात्ते सौभाग्यं नष्टम्। इति श्रुत्वा मूर्च्छिता तत्पदयोः पतिता दुःखिताऽऽह। स्वामिन्मां मा त्यज। भवतोऽन्या गतिर्मे न। यत्र ते देहस्तत्रायं देहो नात्र सन्देह इति श्रुत्वा तयोः पितरौ देहं भुवि त्यक्त्वा दुःखितौ।।५४-६३।। तदा सावित्री श्वशुरावुत्थाप्याश्वास्याह। चिन्ता न कार्या। मे पतिर्जीविष्यति। त्वां प्रार्थये। शिवस्त्राता। पत्या सह मां प्रेषय। लोको मां वदति। गन्धर्वपुरे श्रीनृसिंहसरस्वती तद्दर्शनात्पत्युरारोग्यं भविष्यतीति तत्पदलग्नाऽभूत्। पुत्रवत्सलौ श्वशुरौ तदङ्गीकृत्यान्दोलिकायां रोगिणमुपवेश्य प्रेषयामासतुः। तौ स्नुषा प्राह। मनः स्थिरीकृत्य गृहे सुखं स्थेयम्। मत्प्राणप्रियस्य पत्युः कुलदेवस्त्रातेति पदलग्नाऽभूत्तां 'सम्राज्ञी'त्याश्वास्य श्वशुरावूचतुर्हे सौभाग्यवति, ते दैवादयं चिरं जीवयित्वाशीर्भिरभिनन्द्य प्रस्थापयामासतुः।।६४-७२।। सा शनैर्मार्गमाक्रम्य भीमातीरं गता। दूरमार्गाक्रमणाद्दोषाः कुपिताः। स रोगी ग्रामसमीपे कष्टादुत्तारितः।।७३-७४।। सा श्रीगुरुः क्वेत्यपृच्छल्लोक आह। स्नातुं गत इति श्रुत्वा सा गन्तुमैच्छत्। पत्युरन्तकाले सोपागता तावत्प्राणा निर्गताः। अहहेति साऽऽकान्तं कृत्वा शिरश्छेत्तुं यावत्खड्गं दधौ तावल्लोकैर्वारिता। सा शुचाऽऽह। केयं गतिः। हा देव, मम प्राणरक्षकस्त्वमित्याशयाऽहं प्राप्ता।।७५-७८।। देवदर्शनं गतस्योपरि देवालयः पतित इति नाश्रावि। छायार्थं गतस्योपरि यथा वृक्षः पतति, यथा वाऽम्बुपानार्थं गतं नक्रो घातयति।।७९-८१।। व्याघ्रभीत्या वा शरणागतां धेनुं यवनो हन्ति, तथाऽद्य मे जातम्। पतिघातिनी पापा दैवहतकाऽहम्। श्वशुरांस्त्यक्त्वा व्यर्थं विदेशमागमम्। एवंतरा विलपन्तीं तां नागरा ऊचुः। व्यर्थं मा रोदीस्त्वं विचारय। भाव्यन्यथा कर्तुं क्व ईश्वरः। एवं बोधिता सा पूर्वं सुखं स्मृत्वाऽऽह ।।८२-८६।। अहो भ्रातर्भगिन्यम्ब, किं वच्मि। पत्युरारोग्याशयेहागता। कथं स्थेयम्। कं शरणं यामि। कः पाता। प्राणेशं त्यक्त्वा कथं जीवितुमुत्सहे। बाल्ये विवाहकालेऽपि गौरीशौ पूजितौ। सौभाग्यार्थं भक्त्या भवान्यर्चिता। सुवासिन्युक्तमखण्डं सौभाग्यव्रतं चीर्णम्।।८७-९०।। सर्वं व्यर्थं जातम्। गौरी रुष्टा। मे कण्ठसूत्रहरिद्रयोश्चोर आगतः। कङ्कणादि सर्वं वराय दत्तम्। मे पुण्यं क्व गतम्। गौरीशौ वृथाऽर्चितौ। कथं मे घातं कृतोऽतः कथं स्थास्ये। प्राणवत्पतिस्तत्समोऽन्यो न दृष्ट इत्युक्त्वा सा पतिमुखं दृष्ट्वाऽतीव दुःखिताऽभूत्। शवमालिङ्ग्य पूर्वकालं स्नेहं च स्मृत्वा रुदत्याह। हा नाथ, मां हातुं कथमिच्छसि। मे वचो व्यलङ्घयं किं हन्ताहहा। हा दैवहीनाऽस्मि। ते जीवितं कथं नष्टम्। त्वन्नाशार्थं मयाऽत्रानीतोऽसि। दशरथः श्रावणमिवाहं त्वां ते पितरौ त्यक्त्वाऽघातयम्।।९१-९९।। इमां वार्तां श्रुत्वा ते पितरौ मरिष्यतः। हत्यात्रयं मेऽर्जितम्। अहं पतिघ्नी, ते वैरिणी, चण्डाली पापाऽहं निन्दास्पदाऽसिवत्ते वपुर्विद्ध्वा प्राणहर्त्री अभवम्। त्वत्सामीप्याभावा- त्पित्रादेरतिदुःखं भवेत्तेषाहमेव विघ्नमकरवम्। वृद्धश्वशुरयोर्नाशा पूर्णा। तत्त्यागस्तेऽधर्म एवैक एव भवांस्तत्पुत्रो नान्यस्त्राता। मां दीनां च त्यक्त्वा कथं गतोऽसि। क्वाहं यास्ये। दुर्भगाया मे कस्त्राता। नैकमपि मन्त्रमुक्त्वाऽऽशु गतोऽसि। हे प्राणेश, ते महत्त्वं कथं विस्मर्यते।।१००-१०८।। न कदापि पृथक्शयनं कृतम्। तत्स्मृत्वा मनः खिद्यते। कथं

जीवे।।९।। त्वं मे प्राणः। न पतिः। कति गुणास्ते स्मरणीयाः। धर्मपत्नीं मां त्यक्त्वा क्व गच्छसि। को मां पालयेत्। बालविधवेति जनापवादो मयि स्थितः। एकमपि धीवादं नोक्त्वा यातोऽसि। केशवपनं कृत्वा क्व गन्तव्यम्। यावत्ते प्रेम पूर्णं तावदाहूताऽप्यहं पितृगृहं न याताऽधुना कथं व्रजेयम्। त्वत्सुखोपेक्षाभीत्या पित्रादींस्त्यक्त्वा ते चित्तवृत्तिर्धृता। यावत्त्वं छत्रं तावदहं सर्वत्र पवित्राधुना निन्दास्पदाऽभवम्। श्वशुरौ मन्मुखेक्षणान्मरिष्यतः। गृहमरण्यं जातम्।।१०-१६।। राक्षसी पापा विरूपाऽहं आरोग्यार्थं त्वामिहानीय त्यक्त्वा कथं गृहं यास्ये। इत्येनकप्रकारैः सा दुःखिता। तदैको भस्मलिप्तो जटिलो रुद्राक्षधृक् शूली तापसः सिद्धः एत्य तामाह। मूर्खवत्कुतो रोदिषि। ललाटलिपिः कथं परिहार्या। स्वपृष्ठलग्नं पूर्वार्जितं अलङ्घ्यम्। निष्फलेयं शुक्। अष्टदिनशोकतो गताः प्राणा आयास्यन्ति किम्। यद्धात्रा लिखितं तत्तथैव दुःखं भोग्यम्। कश्चिरं जीवी। मृत्युः केषां न विषयो वदायं क्व गतः। कुत आगतस्त्वं का वा। कौ ते पितरौ। नद्यां क्षणं काष्ठयोगवद्रात्रौ वृक्षे पक्षियोगवदयं सम्बन्धः।।१७-२६।। वायुवेगाज्जले बुद्बुदा इव कर्मतो नश्वरा देहाः। अत्र को जातः। को मृतः। मायामयोऽयं पुत्रादिको भ्रमः। आत्मानमविचार्य जडं देहं पतिं पश्यसि। देहः कर्मानुसारी। कर्म गुणानुबन्धि सुखदुःखदम्। गुणास्तु मायिकाः। नात्मनः सत्त्वरजतमोगुणसम्बन्धः। संसारे वर्तमानाः कर्माधीनाः जीवाः सुखदुःखभागिनः। कल्पायुषो देवा अपि कर्माधीनाः कालगोचरा मर्त्यस्य तु का कथा। सहैव काल आयातः। तदधीनो देहः कथं स्थिरः। कालकर्मगुणाधीने पाञ्चभौतिके देहे जाते मृते च हर्षः शोकश्च न कार्यः।।२७-३५।। गर्भगोऽपि नश्वरो देहो यावदारब्धं तिष्ठति। बाल्ये वार्धक्ये वा स्वार्जितानुसारी मृत्युः।।३६-३७।। पूर्वजन्मार्जितं पापपुण्यानुसारि सुखं दुःखं च भोग्यम्। तथैव स्त्र्यादिसङ्गमः। यत्सुखादि धात्रा ललाटे लिखितं तदन्यथा भवेत्किम्। कदाचित्पुण्यवशाद्दुष्कर्म वार्यते। कालस्तु देवादिभिर्न वार्यते। सम्बन्धः सत्यश्चेत्त्वं पुरा कस्य का वाऽऽसीरग्रे का वा भविष्यसि। व्यर्थं दुःखं करोषि। विचारय। त्वग्रक्तमांसास्थिश्लेष्मविण्मूत्रात्मकोऽन्तर्बहिश्च जुगुप्सितोऽयं पाञ्चभौतिको देहोऽत्र कः स्वार्थः। यं शोचसि सोऽयं मलमूत्रात्मकोऽतः संसारतरणोपायः कार्यः।।३८-४४।। इति तेन बोधिता दुःखिता सा तद्धार्दं ज्ञात्वा मायिकं शोकं त्यक्त्वा करौ बद्ध्वा तत्पदोः शिर आधाय करुणमाह। स्वामिन्मामुद्धर। यथोपदेशं चरिष्ये। त्राहि त्राहि दयानिधे, भवोत्तारो यथा स्यात्तथाऽऽज्ञापयेति श्रुत्वा सुप्रसन्नः स्त्रीणां धर्म्यमाचारं प्राह।।४५-४९।। गाङ्गाधरिस्त्वत्र सरस्वतीद्विजो वदिष्यति श्रीगुरुसच्चरित्रम्। नृणां तु यस्य श्रवणादघान्तः सर्वार्थलाभाश्च यतो महान्तः।।१५०।।

।।इति त्रिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ एकत्रिंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

स्त्रीधर्ममुवाच कुपूर्मितेऽध्याये विषयोक्त(?)मुपस्थिताम्।।

विन्ध्याद्रिचरित्रसमन्वितागस्त्यर्षिसतीचरितं च सन्।।१।।

सिद्ध आह। योगीशः स्त्रीधर्मानुवाच।।।१।। हे साध्वि, भवतारकं स्त्रीधर्मं शृणु। पत्यौ सति मृते चोभयधर्मान् शृणु। स्कान्दे काशीखण्डे ते विस्तृताः। काशीस्थो महर्षिरगस्त्यः। तत्पत्नी प्राज्ञी लोपामुद्रा पतिव्रतोभौ काशीभूषणभूषितौ। तच्छिष्यो विन्ध्याचलो गुरुप्रियः नानालतावृक्षवननदीमण्डितः। कदाचित्पर्यटन्नारदस्तं दृष्ट्वाऽऽह। त्वादृङ्नान्योऽद्रिर्दृष्टः। त्वयि रत्नमय्योऽनेकभूमयोऽद्रयश्च। त्वय्येकं न्यूनं मेरुवन्न महोन्नतत्वम्।।२-१०।। इत्युक्तः स कुपितो मेरुं तुच्छीकर्तुं वर्धमानो विन्ध्यः सूर्यमण्डलमतीत्यानुक्रमाद्ववृधे। ततो दक्षिणभागे सदाऽन्धकारोऽभूद्यज्ञादिकर्मलोपश्चेन्द्राय ऋषयस्तत्कथयामासुः। कुपित इन्द्रो ब्रह्माणमेत्य तत्सर्वं प्राह। ब्रह्मोवाच। हे शक्र, ब्रह्मवित्तगुरुरगस्त्यः काश्यामस्ति तं दक्षिणदिशि प्रेरय। स दक्षिणदिगाधारो भविष्यति। तं गुरुमायान्तं दृष्ट्वा विन्ध्यः प्रणिपतिष्यति। शिरोभिः प्रणिपतन्तं भूसमानं करिष्यति।।११-२०।। अतौ देवैः सह काशीं गत्वा विनयेन तं प्रार्थ्यानयेति ब्रह्मणोक्तं इन्द्रो देवैर्ऋषिभिर्बृहस्पतिना च सह काशीं गत्वा गुरुमग्रतः कृत्वाऽगस्त्याश्रमं प्राप। अगस्त्यस्तानर्घ्यादिभिरानर्च। सदेवो गुरुस्तं लोपामुद्रां च स्तुवन्नाह। देवाः, शृणुतेयं पतिव्रताऽनुत्तमाऽनसूयासावित्र्यरुन्धती- शतरूपापार्वतीश्रीमेनकासुनीतिसंज्ञास्वाहा एताः पतिदेवताः।।२१-३०।। आभ्योऽधिका पतिव्रतेयम्। पतिव्रताचारो बहुशास्त्रसंमतः। अस्याः पत्युरुच्छिष्टं मुख्यभोजनम्। पतिसेवाऽहोरात्रं कार्याऽतिथिसत्कारश्च कार्यः। दानादिकं पत्युराज्ञां विना न कार्यम्। पत्यौ स्थिते स्थिताऽऽसीने चाज्ञयाऽऽसीत। तं नैवावमानयेत्। सेवाकाले तं मनसा हरिं भावयेत्। स्वापकाले भक्त्या पतिः सेव्यः। तस्मिन्गाढं निद्रितेऽप्रमत्ता शयीत। कञ्चुकस्य पत्युरङ्गस्पर्शं न कुर्यात्। कृते चायुर्हानिस्तथैव च नामोच्चारणात्। यावच्छयनात्पतिर्नोत्थित- स्तावच्छयनात्पूर्वमुत्थाय गृहसम्मार्जनादि कृत्वा स्नात्वाऽन्वहं शङ्करभावनया पाद्यादिभिः पतिः पूज्यः। तत्पदयोः शिरो निधेयम्।।३१-३९।। पत्यौ गृहे सति भूषा धार्याः। प्रोषिते च न धार्याः। भर्ता निष्ठुरं वक्ति चेत्क्षमस्वेति प्रार्थयेत्। तेन क्रोधादिना दुरुक्तं हृदि न धारयेत्। ग्रामादागतं पतिं सहस्रकार्याणि त्यक्त्वाऽभिमुखं गच्छेत्। अनामयं पृष्ट्वा यदुक्तं तत्तथैव कार्यम्। स्वातन्त्र्येण न कार्यम्। परगृहं च न गन्तव्यम्।।।४०-४३।। गमने चानेकदोषाः। कार्यार्थं गन्तव्यं चेत्स्त्रियः पुंमांसश्च न वीक्ष्याः। द्रुतमागन्तव्यम्। तत्र न स्थेयम्। स्वगृह एव स्थेयम्।।४४-४५।। स्वातन्त्र्येण बहिर्गमने उलूकयोनिगतिः। एवंधर्मान्विता लोपामुद्रा न बहिर्गच्छति। प्रातरुत्थाय सम्मार्जनादि कृत्वा स्नात्वा विमलीकृतदेवपूजोपकरणानि गन्धादि च पत्यै देयम्।।४६-४८।। भर्तुश्चित्तवृत्तिं धृत्वाऽनुष्ठानसमाप्तेः पूर्वं पाकादि कृत्वा पत्युरुच्छिष्टं भुक्त्वा मनोवाक्कायैः पतिस्तोषणीयः। प्रोषिते च पत्यौ धेनवेऽतिथये चान्नं दत्त्वा सात्त्विकाहारः कार्यः। गृहं नीरजस्कं कार्यम्। पृथग्धर्मो न कार्यो व्रतोपवासादि

पत्युराज्ञयैव कार्यम्। नगरोत्सवादिर्न वीक्ष्यः। तीर्थयात्रादि न कार्यम्। भर्तरि तुष्टे दुश्चित्ता तस्मिन्दुश्चित्ते च सती हृष्टा न भवेत्। रजसि प्राप्ते मौनं धार्यम्। मुखं न दर्शनीयम्। वेदध्वनिर्न श्राव्य एवं दिनत्रये व्यतीते सुस्नाता पतिमुखं वीक्षेत्।।४९-५६।। असम्भवे सूर्यं वीक्ष्य गृहं विशेत्। भर्तुरायुर्वर्धनार्थं हरिद्राकुङ्कुमसिन्दूरकज्जलमङ्गलसूत्रादि धार्यम्। पत्युः समीपे वेणीबन्धस्ताम्बूलं करकङ्कणं च सुवासिन्याः शस्तम्। रजकीनीचस्त्रीदरिद्राकुट्टिनीपतिनिन्दारतानां सङ्गतिर्न कार्या। आभिः सह सम्भाषणेऽपि दोषाः। श्वशुरौ ननान्दां देवरं च त्यक्त्वा या विभक्ता तिष्ठति सा शुनी भविष्यति। नग्नस्नानमुलूखलमुसलदृषदुपलाद्युपवेशनं न कार्यम्। तथैव घरट्टोदुम्बरादावपि। पत्या सह विवादकर्त्री दुःखभागिनी।।५७-६४।। तस्मात्पत्युर्मतादन्यथा नाचरेत्।।६५।। दुष्टोऽभाग्यो नपुंसकः कुष्ठी रुग्णः कुब्जोऽपि देववत्पूज्यः। तथाविधस्यापि हरिभावनया वचनानुसारिणीश्वरप्रीतिपात्रभूता भवति। भर्तुर्मतानि वस्त्रभूषणानि धारयेत्। पत्यौ दुश्चित्ते भूषादि न धार्यम्। सोपस्कारापेक्षा चेत्सती स्वयं न वदेत्। कन्यादिमुखतो वाचयेत्। सन्निधौ कोऽपि न चेत्संज्ञया ज्ञापयेन्न साक्षात्। पत्युर्दैवाल्लब्धेन तोषयेत्। श्रीमन्तं परं दृष्ट्वा पतिं न निन्देत्। पतिपादोदकं गङ्गोदकं मत्वा पिबेत्। पतिपूजनात्त्रिमूर्तितोषः। यात्रिकान्दृष्ट्वा तीर्थं गन्तुं नेच्छेत्। पत्युः सेवैव यात्रा। तत्पादोदकमेव तीर्थम्।।६६-७३।। नैमित्तिकव्रतेच्छा चेत्पत्युराज्ञया कार्यम्। स्वबुद्ध्या करणे भर्तुरायुर्नाशः, पत्या सह नरकवासश्चेति श्रुत्यादिमतम्। क्रुद्धा प्रत्युत्तरदाने शुनी ततो जम्बुकी च भूत्वा ग्रामसमीपे भविष्यति। प्रत्यहं पतिपादौ प्रक्षाल्य तीर्थं पेयम्। उच्छिष्टान्नं भुञ्जीत। दैवलब्धेन हृष्टायै शिवस्तुष्टोऽभीष्टदो भवति। सा स्वर्गे पत्या सह महीयते। वनभोजनाय परगृहे भोजनाय च न गन्तव्यम्। इष्टाप्तगृहे प्रत्यहं भुक्त्यर्थं न गन्तव्यम्। धनिनां वार्ता न श्राव्या। दुर्बलोऽनाचारोऽपि भर्ता न निन्द्यः। दुःशीलोऽपि श्रीपतिवन्मान्यः। श्वशुरयोरग्रे नोच्चैर्वदेत्। हास्यं च तथा वर्ज्यम्।।७४-८२।। भर्त्रा ताडिता या तं मरेति वक्तीह सा कष्टं व्याघ्रजन्ममाप्नुयात्। परपुंवीक्षणाज्जन्मान्धता। पतिं हित्वाऽशनात्सूकरजन्म च भविष्यति।।८३-८४।। ततो वल्गुली भूत्वा वृक्षेऽधःशिरा स्थित्वा स्वमलभुग्भविष्यति। पत्यै निष्ठुरवक्त्री सप्तजन्म मूका दरिद्रा च। सपत्नीद्वेष्टी दुर्भगा भविष्यति। बुद्ध्याऽन्यनरवीक्षकाङ्गहीना। कामतः परपुंवीक्षणाद्धीनगृहे दरिद्राऽतोऽन्यो न वीक्ष्यः। प्रोष्यागतं पतिं सम्मुखं गत्वा पादौ प्रक्षाल्य व्यजनादिना श्रमं हरेत्। पादसंवाहनादिना मृदुवाक्येन च तोषयेत्तेन त्रिमूर्तितोषः। बन्ध्वादिः किं दास्यति। एक एव पतिरैहिकामुष्मिकार्थदः।।८५-९१।। गुरुर्देवस्तीर्थं च स एवेति यन्मतिः सा सती। यावत्स जीवति तावत्सा पवित्रा। मृते च पत्यौ साऽस्पृश्या शववदमङ्गलाऽनपत्या चेद्विशेषतः। सा प्रयाणे सम्मुखी चेद्यातुर्मरणदा। पुत्रवती चेन्नानिष्टदाऽपुत्रविधवाया आशीर्न ग्राह्या। यतोऽनिष्टं अतस्तां न भाषयेत्। किं वैभवेन देहेन। पतिरेव स्त्रियाः सुखम्। यथा मेघेन विद्युच्चन्द्रेण चन्द्रिका च तथा सती पत्या सहाग्निं विशेत्। महाधर्मोऽयं श्रुतिस्मृत्युक्तो यतो द्विचत्वारिंशत्कुलोद्धारः।।९२-१००।। अनुगमने च पदे पदेऽश्वमेधसहस्रफलम्। पापोऽपि पतिर्यमदूतैर्बद्ध्वा नीतोऽपि तत्पत्नी अनुगमनं करोति चेत्ततस्तादृशमपि चिल्ली सर्पमिवोद्धृत्य तं स्वर्नयति। तां दृष्ट्वा भीता दूतास्तत्पतिं त्यक्त्वा पलायन्ते। तां विमाने उपवेश्य देव्यो नीराज्य स्वर्नयन्ति। यमदूता ऊचुः। कालादपि अधिकं नः सत्या भयमिति। सूर्यो भीतो मन्दं तपति। भीतोऽप्यग्निः शीतो भवति। स्वपदं हरिष्यति किमिति नक्षत्रवर्गो बिभेति। सती भर्त्रा सह स्वर्गत्वा चिरं तिष्ठति।।१०१-९।। सार्धत्रिकोटिकेशाः स्वधर्मेणाग्नौ हुतास्तत्फलं प्रतिकेशं कोट्यब्दं पत्या सहानन्देन स्वर्वास ईदृक्पुण्यं पत्यनुगमनम्। ईदृक्कुले जाता चेद्द्विचत्वारिंशत्पूर्वापरकुलोद्धर्त्री तत्पितरौ धन्यौ भर्ता च। ईदृङ्महाफलं सहगमनपुण्यम्।

प्रसङ्गाद्दुर्भगायाः फलं शृणु। दुराचारा व्यभिचारिणी चेत्स्वर्गस्थपितॄनादाय दारुणनरकान्याति। स्वकेशमिताब्दान्पूर्वजैः सह नरके पच्यते। पतिव्रतापदस्पर्शात्पवित्रत्वमतो भूस्तत्पदस्पर्शं वाञ्छति।।११०-१८।। सत्याः स्वकिरणस्पर्शे रविश्चन्द्रश्चात्मानं पूतं मन्यते। वायुर्वरुणोऽन्ये च सतीस्पर्शात्पूता भवन्ति। रूपलावण्यरञ्जिताः स्त्रियो गृहे गृहे सन्ति किं ताभिः। एकैव साध्वी त्रिकुलपावनी। यद्गृहे सती न तत्र न पुण्यम्। सप्तजन्मार्जितपुण्यात्सतीलाभः। तल्लाभे चतुर्विधपुरुषार्थलाभः। यद्गृहे न सती स यज्ञकर्मधर्मानर्हः। तद्गृहं वनमेव। स कर्मबद्धः। तज्जन्म व्यर्थम्। सती लब्धा चेत्पुण्यसिद्धिः। सत्पुत्रलाभः परलोकश्च।।१९-२७।। सतीदर्शनं गङ्गास्नानाधिपुण्यम्। सप्तजन्मपापनाशश्च।।२८।। आचार एवं हि पतिव्रतायाः बृहस्पतिर्देवगुरुर्जगाद। गङ्गाधरार्भोऽपि सरस्वतीति ख्यातस्तमेवाखिलदं जगाद।।१२९।।

।।इति एकत्रिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ द्वात्रिंशोऽध्यायः

अथ अध्यायसारसंग्रहश्लोकः -

रुक्मवतीमूचे प्रणतां तामष्टसुता सौभाग्यवती स्याः।
प्रेतमपि द्वात्रिंश इहास्या वल्लभमाशूत्थापयदीशः।।१।।

बृहस्पतिरेवमुक्त्वाऽनुगमनासम्भवे विधवाधर्ममाह। समीपे भर्ता मृतश्चेत्सत्या धैर्यादनुगमनं कार्यम्। स्तन्यपुत्रा गर्भिणी वा चेद्दूरतो वा पतिर्मृतश्चेदनुगमने दोषः।।१-४।। सा विधिवद्यावज्जीवं वैधव्यं पालयेच्चेत्तस्या अपि अनुगमनफलं न संशयः। वैधव्याचारादपि महापुण्यम्। मृते भर्तरि स्त्रीणां शिरोवपनम्। या कबरीं बध्नाति सा केशपाशैर्धवं बध्नाति। द्वयोरपि दुर्गतिः।।५-१०।। तस्माद्विधवया शिरसो वपनं कार्यम्। नित्यं शिरःस्नानं च दिवा सकृद्भोजनम्। विशेषादेकधान्याशनम्। शक्तिश्चेद्भक्त्या त्र्यहम्।।५-१२।। पञ्चाहं पक्षमात्रं वोपोषणं चान्द्रायणव्रतं वा कार्यम्।।१३।। प्रतिपद्येकग्रासमेवं दिने दिने वर्धमानग्रासान्ग्रसेत्। पौर्णिमायां पञ्चदश। ततः कृष्णे -हासयेत्। अमायामेको ग्रास इति। वृद्धाऽशक्ता चेत्फलाहारं शाकाहारं वा भक्षेत्क्षीरं वा पिबेत्। येन श्वासोच्छ्वासाश्चलन्ति तावच्चरेत्। या मञ्चके शेते सा पत्या सह नरकयातनां भुङ्क्ते। मङ्गलस्नानं देहोद्वर्तनं गन्धपुष्पताम्बूलादि च वर्जयेत्। विधवाऽपुत्रा चेत्प्रत्यहं गोत्राद्युच्चारणपूर्वकं भर्त्रादिपित्रादितर्पणं कुर्यात्। पतिभावनया विष्णुं पूजयेत्। यथा पूर्वं पत्याज्ञया स्थिता तथा वैधव्येऽपि विष्णोराज्ञया गुरुविप्राज्ञया वा व्रतोपवासादि चरेत् ।।१४-२३।। सुवासिन्यावस्थायां यत्प्रियं तद्विप्राय देयम्। विष्णूद्देशेन माघस्नानम्। वैशाखे जलदानं कार्तिके दीपदानं च सदक्षिणकं देयम्। माघे घृततिला देयाः। वैशाखे प्रपा स्थापनीया। शिवे शुद्धाम्बुनाऽखण्डगलन्तिका देया। सुगन्धद्रव्यैः शिवः पूज्यः। ब्राह्मणगृहे शक्त्या जलं देयम्। अतिथिविप्रेभ्योऽन्नं च। यात्रिकेभ्यश्छत्रपादुका देयाः। द्विजानां पादप्रक्षालनं कृत्वा व्यजनेन वीजयित्वा वस्त्रगन्धपरिमलैरभ्यर्च्य वीटकान्दत्वोदपात्रं द्राक्षा कदलीफलं स्वादु सगुडपानकं च दद्यात्।।२४-३२।। भर्तृनामोच्चार्य विप्राय सात्त्विकं दानं देयम्। कार्तिके यवान्नमेकान्नं वा भोज्यम्। वृन्ताकशिग्रुसुरणमधुतैलादि वर्ज्यम्।।३३-३४।। तथा द्विदलं च। कांस्यपात्रे न भोक्तव्यम्। मनः स्वच्छं धार्यम्। एवं मासं चरेत्। पलाशपत्रे भुक्त्वोद्यापनं कार्यम्। यद्यदाचीर्णं तस्य व्रतोद्यापनात्साङ्गता। घृतपूर्णं कांस्यपात्रं देयम्। भूमौ सुप्त्वा विप्राय मञ्चको देयः। यद्यत्त्यक्तं तत्तद्भक्त्या विप्राय देयम्। मासं रसं त्यक्त्वा सदक्षिणं ब्राह्मणाय दद्यात्। चतुर्मासं पञ्चामृतं त्यक्त्वोद्यापनं कृत्वा सदक्षिणां गां विप्राय दद्यात्। विशेषाद्दीपदानं महाफलं शृणु। अन्यदानधर्मा दीपदानस्य षोडशीं कलां नार्हन्ति।।३५-४१।। माघे सूर्यार्धोदये नियमान्माघस्नानम्।।४२।। तिललड्डुकपक्वान्नादि ब्राह्मणाय देयम्। वित्तशाठ्यं न कार्यम्। सशर्करा घृतपक्वमरीचिका दीपाश्च देयास्तापसा भोज्याः। विद्वद्विप्राय पर्यङ्को रञ्जितोर्णवस्त्राणि च। शीतनिवारणार्थं शुण्ठ्यौषधादि देयम्।

कर्पूरैलादियुक्ताम्बूलं च। वर्षपूर्त्यन्नयुतं गृहं देयम्। तैर्थिकेभ्यः पादुके च।।४३-४८।। गन्धादिभिः केशवः पूज्यः। रुद्रेण गौरीहरावभिषिच्य सर्वोपचारैः सम्पूज्य दीपमालिका देया।।४९-५०।। पतिं नारायणं भावयित्वा पूजयेत्सा पापाद्वियुज्यते। सतीत्थं नियमेन तिष्ठेद्वृषं नारोहेत्कञ्चुकीं न दध्यात्सितवस्त्रं दध्यात्। कृष्णारक्तचित्रवस्त्रधारणे दोषः। पुत्रश्चेत् 'आत्मा वै पुत्रनामा' इति श्रुतेर्व्रतादौ तदाज्ञां गृह्णीयात्। एवं वेदाद्युक्तधर्माचरणे सहगमनसमपुण्यम्। पापी पतिर्मृतो नरके स्थितोऽपि तत्पत्नी एवमाचरेत्तर्हि सा प्रेत्य ततोऽपि पतिमादाय स्वर्गमिष्यति।।५१-५७।। एवमुक्त्वा गुरुराह। पतिव्रताशिरोमणिर्लोपामुद्रा।।५८।। भागीरथीसमा पतिव्रता। तत्पतिः शिवसमः। उभौ यत्नात्पूज्यौ।।५९।। एवं गुरूक्तो धर्मो मयोक्तः। यस्मिंस्ते प्रीतिस्तमाचर। सर्वं दुःखं त्यक्त्वा मे वचो हृदि धेहि। लोकसाधनभूतौ द्वौ मार्गौ कथितौ। धैर्यं चेन्महाफलं अनुगमनं कुरु। समफलं वा वैधव्याचारं पालय। यस्मिंस्ते रुचिस्तद्ब्रूहीति तापसस्तन्मूर्ध्नि कर दत्वाऽपृच्छत्। सा भक्त्या तमाह। योगेश्वर जय। त्वं मे पितरौ सोदरश्च। बन्धुहीने विदेशेऽप्यन्तकाले त्वं मे सखा बन्धुश्च सङ्गतोऽसि। उक्तमार्गयोर्वैधव्यपालनं कष्टम्। सोऽसिधारावद्धर्मः। नवं मे तारुण्यं सुलावण्यं च वर्तमाने कलौ निन्दापवादास्पदं भवेत्।।६०-६८।। अनन्तपुण्यभर्त्रनुगमने मे सन्तोष इति। तत्पदयोः शिरो धृत्वा संसारमग्नं मां तारयेत्याह। स तामुत्थाप्य करुणयाऽभयं दत्त्वाऽऽह। यत्पत्युः स्थानं तत्तवाप्यनुगमनं कुरु। सावधानतया शृणु। पत्या सहारोग्यार्थं त्वं भक्त्या गुरुदर्शनार्थमागताऽसि। विधिकृत्यं जातम्। कालो दुर्जेय ईशसङ्कल्पवद्भवति नान्यथा। ब्रह्मलिखितमपरिहार्यम्। यद्भावि तद्भविष्यत्यतो वृथा शोकः। हरिश्चन्द्रोऽन्त्यजगृहे जलमाहरत्। बली सुतलं गतः। चिरायू रावणोऽपि मृतः। सबन्धुर्दुर्योधनः कालग्रस्तः।।६९-७७।। स्वच्छन्दमृत्युर्भीष्मोऽपि रणे पतितः। परीक्षित्सर्पदष्टोऽनन्ताऽवतारा भूत्वा नष्टाः। नृदेवाद्याः कालाधीनाः। सर्वजेता कालो भगवानजेयोऽत्र गुरुं विना कालं को जेष्यति। हे सति, दूरात्त्वमागताऽतः शीघ्रं सङ्गमं गत्वा श्रीगुरुं दृष्ट्वा तत आगत्य अग्निप्रवेशं कुर्वित्युक्त्वा शवमूर्ध्नि भस्म लेपयित्वा रुद्राक्षान्दत्त्वाऽऽह। शवस्य कर्णे द्वौ द्वौ बद्ध्वा तेन सहाग्नौ प्रविश।।७८-८५।। अन्यच्च शृणु। गुरुदर्शनार्थं गच्छ। तत्र रुद्रसूक्ताभिषिक्तगुरुपादोदकतीर्थम्।।८६।। स्वदेहे प्रोक्ष्य शवस्य सर्वाङ्गे चाभ्युक्ष्य सुवासिनीभ्यो वायनान्यमितं धनं द्विजेभ्यश्च दत्त्वाऽग्निं विशेति स चोक्त्वा गतः। साऽपि तथा कर्तुमुद्यता।।८७-८९।। विद्वद्द्विजजनानाहूय प्रायश्चित्तौपासनाग्निसिद्ध्यादि कृत्वा स्नात्वा पीतकौशेयं परिधाय हरिद्राक्ता कुङ्कुमरञ्जिता सा गङ्गायां यथाविध्याच्छन्नं शवं नाययित्वा करतलेऽग्निं धृत्वा मुदा तदग्रतो मंदं मंदं ययौ। रूपलावण्यरञ्जितां भूषितां लक्ष्मीमिव तां द्रष्टुं नार्यो नराश्च सहस्रशः एत्य हृष्टाः शीर्षाणि कम्पयन्त ऊचुः। प्राग्वयस्का बालेयं पत्या सहैति।।९०-९६।। सुखं न दृष्टम्। बालोऽपि नालोकितः। कथमेकजीवा भूत्वाऽऽनन्देन याति। काचिदहो अस्यै शंस। व्यर्थं मरिष्यसि। भूयो निवृत्य पितृगृहं व्रजेति। अन्योचे। प्राज्ञीयं सत्या नारी पतिव्रता। जगन्नाथेदृग्धियं सर्वस्त्रीभ्यो देहीति। एवं स्तुता शांता साऽग्निकुण्डसमीपे श्मशाने शवं स्थापयित्वा क्रव्यादाग्निं सुकाष्ठैः प्रज्वाल्य सुवासिनीभ्यो विप्रेभ्यश्च धान्यपूर्णसुवस्त्रकण्ठसूत्रहरिद्राकुङ्कुमादर्शादियुतवंशपात्राणि दत्त्वा गन्धादिभिः सुवासिनीः प्रपूज्य विप्रेभ्यो धनं दत्त्वा प्रार्थ्य सस्मिताऽऽह। सर्वे मामाज्ञापयन्तु।।९७-१०५।। दीपोत्सवे आह्वानमागतम्। पितृगृहं यास्ये। गौरी मे माता पिता शिवश्च प्रेम्णाऽऽह्वयति। तत्र पत्या सह व्रजे। स्वग्रामस्थानाह। चिन्तां त्यक्त्वा ग्रामं प्रति यात। श्वशुराभ्यां नः शर्म ब्रूतान्यथा ते मरिष्यतः। भीमातीरे गुरुसन्निधौ सुखेन स्तः। अत्र क्षेमं प्राप्य हर्षेण तिष्ठत इति सुहृज्जनादीनपि ब्रूतेति श्रुत्वा ते खिन्नाः। सा तु सस्मिता योगीशवचः स्मृत्वा शवकर्णयोः कण्ठे च

रुद्राक्षान्बद्ध्वा विनयेन विप्रानाह।।१०६-११५।। सङ्कल्पो मे कृतः। दृष्ट्या श्रीगुरुं वीक्ष्य शीघ्रमेत्यानुगमनं करिष्ये। भवतां रोचते किम्।।१६-१७।। त ऊचुरस्तात्पूर्वं दाहो यथा स्यात्तथा कुर्वित्युक्त्वा सा यत्र हृषीकेशस्तत्र प्रस्थिता। नरा नार्यश्च कौतुकं द्रष्टुमनुजग्मुः। गच्छन्ती साऽऽह। हे स्वामिन् नृसिंह, नौ दुर्भाग्यं तत उपेक्षसे। त्वं दाता सर्वेशः शरणदः। ते कीर्तिः श्लाघ्या। नौ कर्म तु दुर्हरम्। हे त्रिमूर्ते, त्वं त्रिगुणैरिच्छयोत्पत्तिस्थितिलयान्करोषि। तेऽग्रे सिद्धयो निधयश्च क्रीडन्ति। नौ कुबुद्धिं दृष्ट्वोपेक्षितवानसि।।१८-२५।। लोकोऽन्यायं दृष्ट्वा भूपाग्रे वक्ति। स शीघ्रं दण्ड्यं दण्डयति। रोगी वैद्यमेति स तमौषधेनागदं करोति। त्वं त्रिमूर्त्यवतारो भक्ताधार इति श्रुत्वा विंशतिग्रामानतीत्यारोग्यार्थं त्वां ध्यायन्ती शीघ्रमागताऽस्मि। भर्तृसुखा(ता)न्विता मत्तुल्या नार्योऽहं त्वशमवज्जाता। दुर्भगायाः कुतः सुतः। सदा मे भर्ता रोगी कुतः पुत्रः। पत्युरारोग्यं पुत्राश्च भविष्यन्तीत्याशयाऽगमम्। हे दयाब्धे, आशा पूर्णा। मनोरथाः फलिताः। भर्ताऽगदोऽभूत्पुत्रा अपि लब्धास्त आख्या प्रसिद्धाऽभूत्। अतोऽनुज्ञां प्राप्य ते कीर्तिं गृहीत्वा भर्त्रा सह परलोकं यास्ये।।२६-३४।। इति चिन्तयन्ती सा सङ्गमेऽश्वत्थे स्वामिनं दृष्ट्वा दूरात्साष्टाङ्गं ननाम। श्रीगुरुः सुवासिनि, ते सौभाग्यं ध्रुवमित्याह। पुनः सा भक्त्या ननाम। श्रीगुरुः पुनराहाष्टपुत्रा भवेति श्रुत्वा मन्दहास्या जना ऊचुः। स्वामिन्नस्या धवोऽत्र मृतः कथमेषा सुवासिनी। शवः श्मशानं नीतो भवदाज्ञां लब्ध्वा शीघ्रं स्वधर्मेण पतिमनुयास्यतीति श्रुत्वा हसन् श्रीगुरुराह। अस्याः सौभाग्यं स्थिरम्। कथं भर्ता मृतः शवमानयत। कदा प्राणा गता अहं वीक्ष्यामि (क्षिष्ये)।।३५-४३।। अस्याः स्थिरं सौभाग्यम्। मम वाक्यं मृषा न। प्रेतसंस्कारो न कार्यः। द्रुतं शवमानयत। इति श्रुत्वा सकौतुको लोको धावञ्छवमानेतुं ययौ।।१४४-४६।। अत्रान्तरे द्विजा गुरुमर्चितुमेत्य भक्त्या पूजामारभ्य रुद्रेण चरणेऽभिषिच्य तीर्थमानर्चुः। तावच्छवमादाय विप्रा एत्य।।४४-४९।। गुरुसम्मुखं शवं स्थापयामासुः। गुरुस्तदाच्छादनं बन्धांश्च विसर्जयित्वा तीर्थाम्बुना प्रोक्षेत्यादिशत्। ततः तीर्थेन प्रोक्षितं तं प्रभुः सुधादृष्ट्याऽपश्यत्।।५०-५२।। ततो मृतोऽपि जीवितः सोऽङ्गानि चालयन्नुपविश्य नग्नोऽहमिति -हीतः पत्न्या दत्तं वस्त्रं परिधायोपविश्य पत्नीमुपाहूयाह। त्वयाऽहं क्वानीतोऽस्मि। कोऽयं यतीश एतेषु स्थितेषु निद्रितोऽभवम्। त्वया कुतो न बोधित इति श्रुत्वा सस्मिता सर्वं शशंस। तत उभौ गुरुं नत्वा तत्पदयोः शिरो निधायास्फुटं सानन्दाश्रुयुक्तावूचतुः।।५३-५८।। आवां दोषाढ्यौ दोषानुसारीदं जन्मात्रापि दुर्धिया पापं कृत्वा दुःखाब्धौ मग्नौ। त्रिमूर्ते, ते पदे विस्मृते। सर्वजीवत्राता त्वं शिवः। हे शरणद, त्रिभुवने ते कीर्तिः ख्याता।।५९-६१।। हे सच्चिदानन्द परात्पर, त्राहि। जगद्गुरो, त्वं साक्षात्त्रिमूर्तिः। हे विश्वकृज्जगद्भर्तः कृपाब्धे, त्वं भक्ताभीष्टदोऽसि। गुरुमूर्ते, जय। त्वं जटाधरः पशुपोऽत्र भक्ततारणाय नृदेहेनावतीर्णोऽसि। हे पिनाकपाणे, त्राहि। हे देवशिरोमणे, त्वं स्वानापद्भ्यः पासि। हे वासुदेव, ते नमः। त्वं मायाप्रवर्तक इच्छया सृजसि। ज्ञानरूपोऽगोचर इति ज्ञातम्। त्रिभुवनं ते लीलाऽतः परं नौ पुनर्भवो माऽस्तु। यस्ते वचो न शृणोति तस्मै क्रुद्धोऽपि त्वं प्रशान्तो निष्कलङ्को निरावरणोऽसि। हे नानात्मकानन्तमूर्ते, ते क्रोधो न। स्वामिन्कृपाब्धे रक्ष।।६२-१७०।। हे शरणद, जीवमात्रे ते कृपा। हे पुमर्थद, त्वमिहामुत्र च सुखदोऽसि। हे चिन्मात्र करुणाकर स्वामिन्नपराधान्क्षमस्वेति नानास्तोत्रैः स्तुतस्तुष्टो गुरुस्तावाश्वास्याह। श्रीमन्तः पूर्णायुषोऽष्टपुत्रा वां भविष्यन्ति। पूर्वदोषा नष्टा देहान्ते उत्तमा मुक्तिश्च भविष्यति।।७१-७४।। मत्प्रसादाच्चतुर्विधाः पुमर्थाश्च लब्धाः। निःसंशयं गृहे सुखेन स्थेयमिति श्रुत्वाऽऽनन्दिता लोका जयध्वनिं चक्रुः। सर्वे प्रणतिं कृत्वा नीराज्य भक्त्या श्रीगुरुं तुष्टुवुः।।७५-७७।। तत्रैको धूर्तः कुधीः संशयेनाह। स्वामिन्गुरो, एकं पृच्छामि वद। मे चित्तेऽयं संशयः। वेदादिर्ब्रूते।।७८-७९।।

ब्रह्मलिखितं सत्यम्। द्विजस्यास्य महामृत्युर्दिवाऽऽगतः। ब्रह्मलिपिः सत्या चेत्कथं जीवितः स्फुटं वदेत्युक्तः श्रीगुरुर्हसन्मूर्खविप्रमाह। शृणु। विस्ताराद्वच्मि। ब्रह्मणाऽत्रास्य त्रिंशदायुरग्रजन्मनि शतायुश्च निश्चितं ततो मे भक्तहिताय व्यत्यासमकरवम्। ततो ब्रह्मलिपिः सत्येति श्रुत्वा विस्मिता लोका नत्वा स्वं स्वं स्थानं ययुरेवं कीर्तिर्दिक्षु तता। सती भर्त्रा सह स्नात्वा हृष्टा गुरुमभ्यर्च्य बहुद्रव्यं द्विजेभ्योऽदात्। सूर्योऽस्तं गतः। दम्पतीभ्यां सह श्रीगुरुर्मठं ययौ।।८०-८८।। सिद्ध आहापूर्वं श्रीगुरुमाहात्म्यम्। सावधानेनाग्रतो जातां कथां शृणु।।८९।। एवं गङ्गाधरवरसुतो यः सरस्वत्यभिख्यो मुख्योपायं भवजलनिधेस्तर्तुमुत्तर्तुकामान्।। ब्रूते सच्छ्रीगुरुचरितकं विस्तराद्ग्रन्थमेतं ये तं शृण्वन्त्यनुदिनमहो तेऽखिलाभीष्टभाजः।।९०।।

।।इति द्वात्रिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ त्रयस्त्रिंशोऽध्यायः

अथ सारसंग्रहश्लोकोऽयम्-

भुजगशिशुभृता नीता कुलयुगिह पुराग्न्याढ्ये।। स्वपुरमपि सती वेश्या तत इह विकपी भूपौ।।१।।

सिद्धपदलग्नो नामधारको नत्वा भक्त्याऽऽह। भोः सिद्धमुने, श्रीगुरुर्मठं प्राप भर्त्रा सह सती चान्वागताऽग्रतः कथां विस्तराद्ब्रूहीत्युक्तः सिद्ध आह। शृणु। परेद्युर्दम्पती गुरुमेत्य नत्वाऽऽह।।४।। यदा शोकोऽभवत्तदैको यतिरेत्य धर्मानुक्त्वा रुद्राक्षान्दत्त्वा पत्युः कर्णयोः कण्ठे च बद्ध्वा दाहं कुर्वित्याहान्यच्चोक्तं रुद्राभिषिक्तगुरुपदतीर्थेन शवस्य सर्वाङ्गानि प्रोक्ष्य स्वामिदर्शनं कुर्वित्युक्त्वा ययौ। तेऽमी रुद्राक्षाः पत्युः श्रवणयोर्गले च बद्धाः। तच्छ्रुत्वा हसन् श्रीगुरुराह। रूपान्तरेण मयाऽक्षा दत्तास्ते भक्तिर्दृष्टा।।१०।। रुद्राक्षमहिमोभयसिद्धिस्त्वं भक्ताऽस्यतो वक्ष्ये शृणु।।११।। भक्त्याऽभक्त्या वा यस्तान्धत्ते तं पापानि न स्पृशन्ति नीचमपि। तद्धारणममितपुण्यं श्रुत्यादावुक्तम्।।१२-१३।। सहस्राक्षधारी देवपूज्यः साक्षाद्रुद्रः। यद्वा बाह्वोर्द्विःषोडशैकः शिखायां करयोश्चतुर्विंशतिः, द्वात्रिंशत्कण्ठे, मस्तके चत्वारिंशच्छ्रुत्योर्द्वादश, दृशयोरेकोऽष्टोत्तरशतमुरसि धार्याः स रुद्रपुत्रसमः। प्रवालस्फटिकस्वर्णादिसहिताक्षमाला धार्यास्तत्पुण्यममितम्। बहुविधा अपि ते यथालाभे धार्याः। यत्कण्ठेऽक्षास्तस्य न पापस्पर्शः। तस्य रुद्रलोकेऽखण्डिता गतिः। तन्मालया जपेऽनन्तफलम्। रुद्राक्षभस्मपुण्ड्रवर्जितस्य व्यर्थं जन्म।।१४-२२।। मस्तके कर्णे चाक्षान्बद्ध्वा स्नानाद्गङ्गास्नानफलम्। रुद्रेण रुद्राभिषेकाल्लिङ्गार्चनफलम्। एकपञ्चैकादशादिवक्त्रा रुद्राक्षा भवापहा उत्तमाः। यथालब्धा अपि भक्त्या धार्याः पुरुषार्थदाः। पापनाशकामेषां पूर्वकथां शृणु। काश्मीरे भद्रसेनाख्यो राजा सुधर्मस्तन्मन्त्री च तत्पुत्रौ तारकः सद्गुणश्च परस्परप्रेमयुक्तौ विद्याभ्यासक्रीडादौ सह चेरतुः। तथैव प्रेम्णा भोजनादौ च तौ शिवार्चनरतौ रुद्राक्षभूषितौ भस्मतिलकौ।।२३-३२।। स्वर्णाभरणरत्नानि लोहवत्पश्यन्तौ रुद्राक्षैर्विनाऽन्यभूषणं न दधतुः। पितृबन्धुदत्ताभरणानि लोहपाषाणवज्जहतुः। तत्रैकदा साक्षाद्ब्रह्मेव पराशर आप। राजा बद्धाञ्जलिः पाद्यादिभिस्तं सम्पूज्य भक्त्या सिंहासने उपवेश्य बहुस्तोत्रैः स्तुत्वा साष्टाङ्गं नत्वाऽनन्दाश्रुसम्प्लुतो भक्त्या प्रणत आह। पुत्रयोः पिशाचत्वे कारणम् किम्। दत्तमपि रत्नादि त्यक्त्वा रुद्राक्षैर्भूषा कुरुतः। एतयोः किं ज्ञानम्। प्रकाशयैतौ त्वद्वचः श्रोष्यतः। त्वं त्रिकालज्ञोऽस्यनयोरभिप्रायं विस्तरेण वद।।३३-४१।। इति श्रुत्वा स आह। अनयोर्विस्मयकरं पूर्वजन्म शृणु। यत ईदृशौ जातौ।।४२-४३।। पुरा नन्दिग्रामे काचिद्वारस्त्री रूपलावण्यरञ्जिता पूर्णचन्द्रवद्यस्याश्छत्रं हैमं चानुत्तमासनम्। हेममयं गृहं पादुके चित्राणि नानाभरणानि च। रत्नपर्यङ्को दिव्यवस्त्राणि च। गोमहिष्याश्वदास्यो बह्व्यः। सा चन्द्राभा नवयौवना रतिवत्। दिव्यकुंकुमकस्तूर्याद्याः सर्वा भोगाः, धान्यर्द्धिः, कोटिसंख्याभिर्धनं चेदृशी ख्याता पतिव्रता धर्मज्ञा साऽन्नवस्त्रद्रव्यैर्विप्रानतोषयत्।।४४-५१।। सा भूषिता रत्नखचितमण्डपे नित्यं नृत्यति सखीभिः समम्। तत्र रुद्राक्षभूषितौ कुक्कुटमर्कटौ विनोदेन बद्धौ।

नृत्यकलया शिक्षितौ च। तत्रैकदा चित्रं जातं शृणु। शिवव्रती रुद्राक्षमण्डितः शान्तो भस्मदिग्धो वैश्यः सकङ्कणे करे सूर्याभं रत्नलिङ्गं गृहीत्वाऽऽप। वेश्या तं दृष्ट्वा गृहमानीयाभ्यर्च्य रत्नमण्डपेऽस्थापयत्। तत्करे तेजस्वि कङ्कणं लिङ्गं च दृष्ट्वा विस्मिता सखीमाह। इदं तेजोमयं कांक्षेऽस्मै पृच्छ। रत्या दास्यति चेत् त्र्यहं साध्वीत्वेनास्य भार्या भवामि।।५२-६१।। मूल्यमिच्छेच्चल्लक्षद्रव्यं दास्ये। तथेति सा तं पप्रच्छ। वैश्यो हसन्नाह। मनोहरमिदं रतिकांक्षया दास्ये। वो मुख्या पतिव्रता वाराङ्गना त्रिदिनं मे कांता चेद्दास्ये। सा तथेत्याह। वैश्य आह। व्यभिचारो हि वो धर्मः, क्व सत्यं, क्व कर्म। भर्मकारिषु वो नर्म। पुंश्चल्यां क्व धर्मवार्ता, कुलाचारो व्यभिचारः ख्यातः, प्रतिक्षणं वो मनोहरो नरो रोचते। वेश्या स्वयमाह। त्रिदिनं सती ते कुलस्त्री भवामि। याचितं देहि। पद्मिन्यहं वाङ्मनःकायैः रतिप्रसङ्गेन रमयामि। वैश्य आह। एवं चेद्दिव्यं कुरु "कर्मणा ते धर्मपत्नी भवेयमिति"।।६२-७०।। ततो वेश्या लिङ्गोपरि करं धृत्वा सूर्यचन्द्रौ साक्षिणौ कृत्वा तस्य भार्याऽभूत्।।७१।। स तत्करे कङ्कणं बद्ध्वा लिङ्गं दत्त्वाऽऽह। यथार्थं वच्मि। प्राणाधिकं मे लिङ्गं यत्नाद्रक्षास्य हानौ तत्क्षणं प्राणांस्त्यक्ष्यामि इति श्रुत्वा साऽऽह। तथाऽस्तु। प्राणवल्लिङ्गं पालयामि न संशयः। अथोभौ तुष्टौ मण्डपे उपविष्टौ तावत्सूर्योऽस्तं गतः। सा तमाहान्तःपुरं व्रजेति। वैश्य आह। रतिकाले सन्निधौ लिङ्गं न धार्यम्। शुचिस्थाने स्थापयेति श्रुत्वा सा मण्डपे रत्नस्तम्भे लिङ्गं निधाय तेन सहान्तर्गृहं गता। क्षणं क्रीडासक्तयोस्तयोः क्षणात्कर्पूरवन्नाट्यमण्डपोऽग्निना भस्मसात्कृतः।।७२-७९।। तद्दृष्ट्वा विलपन्वैश्य आहाहहा। प्राणलिङ्गं दग्धम्। तं निवार्य नागरा अग्निं वारयामासुः। शान्तेऽग्नौ तत्र मर्कटकुक्कुटौ दग्धौ। लिङ्गं भस्मसाज्जातं दृष्ट्वा वैश्यो दुःखितो विलपन्नाह। मे प्राणलिङ्गं दग्धं, प्राणांस्त्यक्ष्य इत्युक्त्वा गृहान्निर्गत्याग्निं काष्ठैः प्रज्वाल्य दग्धं मे लिङ्गमित्युक्त्वाऽग्निं विवेश। लोका विस्मिता दुःखिताश्च। वेश्याऽऽहाहहा ! पतिहत्या मेऽर्जिता। मण्डपेन सह कथं लिङ्गं दग्धम्। मे प्राणेशो वैश्यस्तन्नाशोऽभूत्तं विना साध्व्या मया क्षणं न स्थेयम्। इति निश्चित्य विप्रानाहूयानुगन्तुं विधिवद्दानानि भूषावस्त्रकोशादि द्विजेभ्यो दत्त्वेन्धनैरग्निं प्रज्वाल्य।।८०-८८।। बन्धूनाह। सतीधर्मेण भर्त्रा सह यास्ये। इति श्रुत्वा दुःखितास्त ऊचुः। केयं ते मतिः। कोऽयं धर्मः। वेश्यागृहे रत्यर्थमागच्छतां न संख्या। कथं तेऽयं पतिः, क्व वैश्यः, क्व लिङ्गं, वो नित्यनूतनः पतिः। कथं कस्य त्वं सती। लोकस्त्वां हसति। एवं बोधिताऽपि तान्साऽनादृत्याह। स मे पतिर्दिव्यं कृतं सूर्येन्दु साक्षिणौ। भूसाक्षिकं त्र्यहं तत्स्त्रीत्वमङ्गीकृतम्। स मृतः किं जीवितेन। वेदादिमतः सतीधर्मः।।८९-९८।। पदे पदे- ऽश्वमेधफलदमनुगमनम्।।९९।। सती मातृपितृभर्तृसम्बन्ध्येकविंशतिकुलानि स्वर्नयति। नरकस्थानपि तानादाय स्वर्यातीयत्पुण्यमनुगमे। किं वृथा जीवितेनासारे संसारे कदापि मृत्युः।।१००-१०२।। ततः प्रार्थये। इत्युक्त्वाऽग्निं नत्वा मुदा सर्वेशं स्मृत्वाऽर्कं नत्वाऽग्निं प्रदक्षिणीकृत्य द्विजान्नत्वाऽग्नौ देहं जहौ। तदा चित्रं जातम्। पञ्चवक्त्रः सायुधदशहस्तो भस्मलिप्तो जटिलो नन्दिवाहः शिवस्तां कराभ्यामुपर्येव दधौ। तदाऽग्निः शशाम। भक्तवत्सलो विश्वेशः प्रसन्न आह। इष्टं वरं वरय।।१०३-९।। ते परीक्षां कर्तुं धैर्यं ज्ञातुं च वैश्यरूपेणागतोऽस्मि। लिङ्गमप्यहम्। नाट्यमण्डपो दग्धो धैर्यं द्रष्टुं चाग्निप्रवेशः कृतः। त्वं सत्यं पतिव्रताऽहं ते भक्त्या तुष्टो वरं दास्ये। दीर्घायुःश्र्यारोग्यादि वरयेति श्रुत्वा वेश्या साऽऽह।।१०-१४।। इष्टबन्धुदासीदाससहितां मां ते पादसन्निधौ स्थापयेतः संसारान्मोचय। पुनरावृत्तिर्मास्त्विति पदे दधौ।।१५-१७।। प्रसन्नः शिवस्तद्भवबन्धं छित्त्वा स्वर्लोकं निन्ये। राजन्, शृणु। यौ तत्र साक्षौ मर्कटकुक्कुटौ दग्धौ तौ तत्पुण्यात्तव मन्त्रिणश्च पुत्रौ जातौ। पूर्वसंस्काराज्ज्ञानवन्तावीशभक्तौ चाज्ञानादपि रुद्राक्षधारणाद्राजपुत्रौ जातौ। पूर्वसंस्कारादद्यापि रुद्राक्षान्दधतः।

अनयोः पुण्यमितिर्नेति श्रुत्वा राजा मुनिं नत्वा पुनः पप्रच्छ। सिद्ध आह। हे नामधारकमग्रतः कथां सावधानतया शृणु।।१८-१२७।। एवं सरस्वत्यभिधोऽपि गङ्गाधरस्य पुत्रोऽथ गुरोश्चरित्रम्। वक्ष्यत्यदः श्रोष्यति यस्तु भक्त्या लभेत्त्रिवर्गं सहितं स मुक्त्या।।१२८।। श्रीगुरुसंहितायां चूर्णिकायां त्रयस्त्रिंशोऽध्यायः।।३३।।

।।इति त्रयस्त्रिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ चतुस्त्रिंशोऽध्यायः

अथ सारसंग्रहश्लोकोऽयम्-

कृतकरपुटराजप्रार्थितर्षिः सुतमृतहतये रुद्राभिषेकम्। श्रुतिपुरमितसर्गेऽकारयद्राट्तनयसुतमृतितोऽजीवयद्द्राक्।।१।।

श्रीगणेशाय नमः।। श्रीगुरुर्दम्पती आहैवं मुनिः रुद्राक्षमाहात्म्यं कुमारपूर्वजन्मचरितं चाह। तुष्टो भूपस्तत्पदे धृत्वा नत्वाऽऽह। स्वामिन्, पुत्राभ्यं रुद्राक्षधारणपुण्यं लब्धम्। अज्ञानतो धारणादपि राजपुत्रौ जातौ। ज्ञानेनाद्यापि दधतः। अनयोः कथं भावि तद्वद।।६।। भवांस्त्रिकालज्ञ इति श्रुत्वा पराशर आह। राजन्, यच्छ्रवणाद्दुःखं भवेत्तत्कथं वाच्यम्।।७-९।। पुनर्नत्वा राजाऽऽह। तदपि कथय। दुःखप्रतीकारं करिष्यसि। ऋषिराह। शृणु। ते पुत्रो द्वादशाब्दायुः। तत्र सप्तदिवसा अवशिष्टा अष्टमेऽह्नि मरिष्यतीति श्रुत्वा दुःखितो राजोच्चै रुदित्वा मुनिपदे धृत्वा स्वामिन्, शरणागतं मां पाहीति स्त्रिया सह तत्पदे पतित्वा किं करोमीत्याह। कृपाब्धिर्ऋषिस्तमाश्वास्याह। भयं त्यक्त्वा जगद्गुरुं साम्बं शूलपाणिं शिवं शरणं गत्वा भक्त्याऽऽराधय। स त्राता।।१०-१६।। भूप, शृण्वजेयमपि कलिकालं जेतुं सूपायं वच्मि। त्रिभुवने एको देवो भगवान्सच्चिदानन्दरूपः शिवो रजसा विधिं सृष्ट्वा तस्मै सृष्टिज्ञानाय चतुर्वेदान्ददौ। तेष्वात्मतत्त्वसंग्रहाख्योपनिषद्रुद्रं वेदसारं ददौ। तच्छिवाख्यं परं तत्त्वं सर्वतोऽधिकम्। पूर्वादिमुखतो विधिश्चतुर्वेदान्प्रकाशयामास। दक्षिणमुखात्कामधुग्यजुर्वेदान्तर्गतोपनिषत्सारभूतरुद्राध्यायः प्रकाशितः ।।१७-२६।। स च मरीच्यादिभ्यो दत्तस्ते च स्वशिष्येभ्यस्तेऽपि स्वशिष्येभ्यश्चाध्यापयामासुरेवं भुवि प्रवृत्तोऽयं शीघ्रसिद्धिदश्चतुर्वर्गप्रदश्च महादोषसर्वपापहर्ता परमपदप्रदो रुद्राध्यायः ब्रह्मणैकमद्भुतं रुद्रतीर्थं कृतम्। यत्स्नानात्पानाच्च तारकं, श्रीगुरूक्तमार्गेण यद्भजनाद्दुष्कर्मनाशः संसारनिवृत्तिश्च। पूर्वं बीजभूतं सुकृतं दुष्कृतं वा यदुप्तं तस्य तथैव फलम्। पुरा सृष्टिप्रवृत्त्यर्थं ब्रह्मणा स्ववक्षपृष्ठतो धर्माधर्मौ सृष्टौ।।२७-३५।। धर्मो भजतामिहामुत्र च सुखदोऽधर्मस्तूभयत्र दुःखदः। कामक्रोधलोभमत्सराद्या घोरा अधर्मसुता नरकप्रापकाः। गुरुतल्पगोपापमुखाः कामपुत्राः। मातापितृविप्रहत्याकराः क्रोधपुत्राः। देवब्रह्मपरस्वहहर्तृस्वर्णस्तेयिपुत्रीक्रयमुखा लोभपुत्राः।।३६-४१।। एतान्यम आह। भुवं गत्वा लोकान्स्वगुणैर्युक्तान्कुरुत। सहायार्थं पापोपपापभृत्यान्गृह्णतेत्युक्तास्ते भुवं गत्वा रुद्रजपं श्रुत्वा भीता द्रुतमेत्य प्राहुः।।४२-४४।। हे यमराज, जय। स्वामिन्वयं ते किङ्कराः ख्याताः। भवदाज्ञया भुवं गतास्तत्र रुद्राग्निना दग्धा इतः परं भुवं गन्तुमशक्ता नः का गतिः। यद्ग्रामे रुद्रं जपन्ति तं द्रष्टुमप्यक्षमाः। ग्रामे नदीतीरे देवालये पुण्यक्षेत्रे चास्माभिस्सुतरां दोषैर्योजिता अपि प्रायश्चित्तसहस्रैः शुद्ध्यभावेऽपि ते रुद्रजपात्पूताः पुण्यात्मानो भवन्ति।।४५-५४।। कथं नो भुवि सञ्चारः। रुद्रः कालकूटविषं भात्यतोऽस्माकं भुवि गन्तुं सर्वथा नैव शक्तिः। तच्छान्ति कुर्वस्मान्रक्षेति प्रार्थितो यमः शिरः कम्पयन् ब्रह्माणमेत्य विनयेनाह। हे स्रष्टः पद्मासन चतुर्मुख, जय। त्वां प्रपन्नोऽस्मि। भवदाज्ञयाऽद्ययावत्पापिनो नरकेषु क्षिप्ताः। अद्य तानानेतुं प्रेषिता अपि भृत्याः रुद्राध्यायेन पराभूताः। महापापोऽपि रुद्रेण पूतो दिवं याति। रुद्रेण सर्वपापं हतम्। नरकाः शून्या अभवन्मे राज्यं निरर्थकम्। स्वामिन्सर्वेषु मुक्तिं प्राप्तेषु

कुतोऽग्रतः सृष्टिरत्रोपायं कुरु। हे ईशास्मान्रक्ष। मे राज्यं गतम्।।५२-६३।। भवतैवेदृशं रुद्रनिधानं मर्त्येभ्यः कुतो दत्तम्। कथमपि रुद्रमनुष्ठाय मर्त्योऽप्यमर्त्यो भवति। रुद्रेण सर्वपापं दग्धम्। एवं प्रार्थितश्चतुर्मुखः पितामहः किञ्चिद्विचार्याह। ये दुर्मदा हीनास्तामसा अशुद्धयोऽभक्त्या शयानास्तिष्ठन्तो व्रजन्तो जपन्ति तेऽतिपापास्त एव दण्ड्याः। भक्त्योपविश्य विधिवत्पठन्ति ते वन्द्या इति दूतेभ्यः स्पष्टं कथय। भक्त्या रुद्रजापकानां ततोऽधिकपुण्यं न। पूर्वार्जितपापाद्योऽल्पायुर्भवेद्रुद्रजपेन सर्वथा तन्निष्कृतिः।।६४-७०।। भक्त्या रुद्रजपात्सर्वपापं त्यक्त्वाऽऽशु दीर्घायुः सुखी च भवेत्।।७१।। सम्पत्तिज्ञानारोग्यतेजोवर्चोबलधृतिमेधा रुद्रजपाद्वर्धन्ते।।७२।। रुद्राभिषिक्त- तीर्थपानात्स्नानाच्च पावनत्वम्। न मृत्युभयम्। रुद्रजापी पुण्यवान् चिरजीवी च। रुद्राभिमंत्रितजलस्नानाद्भीतो मृत्युः पलायते। स भवाब्धेस्तीर्णः। शतरुद्रीयेण भक्त्येशमभ्यर्च्य विपापः शतायुर्भवति। एतत्सर्वं दूतान्कथयेति श्रुत्वा यमः स्वस्थानमेत्य दूतांस्तथाऽऽदिशत्। हे राजन्, ते सुतायर्वृद्ध्यर्थममुपायं वच्मि। रुद्रायुतेनेशं क्षीरधारयाऽभिषिञ्च। ततो जीवितस्ते पुत्रो दिवीन्द्र इव राज्यं करिष्यति।।७३-८१।। क्रोधलोभवर्जिताञ्ज्ञाननिष्ठान्स्वधर्मरतान्विद्वद्विप्रानाहूय सम्भारान्सम्भृत्य विधिवच्छिवाभिषेकं कुर्विति प्रोक्तो हृष्टो राजा तथाविधान्विप्रानाहूय शतसंख्याककलशैर्विधिना भक्त्याऽखण्डैकरसधारया रुद्राभिषेकमकरोत्। तेन तीर्थेन सुतं च स्नापयामासैवमीशाराधनेन सप्ताहे प्राप्ते राजपुत्रो मूर्च्छितः पपात। तदाऽदृश्यरूपेण महान्तो दण्डपाशहस्ता भीषणा दंष्ट्राकराला यमदूता आगताः। तदा रुद्रजापकैर्विप्रैर्मन्त्राक्षताः कुमारोपरि क्षिप्ताः।।८२-९१।। दूतास्तु दूरतः पाशान्कुमारोपरि चिक्षिपुः। तदा दण्डहस्तान्हन्तुमागताञ्छिवदूतान्दृष्ट्वा भयार्ता यमदूताः पलायनपरा आसुः। पृष्ठतो लग्नाः शिवदूता अनुजग्मुः। एवं श्रुतिमंत्रै राजकुमारो रक्षितः। द्विजाः पुत्रायाशिषो ददुः। राजपुत्रः सावधानः स्थिरमनाश्चाभूत्। राजाऽप्यानन्दपूर्णो महोत्सवं चक्रे।।९२-९५।। ऋषिं सम्पूज्य विप्रान्भोजयित्वा ताम्बूलदक्षिणाभिस्तोषयित्वा महासभां विरच्य तुष्टः स्त्रिया सह भुक्तो नृपः सिंहासने पराशरं यथायथमन्यांश्चोपवेश्यानन्दितोऽभूत्तदा नारद आगतस्तं दृष्ट्वोत्थाय सम्पूज्य नत्वाऽऽह।।९६-१००।। हे देवर्षे, त्रैलोक्ये ते गमनम्। यद्यपूर्वं दृष्टं तर्हि वद। नारद आहाद्य कैलासागतोऽस्मि। मार्गे दृष्टं वच्मि। सदूतमहामृत्युस्ते पुत्रं हर्तुमागतः। स शिवदूतैः पराभूतो यममेत्याह। नः शिवदूता घ्नन्ति। वयं ते दासाः। इति श्रुत्वा कुपितो यमो वीरभद्रमेत्याह। स्वकर्मणा गतायुषं राजपुत्रमानेतुं गतान्नो दूतान्कुतः शिवदूता घ्नन्तीति श्रुत्वा कुपितो वीरभद्र आह। शृण्वस्य पुत्रस्यायुतायुः। चित्रगुप्तमपृष्ट्वा कुतो दूताः प्रेरिताः। जीवन्तस्ते दूता विसृष्टास्तदस्मद्दूतैर्न वरं कृतम्। ततो यमश्चित्रगुप्तं पप्रच्छ।।१०१-९।। स पट्टे द्वादशेऽब्देऽल्पमृत्युं तीर्त्वाऽयुताब्दाञ्जीविष्यतीति तत्रैव लिखितं दृष्ट्वा चकितो यम एत्याह। स्वामिन्नपराधं क्षमस्वेति वीरभद्रं प्रार्थ्य गत इति मया दृष्टम्। पराशरेणाद्य रुद्रानुष्ठानपुण्यतो महामृत्युं जित्वा ते पुत्रस्यायुर्वर्धितम्। इत्युक्त्वाऽऽपृच्छ्य नारदो गतः। पराशरोऽपि स्वाश्रमं ययौ। प्रस्थापिता द्विजाश्च यथागतं जग्मुः। स पुत्रोऽयुताब्दं निष्कण्टकं राज्यं शशास। एवं रुद्रमहिमा। तस्माद्यस्तेन शङ्करमर्चेस्तस्य कालभयं न। इत्थं श्रीगुरुर्दम्पतीभ्यां सविस्तरं रुद्रमाहात्म्यं शशंस। अत एव श्रीगुरो रुद्राध्यायस्य बहुप्रीतिः। तस्माद्रुद्राभिषेकेण श्रीगुरुर्नित्यमभ्यर्च्यः।।११०-१८।। गङ्गाधरजसरस्वत्युदितं चरितं गुरोः शृणोति नरः। भवसागरपरपारं यात्याप्त्वा स त्रिवर्गमार्यवरः।।११९।। इति श्रीगुरुसंहितायां चूर्णिकायां चतुस्त्रिंशोऽध्यायः।।३४।।

।।इति चतुस्त्रिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ पञ्चत्रिंशोऽध्यायः

अथ सारसंग्रहश्लोकोऽयम्-

सुरहितदा कथा वृत्ता शरपुरमित इह सोमाख्यम्। व्रतमपि यत इह सीमन्तिन्यलभदपि च दयितं नष्टम्।।

नामधारक आह। हे सिद्ध पुरा रुद्रमाहात्म्यं श्रीगुरुणोक्तं ततो वृत्ता कथा विस्तराद्वद। तत्र मे मनो लग्नम्। सिद्ध आहार्य शृणु। सा पतिव्रता श्रीगुरुं भक्त्या नत्वाऽऽह। भगवन्, सदैव ते चरणस्मरणार्थं मे मन्त्रमुपादिश। श्रीगुरुराह। स्त्रीणां पतिसेवैव साधनम्। मन्त्रो न देयः।।।१-७।। उपदेशे शुक्रस्येव दातुर्मन्त्रो हीयते। सा प्राह। श्रीगुरो, स्त्रियै मन्त्रः कुतो न देयः। शुक्रस्य किं जातम् तत्सर्वं कृपया वदेति पदलग्नाऽभूत्। श्रीगुरुराह पूर्वकथां शृणु। पुरा देवदैत्यानां युद्धमभूत्। तत्र हतं दैत्यसैन्यं शुक्रः सञ्जीवन्या जीवयित्वा युद्धाय पुनः पुनः प्रैरयत्। एकदिने इन्द्रः शिवमेत्य सर्वमाह। शुक्रं मुखे धृत्वा शीघ्रमानयेति। तथेति स नन्दी गत्वा ध्याननिष्ठं शुक्रं धृत्वा शिवाय ददौ। दैत्यकुले आकान्तोऽभूत्। शिवः शुक्रमभक्षयत्।।८-१५।। स शिवोदरे किञ्चित्कालं स्थित्वा शिवेन विस्मृतो मूत्रद्वारा बहिर्गतः। पूर्वं स भार्गवः सन् शिवशुक्रसम्पर्काच्छुक्र इति ख्यातो भूत्वा दैत्यानेत्य मृतानपि ताञ्जीवयामास। इन्द्रो विचार्य बृहस्पतिमाह। दैत्यगुरुर्दैत्याञ्जीवयति तत्र विघ्नं कुरु। त्वं ततोऽपि विवेकी। दैत्यभाग्यं पश्य। मृतानपि जीवयित्वा त??र्युद्धाय तान्प्रेरयति। त्वं तथा न करोषि। न उपेक्षसे किम्। त्वं बुद्ध्या ख्यातोऽस्यतः शीघ्रं विचारय। पूज्यस्त्वं कृपां करोषि चेच्छुक्रस्य किं वैशिष्ट्यं स त्वत्समो नेति तु??पूजयत्। स तुष्ट आह। हे इन्द्र, शृणूपायम्। षट्कर्णगे मन्त्रे मन्त्रसत्त्वं नश्यति।।१६-२५।। कश्चित् धूर्तो विद्यार्थी यत्नात्प्रेषणीयस्ततो विघ्नो भविष्यति। मत्सुतः कचस्तथैव प्रेषणीयः। स मन्त्रसारं हरिष्यति न संशय इत्युक्त्वा कचमाहूयाह। त्वं विद्यार्थीरूपेण शुक्रं गत्वाऽस्मन्निन्दां कृत्वा तं वा?नःकायैर्निवेष्य ततः सञ्जीवनीविद्यां स्वीकुर्वित्याज्ञप्तः इन्द्राद्यनुमोदितः स कचो विद्यार्थी शुक्रमेत्य साष्टा??नत्वा करुणमग्रे स्थितः शुक्रस्तमाह। कस्त्वं कुत आगतोऽसीति। स आह द्विजपुत्रोऽहं ते कीर्तिं श्रुत्वा विद्यार्थित्वेन सेवार्थमागतोऽस्मि। भक्तचिन्तामणिरनाथपरिपालको भवान्।।२६-३३।। एवं करुणं वदन्तं दृष्ट्वा शुक्रपुत्री देवयानी तातं नत्वाऽऽह।।३४।। शुभोऽयं विप्रोऽमुं शिष्यत्वे स्वीकुर्विति।।३५।। स्मरोपमोऽयं मे पतिर्भवत्विति मनसा निश्चित्य पितरं प्रार्थयत्। सोऽपि पुत्रीवात्सल्यात्तं स्वीचकार। दैत्यास्तं धूर्तं कपटी देवपक्षी विद्यामभ्यस्यायं देवान्वक्ति चेन्नो हानिरतोऽस्य नाशे यत्नः कार्यं इति विचार्य कदाचित्समिधार्थं वनं गतं कचमनुगम्य ते कचं हत्वा समिध आदाय गृहमागताः। देवयानी शुक्रमाह। कुतः कचोऽद्यापि नागतः। तं विना न भोक्ष्य इति श्रुत्वा।।४३।। शुक्रस्तं मृतं ज्ञात्वा मन्त्रेण जीवयित्वाऽऽनयत्। पुनर्द्विषो दैत्याः कालान्तरे वनं गतं कचमनु गत्वा दुर्धिया तं हत्वा पुनर्जीवयिष्यतीति भिया तद्देहं चूर्णीकृत्य दिक्षु क्षिप्त्वा गृहान् ययुः। सूर्येऽस्तं गते देवयानी पितरमाह। प्राणसखोऽद्यापि नागतः। शुक्रस्तथाविधमपि तं ज्ञात्वा जीवयित्वाऽऽनयत्। पुनर्दैत्यास्तं हत्वा हुत्वा च त??म पानेन शुक्राय ददुः।। ४४-५३।। कचमदृ??कन्याऽऽह। क्व प्रियः। तं नानयसि चेद्विषं

पिबेयम्। शुक्रो ध्यानेनेतस्ततस्तमद्??ज्ञानदृष्ट्या स्वोदरगतं ज्ञात्वाऽऽह। दैत्यैर्मत्कुक्षौ क्षिप्तः। किं तेन प्रयोजनम्। तदानयनान्मे मृत्युर्भवेत्। पुत्री आह। तत्पत्नी भूत्वा त्वन्निकटे तेन सह स्थास्येऽयं मे स??ल्पो मृषा चेन्मरिष्ये। संदिग्धः शुक्र आह। तदानयनान्मे मरणम्। पुत्री आह। सर्वप्राणदाता त्वं कथं मरिष्यसि।।५४-६३।। शुक्र आह। सञ्जीवनीं मत्तोऽन्यो न वेद। मन्त्रोऽन्यस्मै न देयः। षट्कर्णगो मन्त्रोऽसारो भवेत्। ततः कचार्थं मे मृत्युः। कन्याऽऽह। मे मन्त्रं देहीति शुक्रं जगौ। स्त्रीणां पतिसेवा। मन्त्रो न देयः। दाने चानेकदोषा दातृमन्त्रहानिश्च। तर्हि त्वं सुखेन मन्त्रजपं कुर्वहं मरिष्ये इति कन्या मूर्च्छिताऽपतत्। कन्यावत्सलः शुक्रस्तामुत्थाप्यालि?? मा भीरित्याश्वास्य मन्त्रं ददौ। ततः कचार्थं जजाप। स शुक्रकुक्षिं विदार्य निर्गतः।।६४-७३।। ततो मृतं शुक्रं देवयानी जीवयामास। मेधावी कचस्त्रिः श्रुत्वा जग्राह। स्वकार्यं सिद्धमिति तुष्टः शुक्रं नत्वाऽऽह।।७४-७६।। दैत्या द्वेषान्मा घ्नन्ति, मे विद्या लब्धा, ते कृपया कामाः पूर्णा इति पदे दधौ। हृष्टः शुक्रो गृहं गच्छेत्यादिशत्। तद्वस्त्रं धृत्वा देवयानी आह। मे पतिर्भव। त्रिवारं ते प्राणा रक्षिता विद्या च दापिता।।७७-७८।। कछ आह। गुरुपुत्री स्वसा प्राणदानाच्च माताऽतस्ते विवाहादृषयो मयि दोषारोपं कुर्युः। हेऽम्ब, भगिनी, क्षमस्व। सा कुपिताऽऽह। वृथा ते विद्याश्रमः। सर्वं विस्मर। रे कूटचित्त, मदाशा घातिताऽतो विद्यालेशोऽपि त्वयि माऽस्तु।।७९-८२।। कच आह। वृथा मे शापो दत्तः। ब्रह्मकुलातिरिक्तस्त्वां वरिष्यति। पित्रा ते सञ्जीवनी दत्ताऽतो नश्यतीति शप्त्वा गृहं गतः। देवा हृष्टाः। षट्कर्णगे मन्त्रेऽत ऊर्ध्वं दैत्या न जीविताः। अपात्रयोजनाच्छुक्रमन्त्रोऽसारोऽभूत्। ततः स्त्रीभ्यो मन्त्रो न देयः। तासां पतिसेवा धर्मः। व्रतं च गुर्वाज्ञया कार्यम्। साध्वी आह। ते वाक्यं नः प्रमाणम्। भवत्पादसेवा च व्रतम्। अथापि भक्तिदार्ढ्यार्थं कृपां कुर्विति पदे दधौ। तुष्टो गुरुराह। ते सौभाग्यस्थैर्याय ते पत्यू राजसुखाय च व्रतं वक्ष्ये।।८३-९१।। दम्पती ऊचतुः। यदादिशसि तन्नः प्रमाणम्। यो गुरुवाक्यं न भजेत्स नरकं व्रजेदिति पदे दधतुः। सिद्ध आह। हे नामधारक, कृपाब्धिः श्रीगुरुः प्रेम्णा विश्वतारकं व्रतमाह। हे दम्पती, सूतेन ऋषिभ्यः कथितं वक्ष्ये। स्त्रीणां पुंसां वा पावनं व्रतम्। स्वच्छन्दं पूर्णानन्दं निरामयमीशं यो भजेत्स सर्वेष्टभाक्। विरक्तः कामुको वा यो भजेत्तस्मै शिवः प्रसीदति। भवाब्धिं तर्तुं सोमवारव्रतम्। एतेनाशु सर्वाभीष्टसिद्धिर्मोक्षश्च ।।९२-१०१।। ईशार्चनरूपमिष्टदमेतद्व्रतानामुत्तमं व्रतम्। चतुर्वर्णाश्रमाः स्त्रियः कुमारी विधवाऽपि उपोष्य नक्तं भुक्त्वा वेन्द्रियाणि जित्वा विधिनेदमाचरेत्। अत्रार्थे स्कन्दपुराणोक्तेतिहासं सावधानेन शृणु। आर्यावर्ते धर्मात्माऽधार्मिकशिक्षकः, धार्मिकत्राता, चित्रवर्मा राजाऽभूत्। तेन पुण्यं चीर्णम्। रिपवो जिताः सर्वसम्पदश्च लब्धाः। स पराक्रमी पत्न्या सह पुत्रार्थं शिवं भेजे। दैवाद्रूपलावण्यसम्पन्ना भास्वती पुत्री जज्ञे।।२-११०।। तज्जातकं ज्ञातुमाहूता द्विजा ऊचुः। सीमन्तिनीनाम्नीयं सुलक्षणा, गौरीव म??ला, दमयन्तीव रूपिणी।।११-१२।। ग??व सत्कीर्तिः, श्रीरिव गुणाढ्याऽदितिवत्प्राज्ञी, सीतेव सती, सूर्यव??स्वती, चन्द्रवच्छान्ताऽयुताब्दं भर्त्रा सह राज्यमनुभविष्यति।।१३-१४।। इति श्रुत्वा हृष्टो राजा तेभ्यो धनं ददौ। कदाचिन्निर्भयो विप्रो राजानमाह। सुलक्षणाया अपि ते पुत्र्याश्चतुर्दशे वर्षे वैधव्यं भविष्यतीति श्रुत्वा राजा मूर्च्छितः। विप्रः निर्गतः। प्रबुद्धो दुःखार्तो राजाऽऽह। सर्वमीशाधीनमिति।।१५-१९।। ततः सप्ताब्दां सीमन्तिनीं वीक्ष्य राजाऽऽह। कथमियं देया। चतुर्दशेऽस्या वैधव्यमिति राज्ञी राजा च दुःखितौ। अङ्गणे क्रीडन्ती सीमन्तिनी तच्छ्रुत्वा साऽपि दुःखिताऽभूत्। तत एकदा गृहागतां याज्ञवल्क्यपत्नीं मैत्रेयीं नत्वा सीमन्तिन्याह। मातर्मां पाहि। सौभाग्यस्थैर्यायोपायं

ब्रूहि। मे मनः खिन्नमिति श्रुत्वा साऽऽह। सोमं शरणं याहि। सौभाग्यं स्थिरं भवेत्। कन्याऽऽह। मातस्तत्प्रकारं वद। मैत्रेय्याह। सोमवारे उपोष्य।।२०-२९।। विधिवत् स्नात्वा सुवस्त्रं परिधाय भक्त्या गौरीशं पूजय। अभिषेकात्पापनाशः, पीठार्चनात्साम्राज्यं, गन्धपुष्पार्पणात्सौभाग्यं सुखं च। धूपात्सौगन्ध्यं, दीपदानात्कान्तिः। नैवेद्यदाना??ः, ताम्बूलदानाल्लक्ष्मीर्नत्या चतुर्विधपुरुषार्थाः, जपादष्टैश्वर्याप्तिः, होमात्कोशापूर्तिः, स्तुत्या समृद्धिः, विप्रभोजनात्सर्वदेवतृप्तिः, एवं सोमवारव्रतात्पापक्लेशभयनाशः। प्राप्तमपि भयं नश्येदित्युक्त्वा सा गता। कन्या व्रतं चक्रे। तद्व?? हृष्टः पिता प्राह। यत्प्राक्तनं त??ष्यतीयं विवाहार्हा देयेति विचार्य।।३०-३८।। मन्त्रिणं प्रेषयित्वा नलगोत्रजेन्द्रसेनपुत्रं चारुं चन्द्रा??मानीय तस्मै विधिना महोत्सवेन सीमन्तिनी ददौ।।३९-४०।। तदोद्वाहार्थं प्राप्ता भूपा दानमानादिना सत्कृताः द्विजाश्च धनादिना। नानाल??युक्पारिबर्हं दासीदासांश्च वरायादात्।।४१-४२।। दुहितृवत्सलो राजा सर्वान्प्रस्थाप्य जामातरं गृहे स्थापयामास। स च भार्याप्रेम्णा तत्र स्थितः। एकदा क्रीडार्थं यमुनां गत्वोभयतीरस्थे चतुर??सैन्ये पश्यते सति हर्षाज्जले तरंश्चन्द्रा??ोऽगाधे ह्रदे निमग्नः।।४३-४७।। तत्रान्विष्य नालभन्। भृत्याः शीघ्रमेत्य तच्चित्रवर्माणमूचुः। कालिन्द्यां सकृन्मग्नोऽन्विष्टोऽपि भूयः क्वापि न दृष्ट इति। इति श्रुत्वा राजा मूर्च्छितः कन्या च प्राणांस्त्यक्तुमुद्यता। तां निवार्य तया पत्न्या सह यमुनां प्राप। सीमन्तिनी प्राह। हा देव पुरान्तक, चतुर्दशेऽब्दे वैधव्यं ज्ञात्वाऽपि शरणागतां मां न रक्षसि तेऽर्चनं वृथा किम्। ते दानं ध्रुवं श्रुत्वा शरणागतां मामुपेक्षसे ते नेयमपकीर्तिः। व्रतेन ते सौभाग्यस्थैर्यमिति मैत्रेयीवाक्यं शिरसा धृत्वा तेऽर्चनं कृतम्। हे हरे कथमुपेक्षसे।।४८-५७।। एवं विलप्य मर्तुं नदीं प्रविष्टा। राजा शीघ्रं तां धृत्वा वात्सल्येनालि?? दुःखितः। मन्त्रिपुरोहिताः सैन्यं च दुःखितम्। सर्वनदीह्रदा अन्विष्टा अपि पतिर्न प्राप्त इति सीमन्तिनी बोधिताऽपि शुशोच। राजभृत्या गत्वेन्द्रसेनाय तदूचुः। स सस्त्रीकः शोकार्तस्तत्रागतः। हा हा कुमारेति शिरस्ताडनपूर्वकं शुशोच। हा पुत्र गुणनिधे इति राज्ञी शुशोच। नागरा मन्त्री सैन्यं सर्वं दुःखितम्। हा प्राणनाथ, क्व गतोऽसीति पतितां सीमन्तिनीं दृ?? सर्वे दुःखिताः।।५८-६६।। सीमन्तिनी आह। किं वृथा जीवितेन राज्यैश्वर्येण चानुगमनं कुर्वे। राजा तद्विप्रेभ्यो न्यवेदयत्। विप्रा ऊचुः। शवं विना नानुगमनम्। मृतो वा नवेति न निश्चीयते। यावच्छवो न लभ्येत तावन्न कार्यमिति श्रुत्वा राजा पुत्रीमाश्वासयत्। भाव्यमपरिहार्यम्। विधिलेखो नान्यथा क्रियते देवैरपीतो मृषा दुःखम्। स्वपुरं प्रति यातेति पुरोहितादिभिर्बोधितौ राजानौ स्वपुरं गतौ।।६७-७२।। बोधितोऽपीन्द्रसेनो दुःखं न विसस्मार। राज्यं त्यक्त्वा शोकार्तोऽभूद्दायादैस्तत्पुरमाक्रम्योपेक्षितसर्वसुखं सस्त्रीकं तं कारायां स्थापयामासुः।।७३-७५।। चित्रवर्मा लोकनिन्दापनुत्यै मर्तुमुद्यतां पुत्रीं यत्नात्संरक्ष्याश्वास्य तामाह। मे कुले त्वमेका पुत्रवत्त्वाऽनुपालये। वर्षेऽतीते शास्त्रतो वैधव्याचारं कुर्विति श्रुत्वा साऽऽह। हा शिव, कथं मामुपेक्षसे इति। शोकार्ताऽपि सोमवारे उपोष्य नियमेन भक्त्या चेश्वरमानर्च। यत्र चन्द्रा??ो मग्नस्तत्र नागकन्या एत्य मृतप्रायं तं सुधासेचनाज्जीवयित्वा वासुकये न्यवेदयन्।।७६-८४।। चन्द्रा??श्चित्रं पुरं चन्द्रपुरीमिव पातालरचनां रत्नाञ्चितगोपुराणि।।८५।। नीलमाणिक्यवज्राद्यञ्चितगृहाढ्यं हिरण्मयं पुरं, चन्द्रकान्तिसमां भूमिं, नानारत्नाञ्चितहिरण्मयकपाटानि, महतीं सभां, तत्रासंख्यातसर्पान्मध्ये महापीठे सूर्यकान्तिं भास्वद्रत्नयुक्तानेकफणं पीतवस्त्रं नानारत्नमुकुटकुण्डलधरं भूषितानेकतरुणस्त्रीसेवितं नागराजं दृष्ट्वा साष्टा?? ननाम।।८६-९३।। नागराजः कन्या आह। कोऽयं कुत आगतः शुभलक्षणः। ता ऊचुर्नास्य वंशो ज्ञातः कालिन्द्यां लब्धोऽत्रानीतः।।९४-९५।। नागेशस्तं

पप्रच्छ। किं ते नाम, क्व जन्म, क्व देशः, किमर्थमागतोऽसि। चन्द्रा?द्ग आह। नैषधेशः पुण्यश्लोको योगिना नलस्तज्ज इन्द्रसेनस्तत्पुत्रोऽहं चन्द्रा?द्गः। श्वशुरगृहं गतो दैवाद्यमुनायां मग्नोऽभवम्। तं मामादाय कन्या आनिन्युः। सफलं मे जन्म। पूर्वार्जितान्मे सफलं जीवितम्। ते पददर्शनात् कृतार्थोऽस्मि। शेष आहाभयं तेऽस्तु। त्वं निर्मलो भासि। त्व?द्दे को देवः पूज्यते। चन्द्रा?द्ग आह। श??ः सर्वेषां देवः सदाशिवो नो दैवतम्। यद्वामा?? उमा।।९६-२०४।। यत्तेजसा जगत्स्रष्टा राजसो ब्रह्मा, यत्सत्त्वगुणाल्लोकपालो विष्णुर्यतो जगत्संहारस्तामसा एकादशरुद्राः। यः पञ्चभूतव्यापक इच्छाया स्रष्टाऽप्यसक्तोऽजश्चिन्मयो निरञ्जनः शास्त्रकृत्, यस्य शेषतक्षकौ कुण्डले व्याघ्रचर्माम्बरं च स त्रिनेत्रश्चन्द्रमौलिर्नो कुलदैवतम्।।५-११।। शेषस्तुष्टस्तमालि??? तुष्टोऽस्मि। समृद्धं राष्ट्रं ते दद्मि। भोगान्भुक्त्वा पाताल एव तिष्ठात्रत्यमुख्यरत्नानि ते दास्ये।।१२-२१४।। अनुपमं पातालं मेऽकण्टकं राज्यम्।।१५।। भूमौ स्वप्नेऽपि दुर्लभममृतमत्र कूपादिपूर्णम्। नात्र रोगपीडा मृत्युभयं च। न स्वप्नोऽत्र सुखं वसेति प्रार्थितश्चन्द्रा?द्ग आह। पित्रोरेकोऽहं पुत्रः। भार्या चतुर्दशाब्दा व्रतपराऽधुनोद्वाहोऽभूत्तत्र मनो लग्नम्। दुःखितपित्रोः पदं द्रक्ष्ये। तौ पत्नी च मां मृतं मत्वा मरिष्यन्ति। वः पदं दृष्टम्। मनो हृष्टम्। स्वेष्टदर्शनं कारयेत्युक्तः शेषोऽमृतं पाययित्वा पत्न्यर्थं च दत्त्वाऽपूर्वभूषाम्बररत्नकल्पद्रुफलानि।।१६-२४।। रक्षार्थं स्वकुमारं च दत्त्वाऽऽह। यदा मां स्मरसि तदा ते कार्यसिद्धिर्भवेत्। इत्युक्त्वा मनोवेगाश्वं दत्त्वा प्रेम्णा प्रस्थापयामास। स तं नत्वा नागपुत्रेण सहाश्वमारुह्य कालिन्द्यां यत्र मग्नस्तत्रोद्गतः।।२५-२९।। तद्दिने सोमवारे सखीभिः सह स्नानार्थमागता सीमन्तिनी तं दृ??ऽह। सखि कोऽयं नागपुत्रेण सह जलान्निर्गतः राक्षसो वेषधारी नरो वाऽश्वारूढ एति। अहो रूपमहो तेजः सूर्यवत्। यत्सुगन्धिर्दशयोजनं प्रसरति।।३०-३३।। ईदृग्दिव्यमाल्यधर ईदृक्पुरा क्वापि दृष्ट इति भाति। एवं शश्वद्दृ??दृ??भीता मत्पतिसदृश इति पतिं सस्मार।।३४-३५।। स च तां वीक्ष्याह। केयम्। प्रिया चेत्कण्ठसूत्रहारादि न दृश्यते। न च कु??ं हरिद्रा च। केयं चिन्ताग्रस्तेति विचार्योत्तीर्य तीर उपवेश्य सीमन्तिनीमाहूयाह। किं ते नाम, क्व जन्म, क्व पतिः, बाल्ये कुतो दुःखं, प्रेम्णा पृच्छामि सर्वं वद। -हीता सीमन्तिनी सखीमाह। सर्वं कथयेति। सखी आह। सीमन्तिनीयं चन्द्रा?द्गपत्नी चित्रवर्मपुत्री।।३६-४२।। अस्याः पतिरत्रैव दैवान्निमग्नोऽतो वैधव्यशोकेन दुःखिता। लावण्यं नष्टम्। सोमवारव्रतं करोत्यतः स्नानार्थमागता। राष्ट्रं हृत्वा दुःखितौ श्वशुरौ कारायां दायादैर्बद्धौ। तत इयमुपोष्य सोमवारे शिवमर्चति।।४३-४७।। सीमन्तिनी आह। कामरूपो भवान्क्वेत्थं पृच्छति। नृवदाभातोऽपि भवान्गान्धर्वः सिद्धो देवो वा किमर्थं पृच्छति। प्रेम्णा ते प्रश्नो गहनः। आप्तत्वेन स्वजन इव पतिं स्मृत्वा दीनवद्विलपन्ती भुवि पतिता।।४८-५२।। तां तथाविधां दृ??मुहूर्तं धैर्यं धृत्वाऽपि शुशोच।।५३।। चिरादश्रु प्रक्षाल्य तां करे धृत्वाऽऽह। तूष्णीं तिष्ठ, मा शुचः, सिद्धोऽहमित्युक्त्वा तां रहस्याह। ते भर्ता मे दृष्टोऽन्तिके सुखी आस्ते। व्रतप्रभावात्तृतीयेऽह्नि पश्यसि, चिन्ता माऽस्तु। स मे सखा प्राणसमः शिवशपथं वहे। नात्र संशयः।।५४-५८।। इदं नो??येति श्रुत्वा प्रेमविह्वला सा प्रेमाश्रु जहौ। मेऽयं पतिरिति शतगुणं प्रेमवृद्धं सस्मितं मुखं पद्मनेत्रे मृदुवाक्यं च नान्यः स परः कथं मे करं स्पृशेत्। स्पर्शोऽपि मृदुः।।५४-६२।। सर्वपतिचिह्नान्यत्र भान्त्यतोऽयं मे पतिर्यद्दर्शनात्प्रेमाश्रु निर्गतमित्युक्त्वा पुनः साश??ाह। कुतो दैवहीनाया मे पतिः। नेदृक्पुण्यं, मग्नः कथमेष्यति, एवं वार्ताऽपि न श्रुता, स्वप्नो वेयं भ्रान्तिर्वा। धूर्तोऽयं वेषधारी यक्षो रक्षोऽन्यो वा। किंवा मैत्रेयीवाक्ययोगादागतः पतिर्नात्र चित्रम्। ईशे प्रसन्ने किं दुर्लभम्। क्व वा दुःखम्। स

दग्धमपि ददौ। एवं चिन्तयन्तीं तामापृच्छ्य चन्द्रा?ङ्गोऽश्वमारुह्य।।६३-७०।। शीघ्रं राष्ट्रमुपेत्य नागपुत्रमाह। त्वं गत्वा मदागमं शंस। न शृणोति चेत्तं हन्मीत्याज्ञप्तो नागपुत्रो गत्वा क्रूरगिरा शत्रूनाह। सर्पदर्शनं कृत्वा पातालागतं चन्द्रा?ङ्गं द्रष्टुं शीघ्रं प्रयात। स नद्यां मृत इति मत्वा स्वामिघातः कृतो राज्यं च हृतम्। हितं वच्मि। प्राणेच्छा चेदिन्द्रसेनं राज्यारूढं कृत्वा तं शरणं यात। नो चेच्छेषेण सहायार्थं प्रेषितोऽहं वो हन्मीति श्रुत्वा भीतास्त ऊचुः। दुर्धिया न साधु कृतम्। ततः शरणं यामो नो चेन्नो हनिष्यति।।।७१-८०।। इति विचार्येन्द्रसेनं सत्कृत्य सस्त्रीकं तं सिंहासने उपवेश्यापराधान् क्षमस्व नस्त्राहीति पदं दधुः।।८१-८२।। नागपुत्र इन्द्रसेनमाह। शेषं द्रष्टुं गतस्ते पुत्रः पातालागत इति श्रुत्वा राजा पत्न्या सह मूर्च्छितः। तमुत्थाप्य नागपुत्र आह। दुःखं विस्मर पुत्रो दर्शनार्थमेतीति श्रुत्वा विशोको राजा मन्त्रिणमाहूय नगरमाल?ङ्कृमादिश्य सपरिवारः सस्त्रीको ययौ। पुरोहितादयः सर्वे मृतमप्यागतं श्रुत्वा कौतुकं दिदृक्षवो ननन्दुः। कदा पुत्रं द्रक्ष्य इति राजा त्वरयामास।।८३-८९।। वाद्यानि नेदुः। हृष्टा लोका उच्चैर्जयशब्दं चक्रुः। सर्वे ससम्भ्रमं गत्वा तं दिदृशुः। चन्द्रा?ङ्गः प्रीत्या पितरं ननाम। सानन्दाश्रुः सग?द्वाग्राजा तमालि??ङ्ग। त्वां विना शवप्रायोऽभवम्। त्वं प्राण आगतोऽसि।।९०-९३।। चन्द्रा?ङ्गो दुःखितां कृशां मातरमालि??ङ्ग। मन्निमित्तं ते कष्टम्।।९४।। पाताले सुखं भुक्त्वा ते कष्टं दत्तम्। नाहं ते पुत्रः किं तु शत्रुरहो मे भृशं कष्टं दत्तम्। मातुर्मनोऽतीव मृदु। पुत्रस्य पाषाणवत् कठिनम्। मातुर्दुःखं न वेत्ति स मल एवैकनाडीस्तन्यदानार्पणात्कथमुद्धारः। माता भवानी ततोऽन्यन्न दैवतम्।।९५-९९।। मातृदुःखदः सन्ततिहीनः सप्तजन्म दरिद्रभाग्दुर्गतिं याति। ततो भ्रातृस्वसृनागरिकाद्या द्रष्टुमागताः। तैर्हृष्टैः सहोत्सवेन नगरं प्रविश्य प्रीत्या वस्त्रभूषणैः सर्वान्सत्कृत्य सत्कृतं नागपुत्रं प्रस्थायामास। नागोपकारं निवेद्यानीतं सर्वं पित्रे दत्त्वा ननाम। इन्द्रसेन आह। मे स्नुषा दैवशालिनी। तया शिव आराधितस्तेन पुत्रस्त्रात इति दूतान्प्रैरयत्ते चित्रवर्माणं गत्वा सर्वं न्यवेदयन्।।३००-३०९।। स च तेभ्यो वस्त्रभूषणादि ददौ। ततः सपुत्रमिन्द्रसेनं महोत्सवेनानयत्। चन्द्रसेनः पत्न्याः शोकं हृत्वा पातालादानीतं दिव्यवस्तु दत्त्वाऽमृतमर्पयत्। कल्पवृक्षफलानि दिव्यवस्त्रादि च ददौ। यत्कान्तिरतीव दूरगा तैः सा भूषिता रेजे। ततस्तया सह स्वपुरमेत्य पित्रा राज्येऽभिषिक्तः सोऽयुतवर्षं राज्यं चक्रे। सोमवारे गौरीशार्चनादेवं सीमन्तिन्या इष्टार्थो लब्धः। श्रीगुरुराह। हे दम्पती, एतद्व्रतं।। ३१०-३१९।। सौभाग्याखण्डश्रीपुत्रादिदं व्रतं कुरुत। तावूचतुः। किं व्रतेन। ते सेवा तारिणी दुःखहारिणी च। त्वं प्राणनाथो देवश्च। ते चरणस्मरणमखण्डमस्तु। श्रीगुरुराह। मदाज्ञयेदं व्रतं कार्यं सैव मे सेवेति। तथेति भाषन्तौ तौ प्रस्थापयामास। तावत्पितरः प्राप्तास्ते हृष्टा बहुद्रव्यं व्ययीकृत्य ब्राह्मणान्भोजयित्वा श्रीगुरुं भक्त्या(सं-)पूज्य महोत्सवं कृत्वा श्रीगुरुणाऽऽदिष्टास्ते ग्रामं ययुः। एवं श्रीगुरोर्यशः प्रसृतम्। श्रीगुरूक्तवद्दम्पत्योर्जातम्। दीर्घायुः पञ्च पुत्राश्च जाताः।।३२०-२८।। तौ प्रत्यब्दं श्रीगुरुदर्शनं कृत्वाऽन्ते स?ङ्गतिं गतौ। एवं पवित्रं श्रीगुरोश्चरित्रं सिद्धेनोक्तं तत्सरस्वती वक्ति। भगवान्भजतां सद्यः फलदः। शर्करातोऽतिमधुरा कथा। करक?ण्दर्शनायादर्शप्रयोजनं किम्। पुरःस्थस्योपमा किमर्था। तथा गुरुकथा स्वानुभववेद्योभयसाधनं हितं गुरुभजनं शीघ्रं सर्वार्थदं च।।२९-३५।। सुलभाऽमृतप्रपेयं विन्यस्ता भूतले मया पेयम्। गुरुचरितं स्वाद्वमृतं सर्वैः सततं यतो लभेदमृतम्।।३६।। कामधुग्गुरुचरित्रपानतः पावनो भवति मानवो नतः। यस्य नाम खलु कामधुक्तु तत्सर्वकामदमशेषदोषहृत्।।३३७।। इति चूर्णिकायां पञ्चत्रिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ षट्त्रिंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

तर्कपूर्युजि हलमुखी स्त्री सुशिक्षणमिषत ईट्। आह्निकाचरणमवदच्छात्तयसंमतमु सुधिये।।१।।

नामधारको भक्त्या नत्वाऽऽह। भवतारक सिद्ध जय। त्वमज्ञानध्वान्तसूर्यः। गाढं निद्रितोऽप्यहं गुरुलीलामहाभेर्या बुद्धोऽस्मि। चिन्मयात्मना त्वया पारं नीतोऽस्मि। इति तुष्टः सिद्धोऽभयं ददौ। तदा सपुनराहाग्रतः कथामृतं पाययाद्यापि न मे तृप्तिरिति पदे दधौ। सिद्ध आहैकाग्रचित्तः शृणु ज्ञानं लभेत्। तत्रानेकचित्राणि जातान्यथापि सारं वक्ष्ये।।१-९।। अन्यथा ग्रंथो विस्तरेत्साक्षाद्विष्णववतारकथां कृत्स्नां को वदेत्। तत्रैको विरक्तः कर्ममार्गज्ञो विप्रः प्रतिग्रहपरान्नमिथ्योक्तीस्त्यक्त्वा यायावरवृत्त्या मुदावर्ततातिथिं विना न बुभुजे। तत्स्त्री कोपना तन्न सेहे। तत्र प्रत्यहं धनिनो विप्रभोजनं चक्रुः। मिष्टान्नं भुक्त्वा विप्रा अन्योन्यं प्रशशंसुः। तच्छ्रुत्वा ब्राह्मणी दुःखिताह। श्रीहरे, स्वप्नेऽपीदृगन्नं नेक्षे दरिद्रपतिं वृत्वा जन्मप्रभृति कष्टभाक्स्याम्। पूर्वार्जितानुसारी पतिर्यद्योगाद्दारिद्र्यं वीक्षे।।१०-१९।। अन्ये सस्त्रीका मिष्टाशिनस्तैः प्राक्सुकृतं कृतम्।।२०।। दैवहीनो मे पतिराहूतोऽपि न याति। नारायण किं कर्तव्यम्। एवं चिन्तान्वितायां तस्यां ब्राह्मणभोजनं कर्तुं धनी एत्य सधवां तां भोक्तुमाह्वयत् सा हर्षेण पतिमुपेत्याह। पक्वान्नदक्षिणामूल्यवस्त्रदाता विप्रो भवता समं मां भोक्तुमाह्वयति। मे मनस्तत्कांक्षते। विप्र आह। त्वं यथासुखं भोक्तुं गच्छाहं नायास्ये। इत्युक्ता , सा धनिनमेत्याह। पतिर्नैत्यमहमेष्ये। स आह। मे दम्पतिभोजनसङ्कल्पः।। २१-२९।। इति श्रुत्वा खिन्नाह। हा नारायण। प्रारब्धं प्रमाणम्। कथं मे दैवं हीनम्। पतियोगान्मेऽपि स्वाद्वन्नं दुर्लभमित्युक्त्वा श्रीगुरुमेत्य साष्टाङ्गं नत्वोचे। हितं कुरु। परान्नं भोक्तुं पतिमाज्ञापय। स न कदापि परान्नं भुङ्क्तेऽतः कृपां कृत्वा यत्नात्तं प्रेरयामन्त्रणं समीचीनं सुवस्त्रान्नादि लभ्येतेति श्रुत्वा हसञ्श्रीगुरुर्विप्रमाहूयाह। त्वं परान्नं भोक्तुं व्रज। ते स्त्रिया परान्नभोजनेच्छास्ति ।।३०-३७।। पत्या स्त्रीच्छा पूरणीया कुलस्त्रिया मनो न पीडयेत्।।३८।। विप्र आह। यद्यपि परान्नं न ग्राह्यमिति मे नियमः।।।३९।। अथापि गुरुवाक्याश्रवणे नरकोऽतस्ते वचो मूर्ध्नि धृत्वा यास्य इति गुरुमापृच्छ्य गृहं गतः। सातीव हृष्टा। ततस्तौ भोक्तुं गतौ। यजमानो विप्रभोजनं सङ्कल्प्य परिविष्टैर्नैकपक्वान्नादिभिर्भोजयामास। ब्राह्मणी भोजनसमये श्वसूकरोच्छिष्टान्नं दत्तं वीक्ष्य निर्विण्णान्नं त्यक्त्वोत्थायोच्चैस्तत्र तदेवाह। पत्युः समीपेऽपि श्वसूकरोच्छिष्टान्नमेतत्किमश्नासीत्याह। स प्राह त्वत्तो मे दैवं भग्नम्। परान्नं त्यक्तमप्यद्य श्वोच्छिष्टं भुक्तमिति कुपितस्तया सह गुरुमेत्य ननाम। श्रीगुरुर्ब्राह्मणीं प्राह। परान्नसुखं दृष्टं ते मनोरथः फलितः किम्।।४०-४८।। सा दीनाहापराधं क्षमस्व। दुर्धिया पतिर्दोषाब्धौ बलात्पातितः। द्विज आह। स्वामिन्, किं कार्यं व्रतभङ्गोऽभूत्। परान्नं न ग्राह्यमिति सङ्कल्पितमप्यनया वैरिण्या बहुदोषाः कारिताः। इत्यनुतप्तं तं गुरुराह। स्त्रीकामाः पूरिताः। सा तृप्ता। सङ्कल्पोऽपि न भग्नो मा खिदोऽयं न दोषः।।४९-५४।। कदाचिद्दैवे पित्र्ये कर्मणि विप्रालाभे तत्र भुक्तौ न दोषोऽन्यथा दोषः। विप्रो नत्वा सादरमाह। कस्मादन्नं ग्राह्यं, क्व दोषः। श्रीगुरुराह। सावधानतया शृणु।।५५-५९।। गुरुमातुलविद्वद्वैदिकश्वशुरसोदरगृहे

भोक्तव्यम्। कर्मलोपप्रसक्तौ विप्रगृहे भुक्त्वा गायत्रीजपाच्छुचिः। यो लोभी पित्रोः सकाशात्सेवां गृह्णाति, दारादीन्पीडयन्धर्मं करोति, शस्त्री, गर्वी, युद्धकृत्, वाद्यसक्तो, बहिष्कृतो, याचको, वैश्वदेवाकर्ता, धनेच्छया सर्वेभ्यो मन्त्रदाता, शिष्यसंग्रहकृत्क्रोधी, ब्रह्मद्वेषी कुलस्त्रीत्याजकः।।६०-६९।। तामसः, क्रूरः, कृपणो, दुराचारो, धनमत्तस्त्यक्तपतिपुत्रा ब्राह्मणी, स्वर्णालङ्कारकृद्द्विजः, स्त्रीजितः, स्तेयी, परदारगामी, अश्वक्रेता, भृतकाध्यापको, द्यूतकृन्निष्ठुरः, स्नानं विना भोक्ता, भगवत्कीर्तनानादरः, सन्ध्योपास्त्यकर्ता, दातृवारकोऽदाता, पितृकर्माकर्ता, द्रव्यलोभेन दम्भेन वा जपिता, कुसीदवृत्तिर्विश्वासघाती, स्त्रीघ्नः, स्वान्नदूषकः, परान्नस्तुतिकृत्पक्षपात्यन्यायी, स्वधर्मत्याजकः ।।७०-७८।। साधुद्वेषी, गुरुनिन्दकस्त्यक्तकुलदेवः।।७९।। आशयैकगृहस्थ एषामन्नं वर्ज्यम्। सर्वजातिशरणो यश्च सर्वान्नमत्ति स चण्डालो भविष्यति। तदन्नं वर्ज्यम्। पुत्रीजामातृनिर्भर्त्सकोऽपुत्र औपासनहीनो, नित्यं परान्नभुक्केवलमद्वैतवक्ता, शाठ्यात्कुक्षिम्भरिस्तदन्नाशनादन्धताऽऽयुःस्मृतिमेधा- धृतिनाशो बाधिर्यं च। नित्यं परान्नाशने स्वपुण्यनाशो दातृपापसंग्रहश्च। यथा परान्नाशने दोषस्तथा गोभूस्वर्णादिप्रतिग्रहदोषो न। परस्त्रीसङ्गेऽपि महादोषः। सदा परगृहवासाल्लक्ष्मीनाशो, दर्शे परान्नाशनान्मासपुण्यक्षयः।। ८०-८९।। आहूतो भोक्तुं गच्छेच्छूद्राहूतो न गच्छेत्। यावत्पौत्रौ न जातस्तावत्पुत्रीगृहेऽभोज्यम्। सूर्यादिग्रहे सूतके तीर्थे च न दानं ग्राह्यम्। खलराजभृत्यरजकलोहकारस्वर्णहृद्वृषलीमद्यपेभ्योऽपि न। स्वाचारवतां क्व दैन्यम्। ते सुखभाजः तदधीना देवास्तद्गृहे कामधेनुः सिद्धयश्च। मदान्धाः स्वाचारं त्यक्त्वा दरिद्राः स्युः। विप्र आह। कृपया स्वाचारं कथय। त्वं त्रिमूर्त्यवतारः कृपालुः स्वाधारश्च। श्रीगुरुराह। ऋषिप्रोक्तं स्वाचारं वक्ष्ये। कदाचिन्नैमिषारण्ये पराशर आगतः।।९०-९९।। तमभिवाद्य ऋषय ऊचुः। स्वाचारे पदे पदे संशयोऽतो गुरुं विनाचारो मनुर्वाऽग्राह्यस्त्वं गुरुरुपादिशेति प्रार्थितः पराशर आह। सर्वसिद्धिदाचारं वक्ष्ये। ब्राह्मे मुहूर्त उत्थाय भक्त्या त्रिमूर्तीन्ग्रहान्सनकादिसिद्धयोगिपितृदेवसप्ताब्धिभुवनद्वीपर्षीन्स्मृत्वा गां नत्वाचम्य मूत्रोत्सर्गं कृत्वा शुचिर्भूत्वाचामेत्स्नानपूर्वं परञ्चाधोवायुनिःसृतौ भोजनादावन्ते च क्षुते विण्मूत्रोत्सर्गशुद्ध्यन्ते।।१००-१०९।। दुःशब्दोच्चारे कुदर्शने कर्मण आद्यान्तयोश्च द्विराचामेत्। जलालाभे दक्षिणकर्णेऽग्न्यब्देववरुणार्केन्दुवाता देवतास्तत्स्पर्शादाचमनफलम्। ततो मानसस्नानं कृत्वारुणोदयपर्यन्तं गायत्रीं विना वेदं पठेत्। ततो निवीतं पृष्ठतः कृत्वा वस्त्रेण शिर आच्छाद्य दिवोदङ्मुखो रात्रौ दक्षिणमुख उपविश्य मौनीतस्ततोऽपश्यंस्तृणे मलोत्सर्गं कुर्यात्। कच्छोत्सर्गं विना मलमूत्रत्यागे शुद्धिं विना च कच्छधारणेऽनुपवेशनेन मलत्यागे च नरकः।।११०१९।। कदाचिज्जलालाभे गङ्गां स्मृत्वा लोष्टादिना शौचं कार्यम्। यावच्छुद्धि पानादि वर्जयेत्।।१२०।। हरित्तृणे पुण्यवृक्षाध्वदेवाम्बुसमीपे च नोत्सृजेत्। लिङ्गं धृत्वा जलसमीपं गत्वा शौचं कुर्यात्। वल्मीकमूषकोत्खातमार्गदेवालयक्षेत्र- तीर्थस्थमृत्तिकाऽग्राह्या। वापीकूपतडागस्था शस्तार्द्रामलकप्रमाणमृत्पिण्डो लिङ्गे एकः, गुदे पञ्च, मूत्रे प्रतिहस्तं प्रतिपदं च त्रींस्त्रीन्मलोत्सर्गे द्विगुणम्। वननस्त्रिगुणम्। यतेश्चतुर्गुणम्। रात्रावर्धम्। सङ्कटे मार्गे च तदर्धम्।।२१-२९।। शौचाच्छीघ्रं धर्मसिद्धिः। स्त्रीशूद्रानुपनीतानां गन्धलेपक्षयावधि शौचम्। ततो वर्णक्रमादष्ट षट् चतुर्द्विगण्डूषा वामतस्त्याज्याः। तत आचम्य कुलदेवं स्मरेत्। द्विजदक्षहस्ते मध्येऽग्नितीर्थं, मूले ब्राह्मं, तर्जन्यङ्गुष्ठमध्ये पित्र्यमङ्गुल्यग्रे दैवं, कनिष्ठाध आर्षम्। तैः क्रमात्प्रतिग्रहाचमनपितृदेवर्षिक्रियाः। ब्रह्मतीर्थेन केशव नारायण माधवेति त्रिरपः पीत्वा, गोविन्द विष्णो इति करौ प्रक्षाल्य, मधुसूदन त्रिविक्रमेत्यङ्गुष्ठमूलेनोष्ठौ सम्मृज्य, वामन श्रीधरेति मुखं वामकरं प्रोक्ष्य।।३०-३८।। हृषीकेश पद्मनाभेति पदे, शीर्षं च दामोदरेति संहतत्र्यंगुलिभिर्मुखं, सङ्कर्षणेति साङ्गुष्ठतर्जन्या

नासापुटे, साङ्गुष्ठानामिक्या नेत्रे श्रोत्रे च वासुदेवादिषड्भिः। साङ्गुष्ठकनिष्ठयाऽच्युतेति नाभिः, तलेन जनार्दनेति हृत्, उपेन्द्रेति सर्वाङ्गुलिभिः शीर्षं, द्वाभ्यां कराग्रेण बाहुमूलयोश्चेति। सन्ध्यावन्दनहोमादौ द्विराचामेत्। एतदसम्भवे त्रिभिस्त्रिः पीत्वा द्वाभ्यां करौ प्रक्षाल्य कर्णं स्पृशेत् शूद्रादिस्पर्शे स्नाने वान्तौ आहारे श्मशानगमने स्वान्यपादक्षालने च द्विराचामेत्। विधिवदाचामे कुतो दैन्यम्।। ३९-४७।। पर्वनन्दानवमीद्वादशीरविभौमाहश्राद्धाहवर्जं दन्तधावनम्। खर्जूरकेतकीनारिकेल- काष्ठैर्दन्तधावने चण्डालता। खादिरोदुम्बरापामार्गकरञ्जकाष्ठैर्वर्णक्रमा- द्द्वादशनवाष्टषडङ्गुलमितैर्दन्तधावनम्। आयुर्बलमिति काष्ठं छित्वा मुखदुर्गन्धीति दन्तधावनं कृत्वा नैर्ऋत्यां काष्ठं त्यक्त्वा द्वादशगण्डूषान्कृत्वाचामेत्। ततः सर्वसिद्धिदं प्रातःस्नानं यस्मात्तेजोबलायुः- प्रज्ञावृद्धिदुःस्वप्ननाशनदेववशतासौभाग्यपुष्ट्यानन्दाः।।४८-५६।। चिन्तादारिद्र्य- शोकपापघ्नं प्रातःस्नानं नित्यं कार्यं, सकृद्ब्रह्मचारिणः प्रातर्मध्याह्ने च गृहिणः व्रतिवनियतीनां त्रिकालम्। सङ्कटेऽशक्तौ चाऽपोहीतित्रिभिर्मन्त्रस्नानम्। मृदा भौमम्। सातपवृष्ट्या दिव्यम्। विष्णुध्यानं मानसम्। गुरुदर्शनं पित्रोः पादाम्बुना प्रोक्षणं तार्थस्नानम्। चण्डालस्य स्पर्शे वान्ते रते च जलावगाहनम्। शूद्रादिस्पर्शे यस्य देहो दृढस्तस्य मुख्यम्। अन्यथा गौणम्। अशक्तस्योष्णोदकेन वा। जलं स्वभावपूतमग्निस्पर्शाद्विशेषतस्तद्गृहस्थस्य मुख्यम्। गृहस्नाने सङ्कल्पाचममार्जनाघमर्षणतर्पणादि न।।५७-६६।। शीतजलमिश्रोष्णजलमापोहीति तृचा गायत्र्याभिमन्त्र्य स्नात्वाऽन्ते मार्जयेत्। पुत्रोत्पत्तिक्रान्तिश्राद्धाहव्रतपर्वसु नोष्णादिभिर्माङ्गल्योत्सवादिषु न शीतादिभिः स्नायात्। नद्यां प्रवाहाभिमुखोऽन्यत्र प्राङ्मुखः सपवित्रो बद्धशिखो मौनी स्नायात्। मार्जनाघमर्षणतर्पणादि कृत्वाऽऽचम्य समन्त्रं शुष्कवस्त्रं परिधायापवित्र इति विष्णुं स्मरेत्। रविवारेऽभ्यङ्गस्नाने ज्वरः।।।६७-७१।। चन्द्रे कान्तिहानिर्भौमे मृतिः, बुधे श्रीलाभः, गुरुशुक्रवारेऽपत्यहानिः, शनौ सम्पल्लाभः। सधवाया नित्यं शिरस्नानं न। अशक्तौ गङ्गां स्मृत्वाऽऽर्द्रवस्त्रेण देहशोधने गङ्गास्नानफलम्। काषायरक्तमलिनजीर्णदग्धैकवस्त्रधर्तुः पुण्यं राक्षसा हरन्ति।।७२-७५।। श्वेतं सोत्तरीयं ब्राह्मणस्यान्येषां रक्तादि। परिधानोत्तरं द्वारवतीगङ्गामृद ऊर्ध्वपुण्ड्रा धार्याः। पुष्टीच्छुरङ्गुष्ठेनायुष्कामो मध्यमया- ऽन्नकामो ऽनामिक्या तर्जन्यामुमुक्षुर्विष्णुसायुज्यपदां मृदं धारयेत्। नखैर्धारणात् पापम्। दशाष्टषडङ्गुलतिलका उत्तममध्यामाधमाः। शुक्ले केशवादिभिः कृष्णे सङ्कर्षणादिभिर्ललाटनाभिवक्षोगलदक्षकुक्षिबाहुकर्णवामकुक्षिभुजकर्णपृष्ठमूर्धसु तथा भस्मना तिर्यक्पुण्ड्राः च धार्यास्ततो हरिहरतोषाद्भुक्तिमुक्ती च। श्राद्धादौ विवाहादिशुभे दिनेऽभ्यङ्गे च न भस्म धार्यम्।।७६-८५।। सूतके न मृत्। तर्पणसन्ध्यादिकर्मसु दर्भपवित्रकस्यावश्यकता। कुशकाशयवोशीरगोधूमव्रीहि- कुन्दरतृणमौञ्जदूर्वा दशदर्भाः प्रत्यहं श्रावणे दर्शे वा ग्राह्यास्तेऽयातयामाः। विप्रस्य चत्वारः, क्षत्रस्य त्रयो, विशो द्वौ, शूद्रस्यैकः, पवित्रार्थं करे धार्यः।।८६-९०।। मूलेऽस्य रुद्रो, मध्ये विष्णुरग्रे विधिः। चक्रं धृत्वा विष्णुः, शूलं धृत्वा रुद्रो, वज्रं धृत्वा शक्रोऽरीन्हन्ति तथा पवित्रधारी पापं हन्ति। तृणाद्रिमग्निरिव पवित्रं पापं दहति। सग्रन्थि यज्ञादौ ग्रन्थिहीनं भोजने च पवित्रम्।।९१-९४।। प्रादेशमात्रदर्भपवित्रे करयोर्धृते कर्पूरमग्निरिवाघं हरतः। जपदानहोमादौ स्वर्णरौप्यमुद्रायुतपवित्रे धार्ये। दैवे सौवर्णी, पैत्र्ये राजती, अनामिक्यां सौवर्णी, तर्जन्यां राजती, खड्गमुद्रा कनिष्ठिक्याम्। सा जीवत्पितृकस्य न। तथा योगपट्टोत्तरीयगयाश्राद्धपादुका न। नवरत्नाङ्कितैकरत्नाङ्किता वा शस्ता। नक्षत्रयुता प्रातःसन्ध्योत्तमा, लुप्तनक्षत्रा मध्याऽर्कसहिताऽधमा। सायंसन्ध्यार्कयुक्तोत्तमा, लुप्तार्का मध्यमा, सनक्षत्राधमाऽध्यर्धयामादासायं मध्याह्नसन्ध्या। विहितादन्यत्राचरणं निष्फलम् ।।९५-२०३।। शिखां बध्वा सपवित्र आचम्येडया पूरयित्वा गृहस्थः

पञ्चाङ्गुलीभिरन्योऽल्पानामिकाङ्गुष्ठैः कुम्भयित्वा सोङ्कारा व्याहृतीः सशिरस्कां गायत्रीं च त्रिर्जपित्वा शनैः पिङ्गलया रेचयेत्। वामहस्ते स्वर्णादिपात्रे जलं धृत्वा मार्जयेत्। भिन्नं द्विमुखं मृण्मयं पात्रं वर्ज्यम्। वरान्तैर्मूर्ध्नि, नान्तैः पदे, हृदि सथान्तैरापोहीति तृचेन मार्जयित्वा प्रातः सूर्यश्चेति, मध्याह्ने आपः पुनन्त्विति, सायं चाग्निश्चेति प्राश्याप्सूक्तेन मार्जयित्वर्तञ्चेत्यघमर्षणं कृत्वाचम्य तिष्ठन्गोशृङ्गमात्रमुद्धृत्याञ्जलिना गायत्र्या त्रिरर्घ्याणि कालात्यये चतुर्थम्। तथैवोपविष्टः सायम्। मध्याह्ने आनतो हंस इत्यृचैकं च दद्यात्।।४-११।। त्रयस्त्रिंशत्कोटिमिता मन्देहसंज्ञा राक्षसाः सूर्योदये विघ्नं कुर्वन्ति ततः कर्म लुप्येत। देवानामुपोषणं जगन्नाशश्चातो वज्रास्त्रोपमार्घ्यदानाद्दैत्यनाशस्ते ब्रह्मकुलजास्तद्धत्याशान्त्यै असावादित्यो ब्रह्मेति परिक्रमाद्भूप्रदक्षिणापुण्यम्। ततो दोषनाशः। सन्ध्यायां गृहे एकगुणपुण्यम्। बहिर्दशगुणं नद्यां शतगुणम्। पुष्करादौ सहस्रम्। गङ्गायाममितम्। बहिः सन्ध्यावन्दने दिवारतिसुरापानानृतभाषणाघनाशः। जपे गृहे एकगुणं पुण्यम्। नद्यां त्रिगुणम्। वने गोष्ठे च दशगुणम्। वह्निशालायां शतगुणम्। तीर्थे सहस्रम्। हरिहरसमीपेऽनन्तफलम्।।१२-२०।। काष्ठासने दुःखमयशो ऋणम्। पल्लवे दारिद्र्यम्। पाषाणे व्याधिः। कुशे वशीकारो रोगपापनाशः प्रज्ञायुर्वृद्धिः। भस्मन्यारोग्यम्। कम्बले सुखम्। कृष्णाजिने ज्ञानम्। व्याघ्रकृत्तौ श्रीर्मोक्षश्च। व्याहृत्योपविश्य भूमिं प्रार्थ्य भूतान्युत्सार्यार्षछन्दोदैवतस्मृतिपूर्वं न्यासं कृत्वा मुद्राः प्रदर्श्य बालां बालादित्येति त्रिभिस्त्रिकालं ध्यात्वाऽऽगच्छवरद इति प्राङ्मुखस्तिष्ठन्मन्त्रार्थ- मनुसंदधानोऽङ्घ्रिछेदपूर्वकं सोङ्कारव्याहृतिगायत्रीं वस्त्राच्छन्नमालयैकाग्र्येण नासाग्रदृष्टिः शनैर्जपित्वाऽन्ते न्यासान्कुर्यात्। गायतस्त्राणाद्गायत्री मनस्त्राणान्मन्त्रः।।२१-२९।। जन्मविच्छेदपापनाशनाज्जपः वेदमूलगायत्रीजपा- द्वेदपाठफलाप्तिश्च। तं विना द्विजस्य सूकरत्वम्। जले त्रयोऽग्नयस्तत्र जपात्प्रज्ञाहानिः। प्रातर्नाभिदेशे, मध्याह्ने हृदि, सायं मुखसमीपे च जपमाला धार्या। प्रातस्तिष्ठन्तथा मध्याह्ने उन्मुखः, सायमुपवेश्य च जपेत्।।३०-३९।। गृहिणोऽष्टोत्तरशतजपः। प्रतिसन्ध्यं यतिवनिनोः सहस्रमार्तस्योत्तरशत- मष्टाविंशतिर्वा। शक्तस्याधिकजपः। मानस उत्तमः, उपांशुजपो मध्यमः, उच्चैरधमः। प्रतिपादं विरम्य सोङ्कारव्याहृतिगायत्रीजपाद्ब्रह्महत्यादि- महापापनाशोऽनन्तपुण्यं च। करशाखाङ्गुलिपर्वशङ्खमणिप्रवालस्फटिक- मौक्तिकपद्माक्षिस्वर्णमणिरुद्राक्षमालाभिरुत्तरोत्तरं दशगुणितं पुण्यम्।।४० -४९।। कुशग्रन्थिमालाऽपि बहुपुण्यदा। मणिशब्दो न कार्यः। संस्कृतमाला ग्राह्याङ्गुष्ठमध्यमाभ्यां मणिरपसार्यः मेरूल्लङ्घने त्रिः प्राणायामः। त्रिदिनं गायत्रीजपात्त्रिविधपापलयः। सन्ध्यातिरिक्ताष्टोत्तरशतवारगायत्रीजपाल्लघुपाप- नाशः। सहस्रजपादुपपापनाशः। कोटिजपान्महापापनाश इष्टकामाप्तिश्च। द्रव्यदानतो जपाच्चण्डालत्वम्। शूद्रादिसमीपे न जपेत्। जपे कण्डूयनभाषणादिवर्ज्यं अज्ञानतो दोषे कर्णं स्पृष्ट्वा विष्णुं स्मरेत्।।५०-५९।। जपे चण्डालदर्शने द्विराचमनम्। पतितादिसम्भाषणे स्नानम्। ततो मौनी जपेत्। अगत्या स्वजातीयैः सह भाषणे तद्विष्णोरिति जपः। जपे निद्रागमेऽधो वायुगतौ जृम्भणे वा क्रोधे वा कर्णं स्पृष्ट्वा सूर्यं धेनुं च दृष्ट्वेदंविष्णुरिति जपेत्।।६०-६६।। प्रातर्मध्याह्ने सौरैः सायं वारुणैर्मन्त्रैरुपस्थाय।।६७।। स्वसूत्रोक्तमन्त्रान्जप्त्वा दिगीशान्नत्वा गोत्राद्युच्चारपूर्वकं गुरुमभिवादयेत्।।६८ -६९।। तत उदितानुदितपक्षानुसारेण सायं प्रातश्चौपासनं कुर्यात्। भूस्थे खर्परस्थेऽग्नौ न जुहुयात्। विधितः कुण्डे स्थण्डिले वाऽग्निं प्रतिष्ठाप्य सूर्यास्तोदयात्प्राक्प्रादुष्कृत्य वेणुधमन्या व्यजनेन वा धमेत्। शूर्पपर्णहस्तमुखतो धमनाद्धननाशो व्याधिर्मृत्युरायुःक्षयः। समित्पुष्पदूर्वाद्याः शूद्रानीता विप्रक्रीता निन्द्याः नीवारशालितण्डुलगोधूमयवयावनालगोरसा हौम्याः।।७०-७८।। ज्वालायां समिधं हुत्वा षष्टिधान्यैः पूर्वाहुतिं ततो भूयसीं द्वितीयां हुनेत्। घृताभावे तिलतैलं तिलाश्च होम्याः। उपस्थानादि समाप्य ब्रह्मयज्ञः

त्वधुना मध्याह्नसंध्योत्तरं वैश्वदेवान्ते वा सकृत्कार्यः। जलाशये स्नात्वाचम्योपस्थं कृत्वा सपवित्राञ्जलिं दक्षजानुनि धृत्वा द्यावापृथिव्योः सन्धिं वीक्षमाणः सोङ्कारव्याहतीः पच्छोऽर्धर्चश ऋक्शो गायत्रीं स्वाध्याये शक्त्या साङ्गं वेदमनध्याये सूक्तमृचो वा जपित्वा त्रिर्नमो ब्रह्मण इति।।७९-८८।। वृष्टिरसीति च पठित्वा तर्पयेत्तत्र मुख्या दर्भा यत्र देवाः स्थितास्ततो वसुरुद्रादित्यदेवर्षिपितृतृप्तिः। ब्रह्मयज्ञो दिवा कार्यः। सङ्कटे त्रिवारं गायत्रीजपाद्वेदपाठफलम्। ततो देवतीर्थेन सयवकुशाद्भिर्देवतर्पणम्। ऋषितीर्थेनर्षितर्पणम्। पितृतीर्थेन तिलाद्भिश्च पितृतर्पणम्। पात्रे जले भूमौ न कार्यम्। भूमौ दर्भान्निधाय तत्र कार्यम्। भक्त्या नामगोत्राद्युच्चारपूर्वकं तर्पणं कार्यम्। गृहे न तिलैस्तर्पणम्। शिलाभूमिकाष्ठरोमकूपादिषु स्थापितास्तिलाः कृमिप्रायाः।।८९-९७।। श्वेता देवानां, धूम्रा ऋषीणां, कृष्णा पितॄणाम्।।९८।। देवार्थमुपवीतं ऋष्यर्थं निवीतं, पित्रर्थं प्राचीनावीतम्। एकोऽञ्जलिर्देवेभ्यो, द्वे ऋषिभ्यस्त्रयः पितृभ्यो मातृभ्यश्च, सपत्नमात्राचार्यपत्नीभ्यां द्वौ। अन्याभ्यामेकैकः। देवानां यवाः पितृणां तिलास्तृप्तिदाः। शुक्रार्कभौमनन्दातिथितारकामघाजन्मर्क्षेषु तिलतर्पणं न। विवाहव्रतचौलतः त्रिपुंसपिण्डैर्नैमित्तिकं विना वर्षतदर्धार्धं तिलतर्पणं वर्ज्यम्। सदर्भपवित्राद्भिः कार्यम्। पादक्षालनं विना स्नानं, तिलैर्विना तर्पणं, दक्षिणां विना श्राद्धं निष्फलम्।।९९-३०८।। दीपावल्यां सव्येनापसव्येन वा यमं, धर्मराजं, मृत्युमन्तकं, वैवस्वतं, कालं, सर्वभूतक्षयं, औदुम्बरं, दध्नं, नीलं, परमेष्ठिनं, वृकोदरं, चित्रं, चित्रगुप्तं च त्रिस्त्रिस्तर्पयेत्। ततः पापपीडारोगशनि- बाधापमृत्युर्न। माघशुक्लाष्टम्यां भीष्मतर्पणाद्वर्षपापनाशः। एवं ब्रह्मयज्ञो विधिवन्मध्याह्नसंध्या च कार्या। इति श्रीगुरूक्तं ते मया कथितम्। तमेव गङ्गाधरनन्दनो मनोहरं द्विजाचारमशेषतोषदम्। सरस्वती वक्ति स शृण्वतां सतामभीष्टदो दास्यति वै वरान्वरान्।।३१७।। इति चूर्णिकायां षट्त्रिंशोऽध्यायः।।

।।इति षट्त्रिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ सप्तत्रिंशोऽध्यायः

अध्यायसारसंग्रहश्लोकोऽयम्-

प्रमिताक्षरोक्तिगुरुराह सुचित्सुरपूजनादिसकलाह्निकवित्। अशनादिधर्मशयनादिविधिं स्वरपूर्मितेऽत्र हतभक्तविधिः।।३७।।

नामधारक आहाग्रतः श्रीगुरुणोक्तं वद। सिद्ध आह। साक्षान्नारायणः सर्वज्ञो दययाऽवदत्। धर्मवर्णनेऽस्य कः प्रयासो हीनमुखादपि यो वेदानवाचयत्। स भक्तकल्पद्रुः श्रीगुरुराह। गृही भूत्वाऽरणिमणिघृतश्रीखण्डकृष्णाजिनतिलान्गृहे रक्षेत्। शुक्ले सारसं नित्यं पापघ्नीं धेनुं च रक्षेत्। नित्यं गृहमुपलिम्पेत्।।८।। कांस्यं विना धातुपात्रमत्र ग्राह्यम्।।९।। वामहस्तेन कन्याशूद्रहस्तेन च न लिम्पेत्। निर्ऋतितत उपलेपः कार्यो न सान्तरः रात्रावगत्या भस्मनाद्भिः। देवालयं रङ्गवल्या रक्षयित्वाऽऽसने उपविश्य सन्ध्यावत्त्रिकालं देवपूजां कुर्यात्। अशक्तौ विधिवत् प्रातर्मध्याह्ने पञ्चोपचारः, सायं नीराजनमन्त्रपुष्पैश्चासम्भवे भोजनकाले वा। पूजाऽकरणे घोरनरको यमदण्डश्च।।१८।। जलार्काग्निपूजनान्नारायणप्रीतिः। स्वर्गापवर्गदा मानसपूजा प्रशस्ता। स्थण्डिले मध्यमाऽल्पधियां प्रतिमापूजा धेनुब्राह्मणपूजाऽपि। गुरुस्त्रिमूर्तिस्तत्पूजना- दिष्टपुमर्थलाभो ब्रह्मादितोषश्च। कलौ विष्णुना मनःस्थैर्यार्थं शालग्रामार्चनं विहितम्। सचक्रशालग्रामाम्बुपानात्पापक्षयः। गुर्वाज्ञया भक्त्या पूजा कार्या। स्त्रीशूद्रादीणां द्विजोक्ताः पौराणिकमन्त्रा न तु वैदिकाः। गुर्वाज्ञया भक्त्याऽर्चितं काष्ठाद्यपि देवो भवेत्।।१९-२८।। शुचिः पीठे उपविश्य प्राणानायम्य, येभ्यो मातेति पुङ्गन्धं निवार्य, पूजां सङ्कल्प्याङ्गन्यासं कृत्वा स्ववामतः कलशघण्टे दक्षिणे शङ्खमभ्यर्च्याऽत्मानं दक्षभागस्थपूजोपचारांश्च प्रोक्ष्य।।२९-३१।। निर्माल्यं नैर्ऋत्यां विसृज्य, धौतवस्त्रं प्रसार्य, दीपं प्रज्वाल्य मनोवाक्कायैर्गुरुं नत्वा पीठपूजां द्वारपूजां च कृत्वा स्वात्मस्थचित्कलां देवरूपां ध्यात्वा पुंसूक्तस्य प्रथमर्चाऽऽवाह्य। द्वितीययाऽऽसनं, तृतीयया पाद्यं, चतुर्थ्याऽर्घ्यं, पञ्चम्याऽऽचमनं, षष्ठ्या स्नानं, सति सम्भवे पञ्चामृतैः स्नपनम्।।३२-३७।। पुंसूक्तरुद्रादिभिरभिषेकमाचमनं च दत्वा पीठे देवं दृढं स्थापयेत्। सप्तम्या वस्त्रे आचमनम्। अष्टम्योपवीते आचमनम्। नवम्या गन्धाक्षतान्दशम्या पुष्पाणि, उत्तमान्यारामजानि, मध्यमानि वनजान्यधमानि विक्रीतानि। श्वेतान्युत्तमानि। रक्तपीतानि मध्यमानि, कृष्णचित्राण्यधमानि। पर्युषितं, सच्छिद्रं, स्वयं च्युतं च वर्ज्यम्। पद्मबिल्वतुलस्यो गङ्गाम्बुवन्न पर्युषिताः।।३८-४६।। पद्मबकुलचम्पकनागकेसरपाटलमल्लीजातिकल्हार- करवीराणि सर्वप्रियाणि। विष्णवेऽर्कपुष्पे दत्ते स्वनाशः, धत्तुरे प्रज्ञाधननाशः। गिरिकर्णिकायां कुलनाशः। कुटजे दुःखम्। शाल्मल्यां रोगः। अतो विचार्य पुष्पं देयम्। शिवाय कपित्थकेतकीशशाङ्ककरञ्जधातकीनिम्बमाधवी- बकुलकृष्णरक्त- पुष्पाणि न देयानि। श्वेतानि देयानि।।४७-५६।। गणेशाय तुलसी, देव्यै दूर्वा च न देया। एवं विचार्य पुष्पार्पणाच्चतुर्विधपुमर्थलाभः। एकादश्या धूपं, द्वादश्या दीपं, त्रयोदश्या नैवेद्यं, चतुर्दश्या ताम्बूलफलदक्षिणाः। पञ्चदश्या नीराजनम्। षोडश्या पुष्पाञ्जलिः। गर्भगृहं पृष्ठसन्मुखदेशं च हित्वा साष्टाङ्गं नमेत्। पितरौ गुरून् द्विजं च नमेत्। सभायै एको नमस्कारो न पृथक्।।५७-६५।। गुर्वादीनां वन्दनं तु कराभ्यां स्वकर्णौ स्पृष्ट्वा व्यस्तपाणिर्गुरोर्जानुप्रभृतिपादपर्यन्तं विमृज्य नमेत्। माता,

पितोपनीता, विद्यादाताऽन्नदो, भयहर्ता, सपत्नमाताऽग्रजः, पितृव्यो गुरुरेव वयोधिकमित्रेष्टज्ञानवृद्धा नमस्कार्याः वयोन्यूनमविद्यमक्षतसमित्पुष्पकुशधरं स्नानादिकर्मस्थं धावन्तं क्रुद्धं गर्वितं शवं मूर्खं हीनं च न नमेत्। नैकहस्तेन विप्रं नमेत्।।६७-७५।। गीतवाद्यैर्देवं तुष्ट्वा भक्त्या स्तोत्रैः प्रार्थ्य सनकादीनभ्यर्च्य मंत्रं जपित्वोत्तरपूजां कृत्वा देवं हृद्युद्वासयेदनेन भुक्तिर्मुक्तिश्च। पञ्चसूनदोषनाशात्मसंस्कारार्थं वैश्वदेवं सङ्कल्प्यान्नं संस्कृत्य कुण्डे ध्यातेऽग्नौ ज्वालायां विधिना प्रथमभागतः आहुतीर्दत्वा।।७६-७९।। द्वितीयभागाद्बलिहरणम्। तृतीयात्पितृदानम्। चतुर्थ्याच्छ्वकाकेभ्यः। पञ्चमात्सनकादिभ्यो देयम्। अन्नाभावे प्रवासे च धृततन्दुलफलादिना वैश्वदेवः कार्यः। वैश्वदेवकाल आगतोऽतिथिश्चण्डालोऽन्योऽपि तस्मा अन्नं देयम्। यमो दूतानाह। यद्गृहे नाऽतिथ्यं वैश्वदेवश्च।।८०-८३।। त आनेया दण्ड्याश्चेति मे विष्णोराज्ञेति। ततः पितृघ्नश्वपाकेभयोऽप्यन्नं देयम्। गात्राद्यपृष्ट्वा विप्रा भोज्याः। अतिथिवैमुख्ये पितृकोपः। वैश्वदेवात्पूर्वमप्यागताय भिक्षवेऽन्नदानाद्वैश्वदेवफलम्। स्वयं बलिं न विसृजेदविसृज्य नाश्नीयात्। अविसृज्य भुक्तौ षट्प्राणायामैः शुद्धिः। गृहाङ्गणे बलिं गवे ग्रासं च दत्वा पिण्डदानाग्नौकरणादिरहितं नित्यश्राद्धं कुर्यान्नात्र ब्रह्मचर्यम्।।८४-९३।। गोदोहमात्रमङ्गणेऽतिथिमाकांक्षेदागतं श्रान्तं भक्त्या पूज्यान्नं देयम्। सायमप्येवम्। स गुरुस्तत्तोषादग्न्यादयस्तुष्यन्ति। तत्पादक्षालनात्पितृतृप्ति- र्ब्रह्मादीनां च तुष्टिः। यदा ब्रह्मचारी यतिश्चैष्यति तदाऽन्नं देयं महाफलम्। ग्रासमात्रदत्तान्नमद्रिवत्। अल्पमप्याद्यन्तोदकदानमब्धिवत्। अतिथित्यागे श्वखरयोनि व्रजेत्। पञ्चयज्ञलोपे चान्द्रायणम्। दिवा रात्रौ भोजनमध्ये बालवृद्धैः सह भुञ्जीत। पङ्क्तिभेदे दोषः।।९४-१०३।। हस्तपादमुखार्द्रो मौनी समौ पादौ संस्थाप्य विप्रश्चतुष्कोणं मण्डलं सभस्म, क्षत्रस्त्रिकोणं, वैश्यो वर्तुलं, शुद्रोऽर्धचन्द्राकारं कृत्वा वसुरुद्रादित्यब्रह्मादीन् तत्राऽवाहयेत्। मण्डलं विनाऽशने पिशाचाद्योऽन्नरसं भुङ्क्ते। प्राक्प्रत्यङ्मुखं भोजनं शस्तम्। दक्षिणमुखं काम्यम्। पितृकृत्ये उदङ्मुखम्। विदिङ्मुखं निषिद्धम्। स्वर्णरौप्यपात्रे पद्मपलाशादिपत्रे भोक्तव्यम्।।।४-१२।। गृहस्थस्य ताम्रं वर्ज्यम्। यतेस्ताम्रस्फटिककाष्ठाश्ममयं शुभम्। कदलीगर्भपत्रपलाशमध्यपत्रवल्ली- पलाशपत्रेषु भोजने चान्द्रायणम्। वटार्काश्वत्थादिपत्रे न चान्द्रायणम्। लोहमृन्मयभूपृष्ठवस्त्रेषु च नरकः। पञ्चमानाधिकं षोडशमानपर्यन्तं कांस्यपात्रे भोजने बलायुर्यशःप्रज्ञावृद्धिः। कांस्यपात्रभोजनाभ्यङ्गताम्बूलानि न विधवाव्रतियतीनाम। एरण्डपत्रं भिन्नकांस्यपात्रं च श्वचर्मवत्। सन्ध्याकाले पतितसन्निधौ च नाश्नीयात्।।१३-२२।। न च बालैः सह। न च शूद्रभुक्तावशिष्टमश्नीयात्।। २३।। श्राद्धाहे निशि न। आपोशनं स्वयं न ग्राह्यम्। अभ्यङ्गमण्डले स्वस्य स्वयं न कार्ये। स्वयं कृते पुत्रघातायुःक्षयौ। परिवेषणकाले नत्वाऽभिधार्य पायसादिसूपान्तं परिविष्टान्नं गायत्र्या प्रोक्ष्य सत्यं त्वेति दिवा, रात्रावृतन्त्वेति पिरिषिच्य दक्षभागे चित्रबलीन्दत्वा विसृज्य हस्तं प्रक्षाल्य वामतर्जनीमध्यमाङ्गुष्ठैर्भुक्तिपात्रं धत्वाऽऽपोशनं समन्त्रं पिबेत्। आपोशनं त्यक्त्वाऽन्यद्गृहीतं चेच्छ्वमूत्रवत्। गृहीतापोशनो न नमस्कार्यः सोऽप्यन्यं न नमेत्। नाऽशिषं वदेदुभयोर्दोषः।।२३-३१।। आपोशनं विना भोजनेऽष्टोत्तरशतगायत्रीजपाच्छुद्धिः। समन्त्रमपः पीत्वाऽहं वैश्वानरोऽन्नं ब्रह्मेत्यनयोरर्थं ध्यात्वाऽग्निरस्मीति जपेत्सोऽन्नदोषैर्न लिप्यते। तर्जन्यङ्गुष्ठमध्याभिः प्राणाहुतिं, मध्यानामिकाङ्गुष्ठैरपानाहुतिं, कनिष्ठिका- नामिकाङ्गुष्ठैर्व्यानाहुतिं, तर्जनीकनिष्ठाङ्गुष्ठैरुदानाहुतिम्।।३२-४१।। सर्वाभिः समानाहुतिं च मुखे हुनेत्। दन्तैरसंस्पृशन्जिह्वया गिलेत्। स्नानेऽमौने वरुणः फलं नयेत्। होमेऽमौने श्रीनाशोऽशनेऽमौनेऽपमृत्युरसम्भवेऽपि प्राणाहुतिपर्यन्तमवश्यं धार्यम्। द्रवमधुरान्नं पूर्वं, मध्येऽम्लं, कठिणमन्ते द्रवं तिक्तं चाश्नीयात्। व्यत्यये

बलहानिर्यावद्गौर्जलं पिबति तावद्भोजनं सुखम्। यतेरष्टग्रासाः।।४२-५१।। द्वात्रिंशद्गृहिणः। षोडश वनिनो। यथेष्टं ब्रह्मचारिणः। मुखाविकारतो ग्रसेत्। उच्छिष्टं पात्रे पतितं चेत्तद्दुष्टम्। ग्रासार्धं भुक्त्वा भूयोऽविशिष्टाशने चान्द्रायणम्। नैकपात्रेऽन्यैः सहाश्नीयाद्बालानां न दोषः। लवणपायसाज्यैर्विना सर्वं सशेषमश्नीयात्। भुक्तिपात्रं धृत्वोत्सर्गे न दोषः। उपानहोः पुरो नाश्नीयात्। वेष्टितशिरा वामपादहस्तोऽश्नीयाच्चेद्रोगी तदन्नरसं रक्षोऽत्ति च। प्रसृताङ्गुलिभोजी मांसाशनदोषभाक्।।५२-६१।। गजाश्वारूढो नाश्नीयात्। देवालये श्मशाने सुप्तिस्थाने नाद्यात्। नार्द्रवस्त्रो, न बहिर्जानुकरः, करेऽन्नं धृत्वा च नाद्यात् उपवीती भुञ्जीत। ग्रासमूलादिकमर्धं खादयित्वाऽर्धं पात्रे न त्यजेत्। अस्नात्वाऽशनं कीटाशनम्। पर्णपृष्ठे नाश्नीयात्। दीपं प्रज्वाल्याश्नीयान्नान्धकारे। शान्ते दीपे पुनर्दीपमानीय पात्रस्थमश्नीयात्।।६२-६९।। केशस्पृष्टान्नं त्याज्यम्। भुक्तौ कथां न वदेन्नेतस्ततः पश्येत्।।७०।। स्त्रिया अन्नेऽनवशिष्टे दोषः।।७१।। देवपुरतः शून्यगृहेऽम्बुसमीपे च नाश्नीयात्। स्त्रियो मुखं नेक्षेत्। पत्न्या सहैककाले नाश्नीयाद्विवाहादन्यत्र। पीतावशिष्टपानं मद्यवत्तथा वस्त्राम्बुपाने च नरकः श्वयोनिश्च। सशब्दपानं पायसादेः फूत्कारपानं च मद्यवत्। तथा स्थित्वा पाने जलमध्ये पाने च दोषः। वामहस्तधृतपात्रेण पानेऽञ्जलिना पाने, एकासने, सभायां च पानेऽपि दोषः।।७२-८०।। भिन्नपात्रैर्नान्नं देयम्। रजस्वलाचण्डालदर्शने तच्छब्दश्रवणे च अन्नत्यागः। कलहमुसलादेर्यावद्ध्वनि नाश्नीयात्। पङ्क्तौ अज्ञातोपवेशे द्वारमार्गभस्मादिना पङ्क्तिभेदे न दोषः। धृतकृष्णवस्त्रया विकच्छया च दत्तान्नं निन्द्यम्। उच्छिष्टं विकिरिदेत्यादिनाऽभिमन्त्र्योच्छिष्टभाग्भ्यो भूमौ त्यक्त्वा पीतापोशनार्धं तत्र क्षिपेद्रौरव इत्यनेन।।८१-९०।। बहिर्गत्वा षड्गण्डूषोत्तरं करं मुखं च क्षालयेत्पूर्वं करक्षालने दोषस्तर्जन्या मुखशोधने नरकः। सम्यक्शुद्धः पवित्रं नैर्ऋत्यां त्यक्त्वाऽऽचम्याङ्गुष्ठेति जपित्वा नेत्रयोर्जलं क्षिपेदन्यथाऽक्षिरोगः। आयङ्गौर्द्रुपदादीत्यादि जप्त्वा नाभिमालभ्याऽचम्यागस्त्यादीन्स्मृत्वा शर्यातिमिति जप्त्वा करौ प्रतापयेत्। न ज्येष्ठभ्राता सवाससा करौ शोषयेत्। गुरुं कुलदेवं च स्मरेत्।।९१-२००।। विप्र आह। निषिद्धान्नं कथय। श्रीगुरुराह। अवैश्वदेवान्नं, बहुक्षारलवणयुक् गणान्नं, श्वेतवृन्ताकलशुनपलाण्डुछत्राकं, त्र्यहं नवोदकं, गवादेः सूतौ दशाहं क्षीरादि। दग्धान्नं नखकेशादियुक्पक्तं, मार्जारकुक्कुटस्पृष्टं, उच्छिष्टेन स्पृष्टं, हस्तेन देयं दर्व्या दत्तं , चैकहस्तदत्तं, तैलगोरसपाचितवर्ज्यं रात्रिपर्युषितमन्नं निन्द्यम्।।१-१०।। विप्रक्रीतं गोरसं, साक्षाद्वह्निपक्वं च निन्द्यम्। लड्डुवटकसत्तुलाजकन्दानि न पर्युषितम्। तिलमिश्रं दिवैव भक्ष्यम्। धात्रीकुष्माण्डपटोलमूलबिल्वानि प्रतिपदि नाद्यात्। स्वर्गापवर्गेच्छुरष्टम्यामुदुम्बरं, रात्रौ धात्रीं सप्तम्यां रविवारे च वर्जयेत्। शुक्रे बिल्वं, मन्दे शमी भक्षिता चेच्छ्रीनाशः। भोजनोत्तरं विप्राय ताम्बूलं दत्वा स्वयं भक्षेत्।।११-२०।। एकपूगदाने सुखं, द्वौ निष्फलौ, त्रयो भाग्यदाः चत्वारो दुःखदाः, पञ्च प्रज्ञाऽऽयुर्दाः।।२२।। पर्णमूले व्याधिरग्रे पापं, पर्णचूर्णं हानिदम्। पर्णपृष्ठाशनाद्धीनाशः। पर्णद्वयाशनादैश्वर्यनाशः। पर्णं विना पूगाशने दुःखं दारिद्र्यमज्ञानं च। यतिब्रह्मचारिविधवारजस्वलानां ताम्बूलाशनं मद्यमांसाशनदोषदम्। ततः श्रवणादिना दिनं नीत्वोक्तवत्सायंसंध्यामुपास्यौपासनं हुत्वाऽपेक्षा चेत्क्षीरमिश्रान्नं निशीथात्प्रागश्नीयात्।।२३-३०।। रात्रौ प्रहरपर्यन्तं वेदमभ्यस्य कृतं कर्मेश्वरार्पणं कृत्वा शयीत। पिप्पलोदुम्बरप्लक्षजम्बूकाष्ठ- गजदन्तास्थिनिर्मिता जीर्णा त्रिपदा खट्वा निन्द्या। धनिष्ठाभरणीमृगेतर- शुभर्क्षकृता दृढोत्तमा। रविवारे कृता पुत्रदा, चन्द्रे सुखदा, भौमे ज्ञे च दुःखदा, गुरौ शुक्रे च पुत्रदा, शनौ मृतिदा। गेहे प्राक्शिराः शयीत। श्वशुरालये उदक्पादः। प्रवासे प्राक्पादश्च।।३१-४०।। जलपात्रं शिरोदेशे स्थाप्य रात्रिसूक्तं पठित्वाऽगस्त्यहरिमुचकुन्दास्तिककपिलान्स्मृत्वा सर्पान्स्तुत्वा निवीती स्वपेत्। जीर्णे गृहे, तरौ च देवालये, मार्गे,

मातृपितृगुरुशयनस्थाने, वल्मीकसरोनदीस्वादुवस्तुघोरस्थलसमीपे, गुर्वादिसमीपे, खट्वायां, नग्नो वेष्टितशिरा, आर्द्रवस्त्रो, व्योमाधो रात्रेः पूर्वान्त्ययामयोः आरजसश्चतुर्थाहे स्त्रीनिकटे च न स्वपेत्। भगवीक्षणादायुःक्षयोऽतो रते दीपो वर्ज्यः। नीलवस्त्रायाः सङ्गाज्जातश्चण्डालो भवेत्। अतो गौरवस्त्रं धार्यम्।।४१-४९।। रजोदर्शनं विना सङ्गो न कार्यः। वन्ध्यां वृद्धां बहुपुत्रां विना ऋत्वतिक्रमे भ्रूणहत्यादोषः चतुर्थाहे सङ्गादल्पायुः पुत्रः षोडशाहमृतुर्विषमेऽह्नि कन्या, समेऽह्नि पुत्रः। तत्र चन्द्रबलं ग्राह्यम्। दिवा मूलमघारेवतीपर्वसु सङ्गो वर्ज्यः। तदोभाभ्यां कोपो न कार्यस्तोषे महाफलम्। निषेके यादृक्सत्त्वं तादृक्पिण्डः। एवं पराशराद्युक्तमाचारं चरेत्तस्य क्व दैन्यं, तद्गृहे कामधुग्श्रीश्च।।५०-५९।। स देववन्द्यः पुत्रादियुक्तः शतायुः कलिकालवन्द्यो ज्ञानी सन्नन्दते। कुतोऽस्य भयम्। त्वमप्येवमाचरेत्युक्तो विप्र आह। कृपाब्धे गुरो ते उपदेशो जातः। स्वभक्ततारणायावतीर्य ते ज्ञानं प्रकाशितम्। श्रीगुरुराह। त्वमेवमाचरन्सुखी भव कामं पुत्रांश्च लब्ध्वा मुच्यसे। इत्युक्तः स गतो गुरूक्तवज्जातः।।६०- ६८।। हे नामधारकैवं गुरोश्चरित्रं मूढो यतो ज्ञानी भवेत्। सुरसेयं कथाऽभीष्टार्थं ज्ञानं च दत्ते।।६९-७०।। गङ्गाधरविप्रसुतः सरस्वतीसंज्ञितो गुरोश्चरितम्। कल्पद्रुमसममवदत्सकलाभीष्टं ददाति यत्त्वरितम्।।२७१।। इति श्रीगुरुसंहितायां सप्तत्रिंशोऽध्यायः।।

।।इति सप्तत्रिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ अष्टत्रिंशोऽध्यायः

।। श्रीगणेशाय नमः।। ।। श्रीदत्तात्रेयाय नमः।।

अथ सारसंग्रहश्लोकोऽयम्-

त्रिलोकपर्याप्तकृतौदनेन सम्भोजिता विप्रमुखा अनेन।। अष्टत्रियुक्ते ह्युपजतयोऽपि भक्ताय दत्तो गुरुणा वरोऽपि।।३८।।

नामधारको विनत आहाग्रतः कथां वदेतोऽतृप्तोऽस्मि। कथामृतमलम्पाययातो मे मनः शाम्येत्।।१-२।। सिद्ध आह। तुष्टोऽस्मि। सुरसा कथा कच्चित्कालं विस्मृताऽप्यद्य स्मृता त्वन्निमित्तादयं मे लाभश्चित्रं शृणु। तत्र भाविका विप्रभोजनं चक्रुः। एकदा काश्यपगोत्रजो दीनो भास्कराख्यभक्तः श्रीगुरवे भिक्षां दातुं त्रिपुरुषभुक्तिपर्याप्तं तण्डुलादिकमानीय भक्त्या गुरुं ननाम। तद्दिने भोक्तुं भक्तैराहूतः स वस्त्रबद्धां सामग्रीं मठे संस्थाप्य भोक्तुं ययौ।।३-८।। भुक्त्वा च रात्रावेत्य सामग्रीमुपधाने धृत्वा सुष्वापैवं प्रत्यहमभूत्। लोक आह। भिक्षां दातुमेत्याऽत्मानं पुष्णात्ययम्। बहवो गुरुशिष्याः। हे द्विज किं करिष्यसि। नापि -हीणात्यद्य माधुकरीं देहीत्युपहासं श्रुत्वाऽपि स तूष्णीं तस्थौ।।९-१९।। एवं मासत्रयं व्यतीते तथैव द्विजैः कृतमुपहासं श्रुत्वा कृपाब्धिः श्रीगुरुर्भास्करमाहाद्य स्वयम्पाकं कृत्वा भिक्षां देहीति श्रुत्वा स तुष्टो नत्वाऽऽज्यं शाके चानीय स्नात्वा शुचिः पाकं चक्रे। तदाऽन्यो भक्तो यावनालान्नभिक्षार्थं गुरुं प्रार्थयत्। नेति गुरुणा प्रत्याख्याते द्विजा आहुरहो कोऽयं निर्धनो आगतः। नाद्य मिष्टान्नम्। गृहं याम इति श्रुत्वा श्रीगुरुराह। मा प्रतियातात्रैव कुटुम्बैः सह भोक्तव्यमिति श्रुत्वा द्विजा ऊचुः। सामग्री मठे विद्यते पाकं कारयिष्यतीत्युक्त्वा ते स्नातुं ययः। श्रीगुरुर्भास्करमाहानेके आहूताः शीघ्रं पाकं कुरु।।२०-२८।। स तथेत्युक्त्वा पक्त्वा न्यवेदयत्। द्विजानाह्वयेति प्रेषितः स गत्वा तानाह। पाको जातो गुरुर्व आह्वयति। त ऊचुः पर्याप्तपाकनिर्माणे रात्रिर्भविष्यति। त्वं गुरवे भिक्षां देहि। स एत्य गुरुमाह। ते नायास्यन्ति उतोपहसन्ति च। श्रीगुरुराह। ब्राह्मणैः सह भिक्षां दत्से चेद्भोक्ष्ये। स आज्ञा शिरसा धृतेत्युक्त्वा स्वगतमाह। अवतीर्ण ईशोऽयं स्वोक्तं सत्यं करिष्यतीति निश्चित्याऽह। त उपहसन्ति नायान्ति। गुरुः शिष्यं प्रेषयित्वा स्नातान्तानानीयाह।।२९-३८।। चतुःसहस्रपत्रावलीः कृत्वा कुटुम्बैः सहात्र भवद्भिर्भोक्तव्यम्। ततो भास्करमाहैनं प्रार्थयेति स तथा प्रार्थयत्। ते हसन्त आहुः। कुत आह्वयसि। एकैकसिक्थमपि नो नालम्। न लज्जसे किम्।।३९-४४।। वृद्धा ऊचुर्निन्दां मा कुरुतायं गुरूक्तवद्ब्रूते नास्य दोष इति। ततस्ते पत्रावलीश्चक्रुः। भास्करो भक्त्या गुरुमापूज्य नीराज्य पात्राण्यासाद्य गुर्वाज्ञया तत्समीपे पाकं संस्थाप्य।।४५-४८।। गुरुदत्तवस्त्रेणाच्छादयामास। श्रीगुरुर्मन्त्रितकमण्डलु- जलेन पाकं प्रोक्ष्य भास्करमाह। पात्रान्तरेणान्नमाज्यादि च नीत्वा परिवेषय। तथेति स च गुरुणाऽऽदिष्टा अन्ये च बहूनि पात्राणि पुनः पुनश्चापूर्य श्रीगुरूक्तवत् परिवेषणं चक्रुः। तदाश्चर्यं दृष्ट्वा सर्वे विस्मिताः। ततः श्रीगुरुणा सह ते सर्वे भोक्तुमारेभिरे। क्षमध्वं यूयं श्रान्ता अपेक्षितं याचित्वा स्वस्थतया भक्षतेत्याज्यादि यथेष्टं ददौ।।४९-५८।। त ऊचुरलमाकण्ठं भुक्ताः स्मः। भक्ष्यशाकादि परमान्नशर्करादि यथेष्टं ददौ। ते तृप्ता आचान्ता विस्मिता भुक्तिपात्राण्युच्चालयामासुः। द्विजस्तेभ्यस्ताम्बूलादि ददौ। ततो गुर्वाज्ञया

तेऽवशिष्टस्त्रीसुतादीनाह्वयन् तेऽपि तथा बुभुजुः। तत आहूताः शूद्रा अपि बुभुजुः। केऽवशिष्टा इति गुरुणोक्तास्तेऽन्त्यजा अवशिष्टा इत्यूचुः। सस्त्रीपुत्रान्तानप्याहूय यथेष्टमन्नं देयमिति गुरुणोक्तास्ते तथा दत्वा केऽपि न बुभुक्षिता इत्यूचुः। ततः क्षुधिता भोक्तुमायान्त्विति गुर्वाज्ञयाऽऽघोषयामासुः।।५९-६७।। कोऽपि नोपवासीति श्रुत्वा गुर्वाज्ञया भास्करो भुक्त्वा गुर्वाज्ञयाऽन्नं विलोक्य पूर्वं यावत्कृतं तावन्मात्रमवशिष्टमिति गुरवेऽकथयत्। श्रीगुरुराह। तज्जलचरेभ्यो देहि ते कामं तृप्यन्त्वित्युक्तः स तथाऽकरोत्। तद्दिने भुक्तानां चतुःसहस्रसंख्या जाता लोका विस्मिता ऊचुरहो आश्चर्यमल्पान्नैरमिता भुक्ताः। अन्ये ऊचुरत्रावतीर्णः परपुरुषो नृसिंहसरस्वती अन्नपूर्णां सस्मार। पूर्वं निशीथे ऋषिभिः सह दुर्वासाः पार्थाश्रमे ययौ। तदा भिया द्रौपद्यार्थितः कृष्ण एत्यान्नं पूरयामासेति श्रुतमिदं त्वत्र दृष्टम्।।६८- ७८।। दण्डधृङ्नरोऽप्ययं त्रिमूर्त्यवतारोऽस्य माहात्म्यं को वेद। नरोऽयमित्यमुं ब्रूयात्स दुर्गतिं व्रजेत्। ईशोऽयं न चेत्कथमन्नं पूरितम्। तथाऽन्यच्च दृष्टम्। मृतोऽप्युत्थापितः। शुष्ककाष्ठं पल्लवितं त्रिविक्रमाय विश्वरूपं दर्शितं, वन्ध्यामहिषी दुग्धा, हीनमुखाद्वेदो वाचितः, दर्शनात्कुष्ठी निर्मलीकृतः, तन्तुकः क्षणाच्छ्रीगिरिं नीतोऽन्यः काशी च। अन्यान्यप्यमितान्यस्य चरितानि वक्तुं क ईशः। आराधिता अपि देवाः सालसा भवन्ति। गुरुस्तु दृष्टयैव कामान्पूरयति ।।७७-८६।। एवं ते कौतुकं मेनिरे। श्रीगुरुर्भास्करमाह। त्वं पुत्रश्रीयुतो भवेति। नामधारकैवं गुरोश्चरितम्। ततोऽनेके शिष्या जाताः। दूरादेत्य गुरुं भेजुः। दृढभक्तिं ज्ञात्वा गुरुः प्रसीदति।।८७-८९।। गङ्गाधरस्य तनयोऽप्यत एव भक्त्या सम्प्रार्थयत्यखिललोकसमस्तकामान्। श्रीसद्गुरुः खलु ददाति कलौ युगेऽपि क्षिप्रं ततो भज भजानिशमार्तबन्धुम्।।९०।। इति गुरुसंहितायां चूर्णिकायां अष्टत्रिंशोऽध्यायः।।

।।इति अष्टत्रिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ एकोनचत्वारिंशोऽध्यायः

।। श्रीगणेशाय नमः।। । श्रीदत्तात्रेयाय नमः।।

अथ सारसंग्रहश्लोकोऽयम्-

नवत्रिमितसर्गे व्यधात्स्थविरवन्ध्याम्।। कुमारललितां पिप्पलार्चनत ईशः।।३९।।

सिद्ध आह। तत्र षष्टिवत्सरवन्ध्यायाः पुत्रौ जातौ शृणु।।१।। आपस्तम्बशाखीयः काश्यपगोत्रजः सोमनाथाख्यब्राह्मणः।।२।। वेदशास्त्रोक्तकर्मरतस्तत्पत्नी गङ्गाख्या पतिव्रता षष्टिवर्षा वन्ध्येति ख्याता पतिसेवारताऽन्वहं श्रीगुरुं सम्पूज्य नीराज्यानमत्। एवं काले अतीते तुष्टः श्रीगुरुर्हसन्तामाह। किमर्थं नीराजनादिकमानयसि। किं ते अभीष्टं वद। गौरीशो हरिः सिद्धिं नयेत्। सा नत्वाऽऽह। नापुत्रस्य लोकः। वन्ध्या महादोषा पापिनी तन्मुखं नावलोक्यमिति जनो वक्ति। यत्कुक्षौ न फलं तज्जन्म निष्फलम्।।३-१२।। अस्मत्कुले सती सूते चेन्न उद्धार इति पितरः प्रतीक्षन्ते। अपुत्रं घोरवनम्। कटौ बालं धृत्वा स्त्रियो नन्दन्ते। न तथा मे भाग्यम्। कटावादातुं पुत्रः पुत्री वा न। मे जन्म व्यर्थम्। पुत्रं विना न परलोकः। पितरोऽप्यधः पतन्ति। षष्टिवर्षाऽहं मे जन्मनालम्। भवान्तरे पुत्रवती भवेति मे वरो देयः। श्रीगुरुर्हसन्नाह। क्व भावि जन्म। कुतस्ते स्मरणम्। नित्यमारार्तिकं दत्तं तेन तुष्टोऽस्मि।।१३-२२।। इह ते शुभौ पुत्रौ भविष्यतः। सा वस्त्रान्ते ग्रन्थिं बद्ध्वा नत्वाऽऽह। स्वामिन्दयस्व। स्वामिन्नजोदर्शनमपि मे न कुतः पुत्रः। पुत्रार्थं नानातीर्थव्रतानि सेवितानि। ते कामपूर्तिर्भवेदश्वत्थं भजेति लोकेनोक्तम्। विश्वासेन मयाऽश्वत्थप्रदक्षिणाः कृताः। अद्यापि करोमि नेह पुत्रश्चेद्भवान्तरे भविष्यतीति भजे। स्वामिन्निह जन्मनि पुत्रं दित्से त्वं स्वयं नृहरिर्न ते वाक्यं मृषा।।२३-३१।। इति मे निश्चयो ग्रन्थिर्बद्धः। भवता सुहास्यं कृतम्। किमर्थं भाविजन्मपुत्रेच्छा इहैव पुत्रीपुत्रौ दास्यसि। प्रयासान्मौर्ख्येणाश्वत्थसेवा कृता स मे किं दास्यति।।३२-३४।। हसन् श्रीगुरुराह। अश्वत्थसेवा महापुण्या तन्निन्दां मा कुरु। ते पुत्रो भविष्यति।।३५-३६।। मद्वाक्याद्भीमामरजासङ्गमस्थाश्वत्थं भज। तत्रान्वहं तिष्ठे मया सह तं भज। तन्माहात्म्यं पुराणादिषूक्तम्। यत्र मे वासः सोऽश्वत्थो नारायणः। सा प्राह। अश्वत्थमाहात्म्यं शंस। तच्छ्रुत्वा मनः स्थिरीकृत्य तं भक्त्या भजे।।३७-४१।। श्रीगुरुराह। व्यर्थं तं निन्दसि। तत्र देवा वसन्ति। ब्रह्माण्डपुराणे तन्माहात्म्यं नारदेनोक्तम्। त्रिभुवनं पर्यटन्नारदो ऋष्याश्रमं ययौ। ता पाद्यादिभिरापूज्यापृच्छन्नश्वत्थमाहात्म्यं वदेति। नारद आह। अद्य ब्रह्मलोके ब्रह्माणमपृच्छम्। अश्वत्थं नारायणस्वरूपमाहुः स कथं सेव्यस्तन्माहात्म्यं कीदृगिति पृष्टो ब्रह्माऽऽह। तन्मूलेऽहं, मध्ये विष्णुरग्रे शिवोऽस्ति। तथैव दक्षिणपश्चिमोत्तरशाखासु च।।४२-५१।। पूर्वत इन्द्रादयः। शाखासु वसुरुद्रादित्याः। विप्रर्षिवेदा अङ्कुरादिषु नदीतीर्थाब्धयश्च। अकारो मूले, उकारः स्कन्धेषु, मकारः फलादिष्वेवंविधोऽश्वत्थस्तन्माहात्म्यं को वदेत्। ईदृशः कामदो न किम्। ऋषय ऊचुः। केन विधिनाऽयं सेव्यः पुराऽथर्वणोक्तमपि ब्रह्मर्षेस्त्वत्तः श्रोतुमिच्छामः। नारदा आह। ब्रह्मणोक्तं वक्ष्ये।।५२-६२।। चैत्राषाढपौषगुरुशुक्रास्तादिषु चन्द्रप्रातिकूल्ये च नाऽरभेत्। शुभकाले शुचिरुपोषितो भजेत्। रविचन्द्रभृगुवारे क्रान्तौ

पर्वपातदुर्दिनरात्रिरिक्तास्वपराह्णे चाश्वत्थं न भजेत्। निन्दापाखण्डवादद्यूतादि त्यक्त्वा सचैलं स्नात्वा निर्मलं वस्त्रं वसित्वा गङ्गायमुनाजलकलशौ संस्थाप्याभ्यर्च्य पुण्याहं वाचयित्वा कामं सङ्कल्प्य भक्त्याऽश्वत्थं कलशादिभिः सप्तवाराभिषिच्य शङ्खचक्रवरखड्गखेटकचापेष्वभयहस्तं श्रीयुतं विष्णुरूपाश्वत्थं ध्यात्वा।।६३-७२।। सम्पूज्य सूत्रेण वस्त्रेण वाऽऽवेष्ट्य मनोवाक्कायैर्नियतःपुंसूक्तेन सजलकुम्भगर्भिणीवन्मन्दगत्या पुंसूक्तेन सहस्रनामभिर्मौनेन वा प्रदक्षिणाः कुर्यात्। आदिमध्यावसानेषु नमेत्। प्रतिपदं मेधफलम्। द्विलक्षप्रदक्षिणातो ब्रह्महत्यानाशः। त्रिमूर्तिवासाश्वत्थसेवना-द्गुरुतल्पादिपापनाशः।।७३-८२।। व्याध्यृणग्रहबाधाजन्मजरामृत्युभयसंसारनाश- श्चतुर्विधपुरुषार्थलाभश्च। पुत्रप्राप्तौ न विलम्बः। मन्दवारेऽश्वत्थं स्पृष्ट्वा मृत्युञ्जयजपे कालपरिहारः कुतोऽल्पमृत्युः। पूर्णायुर्लभेत्। सार्धसप्तवर्षादि- शनिपीडार्तः कोणस्थ इति जपेत्।।८३-९०।। कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः। सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः। एवं दृढविश्वासेन भजनात्पुत्रलाभो न संशयः।।९१।। अमायां गुरुवारे तच्छायाजलस्नानाद्ब्रह्मत्यानाशः।।९२।। तत्रैकविप्रायान्नदानात्कोटिविप्रभोजन- फलम्। एकमन्त्रजपाद्वेदपाठफलम्। अश्वत्थस्थापनाद्द्विचत्वारिंशत्पूर्वजानां ध्रुवं स्वर्वासः। अश्वत्थच्छेदनात्पितृभिः सह चिरं नरकः। तदधः पञ्चयज्ञानुष्ठानादक्षय्यपुण्यम्। अथोद्यापनम्। प्रदक्षिणादशांशेन होमस्तद्दशांशेन ब्राह्मणभोजनम्। एवं ब्रह्मचर्येण हविष्याशी व्रतं कृत्वा सौवर्णाश्वत्थं सालङ्कृतां सवत्सां धेनुम्।।९३-१०२।। वस्त्राच्छन्नतिलराशिं च सदक्षिणं सुशीलकुटुम्बिविप्रेभ्यो दत्वाऽभीष्टं लभेत्। एवं नारदोक्तं यो भक्त्याऽऽचरति स सर्वाभीष्टं लभेत्। हे वन्ध्ये। अश्वत्थमहिमा कथितः संशयं त्यक्त्वा त्वमेवाचर। सङ्गमे नः स्थानं कल्पद्रुमोऽश्वत्थः तत्सेवां कुरु। ते पुत्रौ भविष्यतः इति श्रुत्वा नमस्कृत्य साऽऽह। षष्टिवर्षा जातिवन्ध्याऽहं कुतो मे पुत्रः। अथापि ते वचनं स्वीकुर्वे गुरुवाक्यं कामधेनुं मत्वा भक्त्या भजे। किमश्वत्थेन यथोक्तवद्भवत्पादसेवां कुर्वे इत्युक्त्वा षट्कूलतीर्थे स्नात्वा गुरूक्तवदश्वत्थं भेजे सा।।३-१२।। तृतीयरात्रौ स्वप्ने कश्चिद्विप्र एत्य हस्तं दत्वाऽऽह 'ते कामसिद्धिर्जाता। गन्धर्वपुरे श्रीगुरुं भक्त्या प्रदक्षिणीकृत्य नमस्कुरु। यद्दास्यति तद्भुंक्ष्व। शीघ्रं ते कार्यं सिद्ध्येदि'ति दृष्ट्वोत्थाय चतुर्थेऽह्नि कल्पद्रुमाश्वत्थसेवां कृत्वा श्रीगुरुमेत्य मुदा ननाम। गुरुः प्रहसन्द्वे फले दत्वाऽऽह। फले भक्ष, पारणां कुरु, ते कामसिद्धिर्जाता, पुत्रीपुत्रौ प्रदत्तौ न संशयः। इत्युक्ता सा गुरूक्तवद्दानानि दत्वा विधिना पारणां कृत्वा फले बुभुजे।।१३-२२।। तद्दिने गुरुप्रसादान्निष्कलाऽपि सा रजस्वला जाता। त्रिदिनं श्वेतवस्त्रा हविष्याशना सा मौनेनास्थाय चतुर्थेऽह्नि सुस्नाता सा मुदं गुरुं दृष्ट्वा पञ्चमेऽह्नि पत्या सह गृहमेत्य पतिसङ्गात्तद्दिने गर्भं दधौ। अतः कन्या जाता। तां गर्भिणीं दृष्ट्वा सर्वेऽन्योऽन्यमूचुः अहो नवं चित्रम्। निष्कला गर्भिणी जाता, सोमनाथो भाग्यवान्।।२३-२९।। तुष्टस्तत्पतिर्गुर्वाज्ञया पुंसवनादि चक्रे।।३०।। अष्टमे मासि सीमन्तोन्नयनं च। तुष्टा सा गुर्वाज्ञया वन्ध्यायाः पलिक्न्या(शुक्लकेशायाः) गर्भधारणं वायनदानादि च दृष्ट्वा साश्चर्या लोका ऊचुः। सद्यो वरदः श्रीनृसिंहसरस्वती प्रसन्नश्चेत्पुरुषार्थाः सुलभाः। भुवि भक्तान्त्रातुं त्रिमूर्त्यवतारोऽयं प्रादुरासेति। गर्भिणी वायनानि दत्वा गुरुमेत्यानमत्। तुष्टो भक्तवत्सल आशिषं ददौ। सा नत्वा विनयेनाह त्रिमूर्ते जय। प्रसादान्मे देहः पावितः। भक्तरक्षार्थं त्रिमूर्तिस्त्वमवतीर्णोऽसि सत्यम्।।३१-४०।। कृपाब्धेऽनन्तमहिमन्स्वामिंस्त्वां स्तोतुं कः शक्त इति स्तुत्वा गुरुणाऽऽज्ञप्ता गृहं गता। काले शुभेऽह्नि कन्याऽसूत। दैवज्ञा जातकं दृष्ट्वोचुः। कन्येयं शुभलक्षणाऽस्याः कुलवृद्धिर्भविष्यतीति। हृष्टः सोमनाथस्तेभ्यो धनं ददौ। सूतकेऽतीते सुस्नाता सधवा ससुता सा गुरुमेत्याग्रे पुत्रीं निधाय भक्त्या साष्टाङ्गं

ननाम। पुत्रवति उत्तिष्ठेति प्रेम्णोत्थापिता सा श्रीगुरुमाह। सरस्वतीयं लब्धा न पुत्रः। स्ववाक्यं स्मर। श्रीगुरुर्हसन्नाह। संशयं मा कुरु। पुत्रो भविष्यतीति।।४१-४९।। इत्युक्त्वा कन्यामादायाऽह। इयं पूर्णायुः सौभाग्यवती सती धर्मरता सुशीला ख्याता बहुपुत्रपौत्रा भविष्यति। अस्या दर्शनाय दक्षिणदेशीयो राजाऽऽगमिष्यति। अस्याः पतिर्ज्ञानी वेदपारगश्च भविष्यति। अस्याः कुले ऐश्वर्यं स्थास्यति। पुत्रो वां कीदृगपेक्षितः शतायुर्मूर्खोऽल्पायुर्विद्वान्वा। गङ्गाऽऽह। विद्वान्योग्यः पञ्चपुत्रोऽपेक्षितः। वरदो गुरुस्तथेति तावभिनन्द्य गमयामास।।५०-५८।। ततस्तस्याः वेदज्ञः पुत्रो जातः। स गुरुप्रसादात्पञ्चपुत्रान् लेभे। यथा श्रीगुरुणा कन्याभविष्यमुक्तं तथैव जातम्। सरस्वती सदा हृष्टाऽभूत्। तत्पतिर्दीक्षितो भूत्वा प्रख्यातोऽभूत्। नामधारकैवं श्रीगुरोः कृपा षष्टिवर्षवन्ध्यायाः पुत्रीपुत्रौ जातौ ईदृशी गुरुकृपा। यस्य निश्चयस्तस्य तत्क्षणं गुरुप्रसादोऽतो निष्कपटं भक्त्या सेव्यः गङ्गाधरपुत्र आह। हे लोकाभीष्टदं गुरुचरित्रं भज। भजतां कुतो दैन्यं गुरुरिष्टं दत्ते। श्रीगुरुमूर्तिः कामधुगेनामाश्रयतीहोत्तमचिदधीनः। तस्य समस्ताभीप्सितकामान्पूरयतीशो मङ्गलधामा।।१६६।। इति चूर्णिकायां एकोनचत्वारिंशः।।३९।।

।।इति एकोनचत्वारिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ चत्वारिंशोऽध्यायः

अथ अध्यायसारसंग्रहश्लोकोऽयम्-

खयुगमितेऽत्र कुष्ठविनिवृत्त्यै नरहरयेऽवदत्स समिदर्चाम्। तदु विटपी द्विजश्च शुचिरासीदियमजकीर्तिरिवन्नवमालिनी।।

श्रीगणेशाय नमः। सिद्ध आह। अपूर्वकथां वक्ष्ये शुष्ककाष्ठस्य वृक्षोऽभूच्छृणु। तत्र कुष्टार्तो याजुषो गार्ग्यगोत्रो नरहरिविप्रो भक्त्याऽऽगत्य गुरुपदे नत्वा करौ सन्धाय बहुस्तोत्रैस्तुष्टाव।।१-३।। गुरुमूर्ते जय। ते ख्यातिः श्रुता। त्वं परंज्योतिर्भक्तवत्सलः।।४।। अहं जनित्वा अश्मप्रायोऽस्मि। कुष्ठिनं मां निन्दन्ति। यजुःशाखाऽधीता। कुष्ठिनं मां भोजनार्थं नाह्वयन्ति। मुखमपि नेक्षन्ति। इतोऽतीव दुःखम्। किं जीवितेन, जन्मान्तरेऽसंख्या दोषाः कृताः। तत्फलमेतत्सोढुं न क्षमः।।५-८।। व्रततीर्थदेवार्चनादिनाऽस्य शांतिर्नाभूत्। यदि ते कृपा न चेत्तर्हि प्राणांस्त्यक्ष्य इति निश्चित्यागतोऽस्मि हरे। दयस्व। पुनर्नत्वाऽऽह। लोहस्पर्शवत्ते दर्शनं मेऽस्त्विति करुणं श्रुत्वा भक्तवत्सलः कृपयाऽऽह। पूर्वं ते महादोषाः कृतास्ततः कुष्ठपीडितोऽसि। तन्नाशोपायं वक्ष्ये। तेन शुद्धो दिव्यदेहश्च भविष्यसि। अत्रान्तरे शुष्कमौदुम्बरकाष्ठं गृहीत्वा कश्चिदागतस्तद्दृष्ट्वा गुरुराह। निश्चयेनेदं काष्ठं नीत्वा भीमातटे सङ्गमेशपूर्वभागे आरोप्य।।९-१८।। स्नात्वाऽश्वत्थं सङ्गमेशञ्चाभ्यर्च्य पुनः सङ्गमे स्नात्वा जलपूर्णघटद्वयमानीय काष्ठमभिषिञ्च। यद्दिने पल्लवितं भवेत्तदा ते पापनाशोऽङ्गशुद्धिश्च भविष्यतीत्याज्ञप्तः स विश्वासेन काष्ठं मूर्ध्नि धृत्वा नीत्वा गुरूक्तवदारोप्य भक्त्या सप्ताहमभिषिषेच। तद्घोरं कर्म वीक्ष्य तं द्विजा ऊचुः। किमेतत्सेचनाच्छुष्कं काष्ठं जीविष्यति किम्। वरदस्य गुरोः सद्य एव कृपा।।१९-२८।। ते शुद्धिर्न भविष्यतीत्यतः काष्ठं दत्तम्। व्यर्थकष्टमिदमिति चालितोऽपि स आह। सत्यसङ्कल्पो गुरुस्तद्वचोऽसत्यं भवेत्किम्। काष्ठस्यापि वृक्षो भविष्यतीति मे धैर्यमस्ति। महावाक्यं न मोघम्। तदर्थं प्राणान्दास्ये इत्याभाष्य वारितोऽपि काष्ठं भेजे। शिष्या गुरुमेत्याहुः। स्वामिन्किं द्विजायोक्तम्। स सप्ताहमुपोषितः काष्ठं भजति। 'व्यर्थं कष्टं करोषीति' वारितो बोधितोऽपि सोऽस्मान्ब्रूते। किं काष्ठेन। मे गुरुवचनापेक्षा। स स्वोक्तं सत्यं करिष्यतीति निर्धार्य सप्ताहं जलमप्यपीत्वा काष्ठँ भजति।।२९-३८।। इति श्रुत्वा श्रीगुरुराह। यस्य यादृग्भावस्तादृक्सिद्धिः। शिष्याणां गुरुवाक्यं तारणम्। एतदर्थं स्कान्दोक्तमितिहासं वच्मि। ऋषिभिः पृष्टः सूतो गुरुभक्तिप्रकारमाह। भवतारिणी गुरुभक्तिरतः सुलभसाधनं न। योग्योऽयोग्य इति गुरुर्न मन्तव्यः। तं ब्रह्मबुद्ध्या भजेत्। यस्य दृढभक्तिस्तस्याशु सिद्धिरतोऽसन्देहं गुरुं भजेत्।।३९-४५।। गुरुमीश्वरं मत्वा तन्न्यूनं न वीक्ष्यम्। स नृदृष्ट्याऽपि न वीक्ष्यः। एवं यो भजेत्तस्मै शिवः प्रसीदति। मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भिषजे गुरौ यादृशी भावना तादृशं फलम्।।४६-४८।। गुरुं शिवं वीक्षेदीदृग्भक्तिः सद्यः फलदाऽत्र निदर्शनं वच्मि। पाञ्चाले धार्मिको धनञ्जयः सिंहकेतुपुत्र एकदा निर्जले वने मृगयार्थं गत्वा तृषितः शबरेण सहैकं देवालयं दृष्ट्वैत्य तत्रैकं पतितं चारु लिङ्गं शबरो जग्राह। राजपुत्रस्तमाह। अनेन किं करिष्यसीह बहूनि लिङ्गानि। स आह। पूजयिष्ये। सस्मितो राजपुत्र आह। भक्त्याऽर्चयोत्तममिदम्।।४९-५९।। स आह। जात्या शबरोऽहम्। न जानेऽर्चनविधिं तं वद। त्वं मे गुरुः। राजपुत्र आह।

लिङ्गं नीत्वा गृहे शुचिस्थले संस्थाप्य शिवं मत्वा भार्यया सह सावधानेन गन्धपुष्पाद्युपचारैर्भक्त्याऽभ्यर्च्य, नित्यं चिताभस्म समर्प्य, यदश्नासि तत्सर्वं निवेद्य प्रसादं भार्यया सह भक्षेति श्रुत्वा तुष्टः शबरो लिङ्गं गृहमानीय शिवः प्रसन्न इति भार्यामुक्त्वा भक्त्योपदिष्टवत्सभार्योऽपूजयत्। एकस्मिन्दिवसे सप्तग्रामान्व्रजञ्छ्रान्तोऽपि भस्म न लेभे।।६०-७०।। स खिन्नः स्त्रियमाह। लिङ्गपूजा न जाता। यथा गुरूणोक्तं तथाऽऽचरणीयमन्यथा वृथा पूजा। गुरुवाक्याकरणे पापं नरको दारिद्र्यं च। गुरुवाक्याचरणाद्भवाब्धेर्मोक्ष इति शास्त्रम्। सर्वदिक्ष्वद्यान्विष्टमपि भस्म न लब्धमतः प्राणान्दास्ये। शबरी आह। किमर्थं चिन्ता। गृहे काष्ठानि सन्ति। तत्र मां दग्ध्वा तद्भस्म शिवायार्पय। व्रतभङ्गं मा कुरु। मुदा वच्मि।।७२-८०।। देहस्य कदापि नाशोऽतः शिवकार्यार्थं समर्पयेति श्रुत्वा खिन्नः शबर आह। प्राणप्रिये, त्वं प्राग्वयस्का रूपेणाप्रतिमाऽदृष्टसंसारसुखाऽजातापत्याऽतृप्ताऽसि। ते पितृभ्यां मे दत्ता। रक्षामीतीन्दुसूर्यसाक्षितो वृतां त्वां कथं हन्मि। ते हननात्पापं भवेन्मां स्त्रीहन्तेति वदिष्यन्ति। ततः शिवं कथं तुष्येत्। ते पितरौ मां शपिष्यतः। ते लावण्यं नूत्नं भाति। देहेन व्रतादि कुर्वन्ति स जीवद्देहः कथं दग्धुमर्हति। साऽऽह। किमिदं भवतोऽज्ञानम्। मृषा मोहोऽयम।।८१-९०।। स्वप्नदृष्टवज्जलफेनवच्छरीरस्य क्व स्थैर्यम्। जातस्य मृत्युर्ध्रुवः। पितृभ्यां दत्ताऽहं तेऽर्धाङ्गभागिनी। क्व भिन्नभावः। शिवार्थं स्वार्धदेहदाहात्कुतो दोषः। क्षितौ जातं नश्वरमतो मे देहसाफल्यं कुरु। शिवः प्रसीदेत्।।९१-९४।। एवं बोधयित्वा सा स्वयं गृहं गत्वाऽऽह। अग्निं दीपयेति। शबरोऽपि तुष्टो गृहद्वारं बद्ध्वा गृहं दग्ध्वा भार्याभस्मादाय भक्त्या शंभवे निवेद्य मुदितो दग्धा भार्येति विस्मृत्य नित्यवत्प्रसादमादाय प्रेम्णा स्त्रियमाह्वयत्।।९५-९९।। तदा शिवप्रसादात्साऽऽगत्य प्रसादमादाय गृहं गता। पूर्ववत्तां गृहं च दृष्ट्वा विस्मितः शबरस्तामाहूयाऽह। सुमध्यमे, दग्धाऽपि त्वं पुनः कथमागताऽसि। साऽऽह। गृहदाहकालेऽहं शीतार्ता गाढनिद्रिताऽभवम् आह्वानं श्रुत्वोत्थिताऽस्मि। अहो ! ईशलीलेयम्। शिवः प्रसन्नोऽभूदिति शबरेणोक्ते शिवः स्वरूपेण प्रादुरास। तौ तत्पदे दधतुः।।१००-१०८।। इहाखण्डसुखं परत्रं च कोटिवर्षं स्वर्वास इति वरं दत्त्वा शिवोऽन्तरदधादिति सूतेनोक्तम्। यस्य विश्वासस्तस्य द्रुतं फलमित्यतो द्विजो भक्त्या साधु करोति। यादृग्भावस्तादृक्सिद्धिरित्युक्त्वा गुरुः सङ्गमं गत्वाऽनुष्ठाय कुष्ठिनमुपेत्य तादृशं दृष्ट्वा प्रसन्नः कमण्डलोर्जलमादाय काष्ठं प्रोक्ष्य ददर्श। तत्क्षणं पल्लवा उद्भूताः। यच्छुष्कं काष्ठं स एवोदुम्बरोऽभूत्।।९-१७।। विप्रोऽपि सुवर्णाङ्गो भूत्वा नत्वा प्रेम्णा हर्षाश्रुक्लिन्नः श्रीगुरुमस्तौत्। हे कोटिचन्द्राभ, विश्वाश्रय, देवपूज्य, त्वां वन्दे। नृसिंहसरस्वतीश, मां पाहि। हे मायातमोऽर्क, गुणात्मन्यतिरूप, श्रीश, भक्तसेव्य, वरद, वन्दे। नृसिंहसरस्वतीश, मां पाहि। हे कामादिहन्तरानन्दकन्द, भक्तोद्धारार्थं गृहीतावतार, वन्दे। नृसिंहसरस्वतीश, मां पाहि। हे चन्द्रार्कनेत्र, सत्कामधेनो, जगद्बीज, त्वां वन्दे। नृसिंहसरस्वतीश, मां पाहि। हे रक्ताब्जपत्रनेत्र, दण्डकमण्डलुधर, प्रसन्नमुख, त्वां वन्दे। नृसिंहसरस्वतीश, मां पाहि। हे वेदमृग्य, नादबिन्दुकलातीत, त्रितापहारिन्, त्वां वन्दे। नृसिंहसरस्वतीश, मां पाहि।।१८-२४।। हे दैन्याधिभयकष्टाङ्गहराष्टयोगज्ञ, कृष्णापञ्चनदीसङ्गमस्थ, त्वां वन्दे। नृसिंहसरस्वतीश, मां पाहि। हे अनादिमध्यान्तानन्तशक्तेऽतर्क्य परमात्मन्मनोवागगोचर, त्वां वन्दे। नृसिंहसरस्वतीश, मां पाहि।।२५-२६।। एतत्स्तोत्रपाठाद्दीर्घायुर्मोक्षश्च इति स्तुत्वा स आह। भगवन्कृपा कृतेति ननाम। भगवांस्तद्भक्त्युद्रेकं दृष्ट्वाऽभयकरं ददौ। चिरं पदयोः पतितं तं ज्ञानराशे, उत्तिष्ठेत्युत्थाप्याश्वासयत्। पल्लवितं काष्ठं विमलं च विप्रं दृष्ट्वा विस्मिताः सर्वे श्रीगुरुं नत्वा भक्त्याऽस्तुवन्। ततस्तं द्विजमादाय शिष्यैः सह श्रीगुरुर्मठं प्राप।।१२७-३६।। तद्दिने शुद्धो नृहरिः सस्त्रीकान्ब्राह्मणान्भोजयामास।।१३७।।

श्रीगुरुस्तं प्रीत्याऽऽह। त्वं मद्भक्तोऽसि। स्त्रीपुत्रादिसुखं गवाश्वादिसंपत्तिस्ते दत्ता। ते वंशवृद्धिर्भवेत्। सर्वेषां मध्ये त्वं मे प्रियः भक्तोऽसीति योगमादिश्याह। योगीश इति ते नाम प्रतिष्ठापितम्। मत्प्रसादात्ते कुले सर्वे वेदशास्त्राध्येतारो भविष्यन्ति। न संशयश्चिन्तां त्यक्त्वा मदाज्ञया।।१३८-१४३।। कलत्रपुत्रानानीयात्र तिष्ठ। ते श्रेयो भविष्यति।।१४४-४५।। त्रयः पुत्रा मत्पूजका योगिसंज्ञिता भवितारः त्वत्कुलजा मद्भक्ता इत्युक्त्वा विधिवद्विद्यासरस्वतीमन्त्रं ददौ।।१४६-४७।। हे नामधारक! यथा श्रीगुरुणोक्तं तथैव जातमेवं तत्प्रसादः।।१४८।। अतो हि गङ्गाधरसूरिपुत्रो मित्रोपमोऽज्ञानतमोहृदत्र। विस्तारयत्येव गुरोश्चरित्रं मित्रं तितीर्षोर्भवतः पवित्रम्।।१४९।। इति चूर्णिकायां चत्वारिंशः।।४०।।

।।इति चत्वारिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ एकचत्वारिंशोऽध्यायः

।।श्रीगणेशाय नमः।।

।। सारसंग्रहश्लोकोऽयम्।।

अवददिह परीक्ष्य सायंदेवं कुयुगमिते भगवान्गुरूक्तलब्ध्यै। विधिजमुपगतः सुपुष्पिताग्रागमवन आर्य उवाच काशियात्राम्।।

नामधारकः साष्टाङ्गं नत्वा सिद्धमाह। हे योगिन्भवतारक जय नानाधर्माढ्यं गुरुचरित्रमुक्तं तेन धन्योऽभवं ज्ञानप्रकाशोऽभूत्। मत्पूर्वजेन गुरुः कथं सेवितः त्वं ज्ञानी समीपस्थगुरुशिष्योऽसि। सिद्ध आह। सावधानेन शृणु। पूर्वं गौतमीतटे सायंदेवाख्यस्ते पूर्वजः श्रीगुरुमानर्च। तस्मिन्श्रीगुरोरतीव प्रीतिः।।१-९।। स गन्धर्वस्थगुरोर्विस्तृतं यशो लोकमुखात् श्रुत्वा हृष्टो भक्त्या गन्धर्वपुरमागतः। दूरात्पुरं दृष्ट्वा पदे पदे शश्वन्नमन्मठमेत्य साक्षाद्ब्रह्मेव गुरुं दृष्ट्वा साष्टाङ्गं प्रणम्य पादयोः पतित्वा स्वकेशैर्धूलिं प्रक्षाल्य नत्वैकाग्र्येण तुष्टाव। हे त्रिमूर्ते स्वामिन्त्वं भगवान्मुनिः। मम जन्म धन्यम्। पितरः कृतार्थाः। सर्वं पापं नष्टम्।।१०-१८।। परमात्मन्नृसिंहसरस्वतिस्वामिन्जय विश्वगते गुरो त्राहि। विभो ते महिमाख्यानेऽशक्तोऽस्मि। त्वं परमात्मा भक्तवत्सलः। "चरणं पवित्रम्" इति श्रुत्या ते पदेऽनेकतीर्थानि। प्रभो त्वं त्रिमूर्त्यवतारः। त्वं सुधापूर्णकमण्डलुधरो ब्रह्माऽसि। यज्जलस्पर्शान्मृतोऽपि जीवितः ईदृक्कमण्डलु धत्से। त्वं दण्डधरो विष्णुः शरणागतत्राता। दैन्यपापे निवार्य भक्तान्पासि शिवस्त्वं भस्मरुद्राक्षव्याघ्राम्बरधृक्क्रूरदृष्ट्याऽघं हरसि। चतुर्विधपुमर्थदस्त्वं रुद्रो भवरोगहृत् पीताम्बरस्त्वं विष्णुः क्षमाशान्त्यादिभूषितस्त्वत्पदे सर्वतीर्थानि त्वं प्रभुर्भक्तकामधुक्।।१९-२७।। शुष्ककाष्ठं पल्लवितम्। वन्ध्या महिषी दुग्धा। वन्ध्यायै पुत्रौ दत्तौ। तेऽन्तिकेऽन्नपूर्णा।।२८।। विष्णुरूपोऽहमिति ज्ञापनार्थं त्रिविक्रमाय विश्वरूपं दर्शितम्। हीनमुखेन वेदा वाचिताः। तेऽपारमहिमा। त्वं त्रिमूर्तिरवतीर्णोऽसि। इति सगद्गदं सरोमाञ्चं स्तुत्वा नत्वाऽऽनन्दाश्रुक्लिन्नः नवरसाढ्यां स्तुतिं चक्रे। तेन तुष्टः श्रीगुरुस्तमाश्वास्य तन्मूर्ध्नि करं दत्वाऽऽह। त्वं मे परमभक्तस्ते वंशो मदर्चको भविष्यति। सङ्गमेऽद्य। स्नात्वाऽश्वत्थं सम्पूज्य मठे भोक्तुं शीघ्रमेहि।। २९-३६।। इत्युक्तः स तथा कृत्वागत्य गुरुं सम्पूज्य षड्रसान्नपाकैः श्रीगुरुं भोजयामास। भक्तवत्सलस्तं सत्कृत्य स्वाग्रे भोजयामास। ततो हृष्टैः शिष्यैः सह मठे श्रीगुरुरुपविश्य सायन्देवमाहूयाह। क्व ते कथं स्थितिः। सर्वेषां क्षेममस्ति। भ्रातरः पुत्राश्च गृहस्थितिं पश्यन्ति। भवन्निकटे स्थित्वा भक्त्या ते चरणौ सेव्याविति मे निश्चयो मे दास्यं देहि।।३७-४६।। श्रीगुरुर्हसन्नाह। मे सेवा कठिणा। मे नैकत्र स्थिति। ग्रामेऽरण्ये वा वसामि। मत्सहवासात्कष्टं भवेत्। सायन्देव आह। शरणागतं मामङ्गीकुरु। गुरुसेवकः परम्पारमेति। कुतोऽस्य दुःखम्। कुतो यमभीः गुरुश्चतुर्विधपुमर्थदोऽतस्तद्भक्तिः कार्येति प्रार्थितस्तुष्टो गुरुराह। मयि सुदृढा भक्तिश्चेदङ्गीकुरु। स तथेति मनः स्थिरीकृत्य भेजे। एवं मासत्रयेऽतीते सर्वशिष्यान्निवार्य सायन्देवं गृहीत्वा गुरुः सङ्गमे गत्वा।।४७-५५।। तन्निष्ठां परीक्षितुं सुखवार्तां कुर्वन्नश्वत्थमूले तिष्ठन्सायं वायुमुत्थापयामास। तेन वृक्षाः पतिताः। मुसलोपमधाराभिर्मेघो ववर्ष। स च वृष्टिं वातं च सोढ्वा सम्मुखस्थो वस्त्रेणाच्छाद्य गुरुं सेवयामास। एवं द्वियामा वृष्टिः पतिता। ततः शीघ्रं वातो

ववौ। श्रीगुरुः सायन्देवमाह। ग्रामं गत्वा सेकार्थं शीघ्रं वह्निमानय। तथेति प्रस्थितं तं पुनराह। उभयोः पार्श्वयोर्न वीक्षस्वेति।।५६-६५।। तथेति सोऽन्धकारे पर्जन्ये पतमानेऽपि गुरुं ध्यात्वा विद्युत्तेजसा वीक्ष्य वीक्ष्य च गन्धर्वनगरद्वारमेत्य, द्वारपालेभ्यो वृत्तान्तं निवेद्य, तैर्दत्तं भाण्डस्थमग्निमादाय, गुरुं ध्यायन्तिष्ठन्विद्युत्तेजसा मार्गं पश्यन्निर्गतः। उभयपार्श्वयोर्न वीक्षेति कुत उक्तमिति विचार्य दक्षभागमपश्यत्तत्र महाफणं सर्पं दृष्ट्वा भिया मार्गं हित्वा गच्छन्वामभागे तथाऽहि दृष्ट्वा भीतः। उभौ पञ्चफणौ धावन्तमनुधावतः मार्गं मुक्त्वा शीघ्रं वनं ययौ।।६६-७५।। तत्रापि तौ प्राप्तौ दृष्ट्वा भीतो गुरुं ध्यायन्सङ्गमसमीपमेत्य दूराच्छ्रीगुरुं, सहस्रशो दीपानुच्चैर्वेदध्वनिं च श्रुत्वा समीपमेत्याभ्रमुक्तेन्दुमिवैकं श्रीगुरुं दृष्ट्वा चकितो भूत्वा अग्निं प्रज्वालयामास। तदा सर्पौ गुरुं नत्वा जग्मतुः। भीतं तं श्रीगुरुराह। ते रक्षार्थं सर्पौ प्रेरितौ। मा भीर्नः सेवेदृशी कठिना। यो विचार्य धृत्वा स्वीकरोति तस्य कुतः कलिकालभयम्। सायन्देवः पदे धृत्वाऽऽह। कृपां कुरु। गुरुभक्तिप्रकारं विस्तराच्छंस। ततो मनः स्थिरीकृत्य तेऽग्रे स्थास्ये।।७६-८५।। श्रीगुरुराह सुरसां कथां शृणु। आब्राह्ममुहूर्तं कालक्षेपोऽपि भविष्यति। पुरा कैलासेऽर्धाङ्गस्था पार्वती शिवमाह। दयस्व गुरुभक्तिं कथय। शिव आह। गुरुरीशस्तद्भक्तिः सर्वसिद्धिदा। तदर्थं कथां वच्मि। सादरं शृणु। तपोनुष्ठानादेर्विलम्बात्फलम्। सुलभगुरुभक्तेस्तु शीघ्रं फलम्। अनुष्ठानव्रतादि दुष्करं, तत्सिद्धिर्दुर्लभा, यत्रानुपदं विघ्नाः। यज्ञादिफलं गुरुभक्त्यन्तर्गतं भवेत्। यतोऽनायासात्सुलभं गुरुभक्तिफलम्। ततो गुरुकुलवासं कृत्वा गुरुः सेव्यः। पुरा सुभगः कुशलो ब्राह्मस्त्वष्टा।।८६- ९५।। जातव्रतबंधो, विद्याभ्यासं कर्तुं ब्रह्मचर्येण गुरुकुले वसन्भक्त्या गुरुं भेजे। एकदा पर्जन्ये आगते जीर्णपर्णशालाया अन्तर्जलं पपात। तदा गुरुः शिष्यमाह। हे शिष्य। प्रत्यब्दं पर्णशाला जीर्यतेऽतो दृढं रम्यं गृहं रचय। यत्सदा नवमिव भायात्। कदापि न यद्भङ्गं ईदृशं स्थिरं, सर्वसोपस्कारयुक्तं गृहं कुरु। गुरुपत्नी आह। अरंजितमग्रंथितं, सुविचित्रं मनोहरं, अङ्गप्रमाणतो नाधिकं, न न्यूनं च कंचुकं आनय। गुरुपुत्र आह। गत्या जले न मज्जत।। ९६-१०५।। ईदृशे शीघ्रमभीष्टदेशप्रापके, पादतो न न्यूने, नाधिके च, ययोः कर्दमो न स्पृशेदीदृशे पादुके म आनय। तद्वस्त्राञ्चलं धृत्वा कन्याऽऽह। द्वे कुण्डले। क्रीडार्थं हस्तिदंतजमेकस्तंभं, रम्यं, यत्र यत्र क्रीडेच्छा तत्र तत्र स्थापनार्हं, पीठोपस्करयुक्तं, गृहं, यज्जीर्णं भग्नं च न भवेन्नूत्नवद्भाति यदीदृङ्मे देहि। पाकार्थं मणिभांडादि च। यत्र कृतः पाक उष्ण एव तिष्ठेत्। येषु पाककाले कज्जलं न स्पृशेत्। ईदृग्भांडान्यानयेति चतुर्भिरुक्तः शिष्यः तथेति तत्कार्यार्थं वनं गत्वा चिन्तयन्नाह।।।६-१५।। अहं ब्रह्मचारी बाल एवं कर्तुं कथं क्षमः। पत्रावलीरचनाऽपि न ज्ञाता। गुरुं विना कोऽन्यो ममाधारः उक्तं न कृतं चेद्गुरुः क्रुद्धो भविष्यति। कं शरणं यास्ये। कृपाब्धिं गुरुं विना को मे प्राणरक्षकः। यदि तद्वाक्यं न श्रोष्ये तर्हि शापं दास्यति। तद्वाक्यं कथं न श्राव्यम्। कामधुक्तद्वाक्यं कर्तुं सर्वथोत्सहे। प्राणान्दत्वाऽपि गुरुकार्यं यत्नात्सम्पादयिष्यामि। एवं चिन्तान्वितो वनं गच्छन्श्रान्तो निर्विण्णः। क्षणं तत्र स्थित्वाऽग्रतो व्रजन्नवधूतं ददर्श। स च तं दृष्ट्वाऽपृच्छत्। कस्त्वं कुत आगतोऽसि कुतस्ते चिन्ता वद।।१६-२४।। बटुराह। चिंताब्धौ मग्नं मां तारय। भवान्निधिरेव धेनुर्वत्समिव वात्सल्यान्मामागतोऽसि। दुःखितोऽप्यभवं सुखी। चंद्रिकां चकोर इव त्वां दृष्ट्वा हृष्टोऽस्मि। पूर्वपुण्योदयात्कृपाब्धिर्भवांल्लब्धः। निर्जने वने कुतस्तवागमः। किं ते नाम। त्वं गुरुरिव भासि। ईशं त्वां वीक्ष्य चित्तं शांतम्। हे भक्तवत्सल। बालस्ते दासोऽहमिति तत्पदे दधौ। ततः स तमुत्थाप्याश्वास्य मुदोपविश्य सर्वं पप्रच्छ। बटुः कथयित्वाऽऽह। इदं दुष्करं स्वीकृत्य चिंताब्धौ मग्नं मामुद्धरेति।।२५-३४।। ततोऽवधूतस्तमभयं दत्वाऽऽह। हितं वक्ष्ये। तेनाखिलं सिद्ध्येत्।

काशीविश्वेशाराधनं कुरु। पञ्चशतकोटियोजनभूमितो विशेषा काशी। यत्र ब्रह्माद्या वरान्लेभिरे। जगत्स्रष्टुं ब्रह्मा, पालने विष्णुश्चात्र वरं लेभे। यद्दर्शनात् सर्वसिद्धिस्तत्र तवाशुकामः सिद्ध्येत्त्वं गच्छ। लोके विश्वकर्मा भविष्यसि। यत्र चतुःपुरुषार्थसिद्धिस्ततोऽधिकं किम्। स्वल्पक्षीरेच्छवे क्षीराब्धिं योऽदात्स दयालुस्तत्र जागर्ति। यत्रानन्दकाननं सर्वसिद्धिदं धर्मराशिः काशी सर्वक्षेमस्थानम्।।३५-४४।। तद्वासिवीक्षणादपि सर्वदोषनाशः किं पुनस्तद्वसनात्। ततः कुतस्ते चिंता। यन्माहात्म्यं वक्तुं कः क्षमः। तीर्थमयीकाशीपर्यटनात्पदे पदेऽश्वमेधफलम्। तद्गमनादेवाभीष्टार्थसिद्धिर्न संशयः। बटुर्नत्वाऽऽह। काशी क्वास्ते आनंदकाननं च। पाताले भुवि स्वर्गे वा। वनस्थोऽहं न जाने। त्वं भवाब्धितारको ज्ञानं दत्वा मां त्राहि। त्वां प्रार्थये। त्वत्तोऽन्यः को मां नयेत्। यथा बुद्धिं रासि तथा करिष्यामीति पदे दधौ। स आह। त्वां नेष्यामि। इतः कोऽन्यो महालाभस्त्वद्योगान्मेऽपि दर्शनं भवेत्।।४५-५४।। काशीवासं विना नृणां वृथा जन्म। मया सहागच्छेति स बटुना सह प्रतस्थे। स मनोवेगस्तं काशीमानयाह। हे बाल। यात्रां कुरु। बाल आह। स्वामिन्न जानेऽज्ञो बालोऽहं ततः काशीयात्राविधिं वद। स आह। काशीयात्राविधिं शृणु। यथायथं वक्ष्ये। तच्छ्रीगुरुर्वक्ष्यति। यच्चरितं हर्षदं यतः पुरुषार्थाः सुसाध्याः। अत एव सरस्वतीद्विजो निजगादास्य चरित्रमुत्तमम्। सकलप्रियदं शृणोति यः स कृतार्थो भवतीह चाभयः।।५५-१६२।। इति चूर्णिकायां एकचत्वारिंशः।।४०।।

।।इति एकचत्वारिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ द्विचत्वारिंशोऽध्यायः

।। श्रीगणेशाय नमः।।

अथ सारसंग्रहश्लोकोऽयम्-

बातोर्मीतिर्द्वियुगाढ्ये ससगं शिष्टां यात्रां कथयन्दर्शयित्वा।। काशीं दारादिनुतञ्चाऽनयित्वा सायंदेवं गुरुराह व्रतं सत्।।

नामधारकः सिद्धपदलग्न आह। गुरुणा प्रोक्तं तद्विस्तराद्वद। सिद्ध ऊचे। यत्तापसोक्तं तच्छ्रीगुरुराह। विश्वेश्वरदर्शनं, अन्तर्गृहयात्रां. दक्षिणोत्तरमानसयात्रां, पञ्चक्रोशीं; एवं स्नानदानार्चनश्राद्धयुक्तां सर्वयात्रां शुक्लकृष्णपक्षयात्रां, अन्नपूर्णाविश्वेश्वरबिन्दुमाधवढुण्ढिराजदण्डपाणिभैरवगुह-काशीगङ्गामणिकर्णिकासर्वदेवसर्वलिङ्गदर्शनं पूजनं च निवेद्य तापस आह। हे बटो ! काशीखण्डे विस्तृतां मेर्वयात्रां कृत्वा स्वनामाङ्कितलिङ्गप्रतिष्ठां कुरु। विधिना काशीयात्राचरणात्ते वासना पूर्णा भवेन्नात्र संशयः।।१-८।। ईशः प्रसीदेत्तवोपरि गुरुकृपाऽस्ति। मनसा निश्चितं कृत्वा गुरुं स्मरेत्युक्त्वा सोऽन्तर्दधे। बालो विस्मित आह। यो मे खलु गुरुर्यद्वा विश्वेश्वरोऽयं गुरुकृपयाऽऽगतः। निश्चयेन मम कार्यं सिद्धं न संशयः। आराधनं विनेशः प्राप्तो गुरुभक्तेरेतत्फलम्। सर्वे देवाः किमप्यादायार्थितं ददते। दानं विनेशोऽयमागतो गुरुप्रसादात् यज्ञतपोदानादिभिः सहसाऽलभ्योऽपि यत्नं विना गुरुप्रसादादीश उपागतः। इति स्मृत्वोक्तप्रकारेण स काशीयात्रां कृत्वा भक्त्येश्वरमानर्च। स प्रसन्नस्तत्क्षणं प्रादुर्भूय शङ्करो वरं वृण्वीष्वेत्याह। स हृष्टस्त्वष्टा।।९-१७।। गुरुणा तत्पत्न्या पुत्राभ्यां च याचितं शशंस। शिवः आह। बालक! तुष्टोऽस्मि ते सर्वं दास्ये। सर्वविद्यापटुर्भव। त्वया गुरुभक्तिः कृताऽनेन तुष्टोऽस्मि। त्वं विश्वकर्मा भव। चतुःपुरुषार्थास्ते लब्धास्त्वं ब्रह्मवत्सृष्टिकर्ता भविष्यसि। एवं लब्धवरो हृष्टः स विधिना स्वनाम्ना लिङ्गं प्रतिष्ठाप्य गुर्वादिभिर्याचितं सर्वं निर्ममे। ईशे प्रसन्ने किं दुर्लभम्। स गुरुमेत्य याचितं सर्वमानीयानुक्रमेण गुरुतत्स्त्रीपुत्रेभ्यो दत्वा तत्पादवन्दनं चक्रे। गुरुस्तमालिङ्ग्याऽऽह ते भक्त्या तुष्टोऽस्मि त्वं ज्ञानराशिः।।१८-२६।। गृहं सम्यङ्निर्मितं बहुवस्तूनि च दत्तानि।।२७।। त्रिभुवने चातुर्यं प्रसारय। त्वं सर्व विद्याः, कलाश्च वेत्सि। सिद्धयो, निधयश्च तेऽधीनाः। कदाऽपि चिन्ताकष्टादि ते न। एवं लब्धवरः स तथाऽभूत्। एवं गुरुभक्तिः। य एकभावेन गुरुं भजेत्सोऽभीष्टार्थभाग्भवेत्। भवाब्धितारणाय गुरुः शक्तः। तद्भक्ताधीनास्त्रिमूर्तयः ब्रह्मादयोऽपि गुरुपदं भजंति। गुरुं विना न तारकः इति। यस्य देव इति श्रुतिर्वक्ति। इतीशः पार्वतीं जगौ। तच्छ्रीगुरुः सायन्देवं प्राह।।।२७-३५।। तदा सूर्य उदितः। गुरुप्रसादाद्भक्तचित्तध्वान्तं नष्टम्। हे धीप्रेरक! कृपाब्धे! इति श्रीगुरुं नत्वा सायंदेव आह। कथाश्रवणकालेऽपूर्वं दृष्टम्। भवता सह काश्यां स्थित एव। या काशीयात्रोक्ता तां सर्वशोऽद्राक्षम्। जाग्रद्वा स्वप्नो वोऽयमेतच्चित्रं न जाने। इति गुरुपदे नत्वा विनतः स सगद्गदमस्तौषीत्। स्वामिन्त्वं परात्परः पुरुषो भक्तमानसवासी परमहंसः श्रीनृसिंहसरस्वतीति पुनर्नत्वा हर्षगद्गदवाचाऽस्तौत्तच्छृणु।।३६-४३।। पुरा त्वमेकोऽपि बहु स्यामिति संकल्प्य ब्रह्माणं सृष्ट्वा तद्द्वारा सगुणं सधर्मं विश्वं सृष्ट्वा तत्रावतीर्याऽत्मानं रमयन्दुष्टान् हंसि। हे नृसिंहसरस्वति! ते श्रीपादपद्मद्वयं वन्दे।।४४।।

कलिदोषाज्जनः कर्मोत्सृजत्ततो देवा अप्युपोषितास्तदा त्वमवतीर्य सूर्यो ध्वान्तमिव महामोहान्धकारं ग्रसन् शिथिलप्रायं धर्मसेतुं दार्ढ्यं नीतवानसि। हे नृसिंहसरस्वति! ते श्रीपादपद्मद्वयं वन्दे। हे सर्वानन्दनिधान! सत्वं रूपं प्रादुष्कृत्य तुर्याश्रमं पावनं च स्वीकृत्य भवगर्तमग्नमुद्धरसि हे नृसिंहसरस्वति! ते श्रीपादपद्मद्वयं वन्दे।।४५-४६।। मूकाय ते वाग्दत्ता, अंधाय दृष्टी, वन्ध्यायै सुपुत्रौ, मृताय पुनः प्राणाः, विधवायै सौभाग्यं, शुष्ककाष्ठाय पल्लवाश्च दत्ताः। एवंभूतश्च ते महिमा। हे नृसिंहसरस्वति! ते श्रीपादपद्मद्वयं वन्दे।।४७।। त्वं मुक्तमुमुक्षुकामिलोकाल्हादकः। दारिद्र्यहारि, त्रिविधतापशामकश्च श्रुतिगत्यतीतत्त्वश्चासि। हे नृसिंहसरस्वति! ते श्रीपादपद्मद्वयं वन्दे।।।४८।। हे योगिध्येय! ते पदं तीर्थाश्रयं सज्जीवनं, कामिप्रार्थ्यं, श्रीविहारास्पदं, नानावादाश्रयं पुण्यक्षेत्रं, पावनं चास्ति। हे नृसिंहसरस्वति! ते श्रीपादपद्मद्वयं वन्दे।।४९।। हे वेदागोचर! ते चरित्रं वक्तुं कः क्षमः। हे ॐकारस्वरूपेश्वराष्टमूर्तिभिस्त्वया सर्वं व्याप्तम्।।५०।। दंडकमंडलुधर! शांतं, भीमातीरस्थं, शरण्यं, ध्येयं, सच्चिदानन्दं, ते यतिरूपं मयि स्थिरीकुरु। हे नृसिंहसरस्वति! ते श्रीपादपद्मद्वयं वन्दे।।५१।। नित्यमेतदष्टकपाठाद्बलश्रीसुधीतेजोवर्चोऽङ्गपाटवस्त्र्यादिसुखारोग्यदीर्घायुरन्ते मोक्षश्च।।५२।। एवं स्तुत्वा दण्डवन्नत्वा सगद्गदवाग्हृष्टरोमा प्रेमान्वितः स आह। हे त्रिमूर्त्यवतार! देव जगद्गुरो! त्वं मूढदृष्ट्या नृवद्भासि। त्वं सत्यं विश्वेश्वरोऽसि! तेऽन्तिके काशी मे परमपुरुषार्था दत्ता इति भक्त्या तुष्टाव। तुष्टः श्रीगुरुः प्रेम्णा तमाह। काशीक्षेत्रं ते सम्यग्दर्शितम्। त्वदेकविंशः पुरुषः सम्यक्फलं लभेत्। त्वं परो भक्तो सेवां कृत्वा मे सन्निधौ तिष्ठ। अतःपरं म्लेच्छसेवां मा कुरु। मे दर्शनार्थं स्त्रीपुत्रादीनानय।।५३-५९।। स्त्रीपुत्रादीनादाय, भाद्रशुद्धचतुर्दश्यां गुरुमेत्य, नत्वा, पादौ गृहीत्वा, प्रेम्णा सगद्गदवाक्तुष्टाव। ॐ नमश्चन्द्रमौलये प्रभो। त्वं त्रिमूर्त्यवतारः सर्वगुरुर्नृवद्भासि। अथापि ते माहात्म्यं वक्तुं कः क्षमः। हे आदिपुरुष! दैवात्ते पदं दृष्टम्। चन्द्रं दृष्ट्वा चकोर इव पदं दृष्ट्वा हृष्टोऽस्मि। पूर्वार्जितपापं नष्टं पूतोऽस्मि स्पर्शस्पर्शादयो हेममिव, जम्बुनदीपतिता मृज्जाम्बूनदमिव ।।६०-६९।। वायसो मानसं गत्वा राजहंस इव ते दर्शनाद्वयं सद्यः पूताः। गङ्गा पापं, शशी तापं, कल्पद्रुर्दैन्यं, च हरति। भवद्दर्शनं त्रयमपि। हे श्रीगुरो! अद्य तेऽङ्घ्रिदर्शनात्सर्वं पापं, त्रयस्तापा, दैन्यं च सद्यो नष्टम्। त्वं चतुःपुमर्थदातेति वेदसिद्धांतोऽद्य मेऽनुभूत इत्युक्त्वा, कारनाटकभाषया, नानारागैः कलं जगौ। भक्तभाग्याद्भूतलेऽवतीर्णो यतीशो नृसिंहसरस्वती मे दृष्टः स्मर्तृसुखदस्य जगत्पातुः पदपद्मद्वयं दृष्टम्। स भोगीच्छापूरको योगीष्टदः।।७०-७९।। कृपाब्धिर्नृसिंहसरस्वती गुरुमूर्तिर्वाक्यलक्ष्योऽपि दण्डकमण्डलुधृक्सगुणं ब्रह्म हे दासप्रिय! करुणालय! भक्तत्रातस्ते पदस्पर्शाद्गन्धर्वपुरं कैलासोऽभूत्। हे सद्गुरो! जगद्धेतो! सुकीर्ते! भूमन्दयाब्धे! जय नः पाहि। हे सच्चिदानन्दामेयात्मन्भक्तहितार्थं त्वमत्रिसुतोऽभूः। मे माया दुरत्ययेति त्वयोक्तं मेऽनुभूतं ये मां भजन्ति ते तरन्तीति ते वचसा त्वां भजे। मायां वारय। भक्तिसुखं, तदर्थं सत्सङ्गं च देहि त्वां वन्दे।।८०-८८।। इति कारनाटकभाषया प्रेमलक्षणभक्त्या सोऽस्तौत्तत्सारोऽयं।।८९।। तुष्टः श्रीगुरुस्तमाश्वास्य, स्वाग्रे सर्वान्प्रेम्णोपवेश्य, माता प्रेम्णा पुत्रानिव, तान्वात्सल्येनापृच्छत्। तद्दिनं धन्यम्। भक्तवत्सलः सर्वक्षेमं, गृहवार्तां, पुत्रादेर्योगक्षेमं, समाधानं च ,सायंदेवो निवेद्य, पुत्रौ तत्पादयोर्निदधौ। श्रीगुरुर्दयाब्धिर्ज्येष्ठपुत्रमस्तकेऽतीव कृपया करं धृत्वाऽऽह। हे सायंदेव। अयं नागनाथो मे भक्तः पूर्णायुः श्रीयुक्तो भविष्यत्यस्य वंशवृद्धिश्च इतःपरं म्लेच्छसेवां त्यज।।९०-९८।। सुभगाऽसौ ते भार्या साध्वी। अस्याश्चत्वारः पुत्रा भविष्यन्ति। म्लेच्छं भजसि चेत्ते हानिर्भविष्यति। मे सेवां कुरु। मद्भक्तोऽयं ते ज्येष्ठसुतः। मत्प्रसादाद्यशोऽस्य प्रसरिष्यति। सकुटुम्बस्त्वं

सङ्गमं गत्वा विधिना स्नात्वा अश्वत्थमभ्यर्च्यागच्छेत्युक्तः स तथा कृत्वाऽऽगतः। तद्दिने लोकोऽनन्तं संपूज्याऽदराच्छ्रीगुरुं चानर्च। श्रीगुरुः सायंदेवमाह। अद्यानंव्रतं त्वमपि कुरु। स आह। त्वमेव नोऽनन्तस्ते पदसेवाऽनंतव्रतं चक्रे।।९९-१०७।। सायंदेव आह। कथमेतद्व्रतं केन कृतं, साद्यन्तं वद। दयां कुरु, किं पुण्यं, को लाभ, इति तेन पृष्टः श्रीगुरुर्विस्तरात्कथयामास। तदग्रतो वक्ष्यति वै सरस्वती गुरोश्चरित्रं प्रददाति सद्गतिम्। यदत्र यस्य श्रवणेन सद्यः प्रयाति तीर्त्वा भवमाप्तविद्यः।।११२।। इति चूर्णिकायां द्विचत्वारिंशः।।४२।।

।।इति द्विचत्वारिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ त्रिचत्वारिंशोऽध्यायः

।। सारसंग्रहश्लोकोऽयम्।।

सायंदेवाय त्रियुगपरिमितेऽध्याये प्राहेशोऽनन्तव्रतमिह च परत्रेष्टम्।।
यस्याऽचीर्णेन व्यपगतदुरितो यायात् कौण्डिण्यः पार्थश्च सुगतिमितोऽसम्बाधाम्।।४३।।

श्रीगुरुराह। इदं बहुभिः कृतं तद्वक्ष्ये।।१।। धर्मः पार्थ एतत्कृत्वा गतं राज्यं प्रापेदृगुत्तमं व्रतम्। सायंदेव आह। को धर्मः, कथं राज्यं गतं प्राप्तं च। श्रीगुरुराह। पांडुपुत्रो धर्मस्तद्राज्यं कुटद्यूतात्कौरवैर्हृतम्। स धर्मो राज्यभ्रष्टः सोदरैः पत्न्या च घोरं वनं गत्वा सदा दुःखितः कृष्णं दध्यौ। कौरवै राज्यं हृत्वाऽपि ते वनस्थाः पीडिताः तत्सत्त्वं हर्तुं दुर्वासाश्च प्रेषितः। कृष्णः सदा पांडवान् ररक्ष पांडवैर्नानाव्रततीर्थसेवाभिः कष्टं भुक्तम्। तज्ज्ञात्वा भक्तवत्सलः कृष्णः स्वयं प्राप।।२-११।। धर्मस्तं मुदा संमुखं गत्वा केशैः पादधूलिः क्षालयित्वा तं साकारं ब्रह्म पाद्यादिभिः संपूज्य तद्दर्शनादात्मानं पूतं मेने। ततस्तुष्टाव। श्रीकृष्ण! भक्तवत्सल! जय! नारायण, अनन्त, भवतारक, क्षीराब्धिनिवास, श्रीश, परमात्मन्त्वं परंज्योतिर्विश्वं सृजसि, पासि, हंसि च। हे विश्वजीव! स्थूलसूक्ष्मतृणकाष्ठादिष्वपि ते वासः। हे त्रिगुणात्मन्हृषीकेश! ते नमः प्रसीद। त्वं रजस्तमोभ्यां सृजसि, हंसि च। दुष्टनिग्रहाय, साधुत्राणाय चावतीर्णोऽसि। भूभारनाशाय, तेऽवतारश्चेत्किमर्थं भूभारभूतान्नो न हंसि।।१२-२०।। पांडवा मे प्राणा इति ख्यापयन्नपि वने प्रक्षिप्य कुत ईदृक्कष्टं ददासि। ते दया चेत्कुत ईदृक्कष्टम्। नः उपेक्ष्य कुतो वने स्थापयसि। त्वां विना ईदृक्कष्टं कस्मै कथनीयम्। उपेक्षसे चेज्जीवितेन किम्। भीम आह। प्रभो! स्वामिन्दयाब्धे! न उपेक्षसे किम्! अर्जुनः पादयोः शिरो विन्यस्याह। हे कृपाब्धे! मुरारे! नास्मासु ते कृपादृष्टिः। नो वनवासादि कष्टं, आयासश्च किमर्थम्? पार्थाः प्राणप्रिया इति बिरुदालयः सत्या भवन्तु। नः कष्टं हर। नकुलसहदेवौ द्रौपदी च नत्वोचुः। त्वं नः पक्षपाती वनेऽस्मान्स्थापयसि, वैरी रीज्यं करोति, त्वादृशे मित्रे छत्रे च सतीदृक्कष्टं कथम्?।।२१-३०।। नः साम्राज्यप्राप्तये क उपाय इत्युक्तः सार्द्रहृदयः कृष्ण आह। अनंतव्रतं कुरु। यत आशु राज्यप्राप्तिर्भविष्यति। यद्व्रतानामुत्तमं व्रतम्। वासुदेवोऽहम्। मे ब्रह्माद्यास्तिस्रो मूर्तयः, राशिग्रहभुवनपातालभूरादिलोकाऽणुकलाकाष्ठा- मुहूर्तदिनाहोरात्रिपक्षमासाब्दयुगकल्पादि भूतं भव्यं भवच्च मया व्याप्तम्। वसुरुद्रादित्याब्धिपर्वततृणवृक्षलतातारकादिशोऽहं बिभर्मि।।३१-४०।। मत्तो विश्वात्माऽन्यो न। अजो निर्विकारोऽव्ययोऽस्मि। सर्वात्मकं मामनन्तं विद्धि। विधिना मद्व्रतं कुरु। धर्म आह। व्रतविधि ब्रूहि। किं दानं, कथं पूजनं, कदा कार्यं, पुरा केन कृतं, तत्सर्वं विस्तराद्वद। कृष्ण आह। भाद्रशुद्धचतुर्दश्यां मध्याह्ने भक्त्या व्रतं कुरु। शीघ्रं राज्यमवाप्स्यसि। पुरा कृतयुगे वासिष्ठः सुमन्तुर्ऋषिस्तत्पत्नी भार्गवी साध्वी दीक्षाख्या सुशीलां कन्यां प्रसूय स्वल्पकालेन मृता। कन्या पितृगृहे ववृधे। सदाचारा सा वास्तुनि रंगवल्लीस्वस्तिकादीनि व्यरचत्।४१-५०।। विचित्रतोरणैर्गृहं शोभयित्वा सम्मार्जनादि कृत्वा पद्मादीन्यलिखत्। प्रेम्णा च नमस्कारादिना देवमानर्च। लुप्तगृह्यकर्मा भार्याहीनो मुनिर्द्वितीयमुद्वाहं चक्रे। कर्कशा, दुःशीला, नित्यं कलहकर्त्री

पत्या पुत्र्या च वैरकर्त्रीदृशी पत्नी दैवाल्लब्धा। विवाहार्हा कन्या कस्मै देयेति ऋषिरचिन्तयत्। तावद्विद्वान् कौण्डिण्यः प्राप्तस्तस्मै विधिना तां कन्यां दत्वा जामातरं वार्षिककाले गृहे स्थापयामास। पुत्रीमात्रोस्सुतरां विरोधोऽभूत्तदा जामाता श्वशुरमाह। समीपेऽन्यत्राश्रमं कृत्वा स्थास्ये। सुमन्तुः खिन्न आह। केयं पापा वैरिणी वृता।।५१-५९।। यत्र शान्तपत्नी न तद्गृहं वनम्। हे पुरारे! भवाब्धौ मग्नोऽस्मि। नेयं कर्मतपोऽर्हा न शृणोति च। अद्य पुत्राजामात्रोरदर्शनं भवेत्। कौण्डिण्य आह। नैकत्र तापसौ शस्तौ। तपोहानिः स्यादतोऽन्यत्राश्रमं कृत्वा किञ्चित् दूरे स्थित्वा तप्स्यामि। शश्वद्दर्शनं भविष्यति। सुमन्तुराह। द्वादशाहं स्थित्वा भाद्रे शुद्धे सर्वसिद्धत्रयोदश्यां प्रस्थानं कुर्विति प्रार्थितः स स्थित्वा सुमुहूर्ते सभार्यः प्रतस्थे। सुमन्तुः कर्कशामाह। पुत्र्यै व्रीहिगोधूमादि पाथेयं देहीति सा गृहं गत्वाऽश्मभिर्दृढं द्वारं बध्वाऽऽह। न दास्य इति। सुमन्तुः शिरस्ताडयामास। कन्या तं निवार्याह। तथैव यास्य इति।।६०-६८।। ऋषिः पाकालयस्थं लब्धं गोधूमपुलाकं ददौ। ततस्तौ रथारूढौ निर्गतौ। मध्याह्निकं कर्तुमृषिरुपाविशत्। सुशीला नदीतीरे स्त्रीसमूहं वीक्ष्योपागता। तत्र रक्ताम्बरधराः पृथक्पृथक्कलशान्पूजयन्तीर्नारी- र्मृदुवाक्येनापृच्छत्। भवतीभिरिदं किं क्रियत इति। ता ऊचुः। सर्वसिद्धिदमनन्तव्रतं क्रियते। सुशीलाऽऽह। व्रतस्य को विधिः कृपया विस्तराद्ब्रूत। ता ऊचुरुपविश्य शृणु। सर्वं ते कथयामः। भाद्रमासि सिते पक्षे चतुर्दश्यां चतुर्दशग्रन्थियुतं रक्तोर्णासूत्रदोरकं सम्पाद्य विधिवत्स्नात्वा रक्तवस्त्रं परिधाय कुङ्कुमादिना देहं भूषयित्वा।।६९-७८।। पञ्चपल्लवयुतजलपूर्ण- कलशं संस्थाप्य, तत्र रत्नादि निक्षिप्य, सम्पूज्य, तदुपरि पूर्णपात्रे नववस्त्रेऽष्टदलं विलिख्य, कलशाग्रतः पञ्चरङ्गैः पद्मादि विलिख्य, पूर्णपात्रे दर्भमयशेषं सम्पूज्य, तत्र सर्वपापशमनं शेषशायिनं परात्परं चतुर्भुजं शङ्खपद्मचक्रगदाधरं पिङ्गाक्षं घनश्यामं श्रीमदनन्तं द्वादशाक्षर्या पुंसूक्तेन विष्णुसूक्तेन भक्त्या स्वाधिकारतः सम्पूज्य, संसारगह्वरेति मन्त्रेण दक्षिणकरे बध्वा जीर्णदोरकं विसृज्य।।७९-८९।। तं सफलदक्षिणं प्रस्थगोधूमापूपपायससहितं विप्राय दत्त्वा विप्रान्भोजयित्वेष्टैः सह भुञ्जीयात्। एवं चतुर्दशवर्षं व्रतं कृत्वोद्यापनं ततः कृत्वा, चतुर्दशघटान्विप्रेभ्यो भोजनं च दद्यादतश्चतुर्वर्गोऽपि सिध्यति। त्वमेवं भक्त्या चरेति तास्तस्यै दोरकार्थं तन्तून्दत्वाऽद्य चतुर्दश्यामस्माभिः सहानन्तं पूजयेत्युक्ता सुशीला यथोपदिष्टं भक्त्याऽनन्तं पूजयित्वा, गोधूमपुलाकार्धं विप्राय वायनार्थं दत्वा, स्त्रियो नत्वाऽऽज्ञां गृहीत्वा रथमुपागता। तावदनुष्ठानं समाप्य कौण्डिण्योऽप्येत्य तया सह रथमारुह्याग्रतो गच्छन्नमरावतीसमां पुरीं ददर्श।।९०-९८।। ततो नागरिकाः सम्मुखमेत्य, स्वामिन्तपोनिधेऽत्रैव तिष्ठेति सत्कारपूर्वं निन्युस्तत्रानन्तप्रसादात्तौ सर्वैश्वर्ययुतौ सुखं तस्थतुः। एकदा कौण्डिण्यः पत्न्या करेऽनन्तं दृष्ट्वाऽऽह। किमेतद्रक्तसूत्रं वशीकरणं बद्धम्। शीलाऽऽह। अनन्तदोरकोऽयं बद्धः। यत्प्रसादादैश्वर्यं लब्धम्। यद्दिने व्रतं कृतं ततोऽनन्तः प्रसन्नोऽभूत्। क्रुद्धः कौण्डिण्यो बलाद्दोरं गृहीत्वाऽग्नौ हुत्वाऽऽह। क्वानन्तो मे तपस्तप्तं तत ऐश्वर्यं लब्धं न संशयः। मद्वशीकरणाय बद्धोऽयं ते दोरकः स मेऽग्नौ क्षिप्त इति।।९९-१०७।। हन्तानन्तः कुतोऽग्नौ त्यक्त इत्युक्त्वा शीला यत्नाद्दोरं गृहीत्वा दुग्धे चिक्षेप। तत्क्षणमैश्वर्यं नष्टम्। कौण्डिण्यो दैन्यं गतः। गोधनाभरणादि चोरैर्मुषितम्। तत्रत्याः सर्वेऽहिता जाताः। गृहं दग्धम्। सर्वस्वं नष्टम्। कौण्डिण्योऽनुतप्त आह। अनन्तो मे क्रुद्धः। मदेन मे व्यर्थमग्नौ क्षिप्तः। श्रीशोऽनन्तो यावद्दर्शनं न दास्यति तावन्न भोक्ष्य इति निश्चित्य वनं व्रजन्ननन्तानन्तेत्युक्त्वा फलपुष्पाढ्यमाम्रं पक्ष्यादिभिरसंस्पृष्टं दृष्ट्वा, तमपृच्छदनन्तो दृष्टः किमिति। स तमाह। मे न दृष्टो यदीक्षसि तस्मै एतां मे दशां शंस।।८-१६।। ततोऽग्रतो गच्छन्मुनिस्तृणेऽटन्तीं सवत्सां धेनुं तृणं जग्धुमशक्तां दृष्ट्वाऽऽह। अनन्तो दृष्टः किमिति साऽऽम्रवदुवाच। सः ततोऽग्रतो गत्वा

धेनुवच्चरन्तं महावृषं दृष्ट्वाऽऽह। अनन्तो दृष्टः किमिति। सोऽपि धेनुवदुवाच। स ततोऽग्रेऽन्योऽन्योदकसंमिश्रे कुमुदादियुते स्वादूदके हंसादिवर्जिते सरस्यौ दृष्ट्वाऽपृच्छदनन्तो दृष्टः किमिति ते पूर्ववदूचतुः। ततोऽग्रे गर्दभं कुञ्जरं च दृष्ट्वाऽनन्तो दृष्टः किमित्यपृच्छत्तौ पूर्ववदूचतुस्ततो निर्विण्णः कौण्डिण्यः प्राणान्दातुमिच्छन्मूर्छितो भुव्यपतत्।।१७-२६।। तदाऽनन्तो वृद्धविप्रवेषेपेणागत्योत्तिष्ठोत्तिष्ठानन्तं दर्शयामीति करं धृत्वोत्थाप्य, वने महाश्चर्यं पुरं दर्शयित्वा शुभे रत्नसिंहासने उपविश्य सुंदरं स्वरूपं दर्शयामास। कौण्डण्यस्तद्वीक्ष्य पादयोः शिरो निधाय विनयेनास्तौत्। हे सच्चिदानन्द! गोविन्द! श्रीवत्साङ्क! ते नमः। ते दर्शनान्मे दुःखं पापं च गतम्। यस्त्रिमूर्तिर्यत्स्मरणात्सर्वे दोषा नश्यन्ति तं त्वां शरणं गतोऽस्मि। हे नारायण, श्रीश, व्यापक, वैकुण्ठवासिन्ननन्तब्रह्माण्डनाथ! परमात्मन् पापोऽहं ते भक्तिहीनः। क्षमस्व त्वां विनाऽन्यदैवतं नजाने। शरणागतदीनेश! ते पदे धृते।।२७-३९।। भृङ्गवत्तेऽङ्घ्रिलीनोऽस्मि। मे जन्म सफलम्। धन्यं मे जीवितम्। इति प्रार्थितो भक्तचिन्तामणिस्तुष्टः प्रसन्नो दारिद्र्यनाशं, धर्माप्तिं, शाश्वतवैकुण्ठवासं चेति त्रीन्वरान्ददौ। कौण्डिण्य आह। मार्गे दृष्टं चित्रं वच्मि। प्राणिमात्रास्पृष्टः सुफल आम्रवृक्षो दृष्टः। ततो धेनु सवत्सा यन्मुखे ग्रासो न विशति। ततो द्वे सरसी अन्योऽन्योदकमिश्रिते जीववर्जिते। ततो मत्तो महागजः। ततो गर्दभस्ततो वृद्धविप्रश्च। कुत एषामीदृक्स्थितिः। हे जगन्नाथ कथयेति पदे दधौ।।३७-४६।। श्रीमदनन्त आह। पुरा वेदशास्त्रज्ञो मत्तो विप्रो गर्वाच्छिष्येभ्योऽल्पामपि विद्यां नादात्तत ईदृग्वृक्षोऽभूद्यत्फलं कोऽपि नास्पृशत्। निष्फलभूदानादीदृशी गौः। अदाता धनी स वृषः। द्वे भगिन्यौ परस्परं दानं दत्वेदृशी सरसी स्तः। क्रोधी खरो, मदी गजो, अनुतापात्ते चित्तं शुद्धं द्विजरूपेणाहमागमम्। ये दृष्टास्ते सर्वेऽपि मोचिता इहैश्वर्यमन्ते सद्गतिं च यास्यसि। त्वं पुनर्वसुर्भूत्वा नक्षत्रमण्डले वसेति वरं लब्ध्वेहोत्तमसुखं भुक्त्वान्ते स्वर्गं गतः। इति कृष्णेन धर्मायोक्तम्। स तथा व्रतं कृत्वाऽरीन्हत्वा नष्टं राज्यं लेभे।।४७-५६।। अत्राप्यनेके चक्रुः। कोऽपीदमाचरेत्स चतुर्वर्गं लभेत्। त्वं व्रतानामुत्तमं व्रतमेतत्त्वं नागनाथाय देहि। कौण्डिण्येन इदं पुरा चीर्णं त्वं कौण्डिण्यगोत्रजोऽतो बहुपुण्यमिदमाचरेत्युक्तः सायंदेवोऽनन्तव्रतं कृत्वा, श्रीगुरुं च पूज्य, भक्त्या गीतवाद्यपुरःसरं नीराज्य, मुदा श्रीगुरुं ब्राह्मणांश्च भोजयामास। तेन गुरुस्तुष्टो गच्छेति तमादिशत्। सायंदेवः कलत्रादीन्नीत्वा ग्रामे स्थापयित्वा, स्वयं सेवार्थं श्रीगुरुमेत्य।।५७-६६।। समीपे स्थित्वाऽन्वहं भेजे। एवं ते पूर्वजाय श्रीगुरुः प्रसन्नः। भवद्भिः परमं दिव्यं निधानं संपादितम्। नृसिंहसरस्वत्याख्यम्। गङ्गाधरस्य तनयो विनयोपपन्नः श्रोतॄनिदं चरितमाह गुरूपसन्नः।। यस्याशु संश्रवणतोऽवहितो मनुष्यः स्वेष्टं लभेत न पुनर्जननं त्वमुष्य।।६७-१६९।। इति चूर्णिकायां त्रिचत्वारिंशः।।४३।।

।।इति त्रिचत्वारिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ चतुश्चत्वारिंशोऽध्यायः

।।श्रीगणेशाय नमः।।

अथ सारसंग्रहश्लोकोऽयम्-

क्षणतः श्रुतिवेदसंमितेऽस्मिन्ननयद्यतिराज एकरूपः।। श्र्यगमात्मरतं स तन्तुकं चानयदाशु निवेद्य राट्चरित्रम्।।१।।

नामधारकः सिद्धं आहाग्रतः कथां कथय कृपां कुरु। सिद्ध आह। तन्तुकाख्य एकः सेवकस्त्रियामं गृहकृत्यं निर्वर्त्य गुरुमेत्याङ्गणप्रोक्षणादि कृत्वा दूरान्ननाम। कदाचिच्छिवरात्र्यां शैलयात्रार्थं प्रस्थिता बांधवाः।।१-४।। तन्तुकमाह्वयन् स तानाह। मूढा व्यर्थं शैलं गच्छन्ति। श्रीशैलः श्रीगुरुस्थानं, श्रीगुरुर्मल्लिकार्जुन इतः क्वापि न गमिष्ये। ते मूर्खोऽयमित्युपहसन्तः श्रीशैलं ययुः। अन्येऽपि नागरिकाः गताः। तद्दिने उपागतं तन्तुकं श्रीगुरुराह। ते बन्धवः शैलं गतास्त्वं कुतो न गतोऽसि। तन्तुक आह। भवच्चरणे नानाक्षेत्रतीर्थानि। मूर्खाः पाषाणं द्रष्टुं गता इति नत्वा गृहं गतः। ततो व्रतदिने उपोष्य मध्याह्ने स्नातुं सङ्गममेत्य गुरुं ननाम। श्रीगुरुराह। ते सर्वे शैलं गताः। एकाकी त्वं स्थितोऽसि।।५-१४।। त्वया शैलो दृष्टो न वा। स आह। अहं नान्यं जाने। भवत्पदे सर्वयात्रा। इति तद्भावं ज्ञात्वा तमुपाहूय श्रीगुरुराह। श्रीशैलं ते दर्शयामि। हस्ताभ्यां पादुके दृढं धृत्वा, दृष्टी निमीलयेति। तथेति स तथाऽकरोत्तं क्षणाच्छ्रीगिरिं नीत्वा पातालगङ्गातीरे स्थापयित्वाऽऽह। नेत्रे उन्मील्यामुं शैलं पश्य। स क्षणं निद्रितवद्भूत्वा बोधितोऽक्षिणी उन्मील्यागं दृष्ट्वा चकितोऽभूत्। श्रीगुरुराह। भ्रान्तवत्किं पश्यसि। क्षौरादि कृत्वा मल्लिकार्जुनदर्शनं कुरु। स तथेति क्षौरं कर्तुं गतः। तत्र बन्धून्ददर्श। ते तमूचुः। कुतोऽनुयातोऽपि दर्शनं न कुरुषे? कोऽयं ते धर्मः? स तानाह। अधुनैव श्रीगुरुणा सहागतोऽस्मि।।१५-२३।। केचिदूचुर्मृषा वक्ति। विलीयान्वगतः। स तूष्णीं क्षौरादि कृत्वा पुष्पाद्यादाय लिङ्गार्चनाय गत्वा लिङ्गस्थाने श्रीगुरुं सर्वैरपि पूजितं दृष्ट्वा चकित आह। श्रीगुरुरेव शङ्कर इति। तमभ्यर्च्य प्रसादं गृहीत्वा मुदा श्रीगुरुं प्राप। श्रीगुरुस्तमाह। अद्यात्र तिष्ठस्यागच्छसि वा। तन्तुक आह। चित्रं दृष्टम्। देवालये लिङ्गं न दृष्टं त्वामेव सर्वेऽर्चन्तीति दृष्टम्। समीपस्थं त्वां त्यक्त्वा किमर्थ लोका आगच्छन्ति तन्न जाने।।२४-३१।। त्वं परमेश्वरो नृवद्भासि। छन्नरूपिणस्ते महिमा न ज्ञायते।।३२।। मूढास्ते माहात्म्यं न विदुः। त्वां हित्वा कुतोऽद्रिं यान्ति तद्वद। श्रीगुरुराह। सर्वत्रैक ईशोऽपि स्थानमहिमाविशेषः। तन्तुक आह। त्वं पूर्णं ब्रह्म। स्थानमाहात्म्यं वद। श्रीगुरुराह। स्कान्दोक्तां कथां शृणु। माघे शिवरात्र्यां शैलेऽपारमाहात्म्यं, पुरा किरातदेशे पराक्रमी शूरो धीमान्नीतिमान्विमर्षणो राजेशभक्तोऽपि ग्राह्याग्राह्यविवेकशून्यः परस्त्रीलंपटश्चाथापि भक्त्येशं संपूज्य गीतादिभिरतोषयत्। शिवरात्र्यां विशेषतः ।।३३-४१।। तत्स्त्री सुशीला साध्वी कुमुद्वतीशभक्तमपि परदाररतं तं प्राह। मे दौरात्म्यं सोढ्वा वद। सर्वभक्षकस्य दुराचारस्य ते कथं शिवेऽतीव सद्भक्तिः। स आह। हेऽनघे सम्यक्पृष्टम्। मे प्राग्जन्म शृणु। पुराऽऽभीरगृहेऽहं श्वाऽऽसम्। कदाचिच्छिवरात्र्यां शिवालयेऽर्चनाय बहुलोका आगतास्तत्रोपोषितोऽहमगमम्। सर्वे गीतादिभिरारार्तिकं कृत्वा प्रदक्षिणाश्चक्रुः। तेऽन्तर्गतं मां वीक्ष्य।।४२-५१।। धावन्तो द्वारमावेष्ट्य पृष्ठलग्ना मां हन्तुं

प्रवृत्ताः। बहुर्गन्तुं मेऽल्पोऽपि मार्गो न लब्धः। प्रदक्षिणं गत्वा विलीय स्थितं मां हन्तुं तेऽनुयाताः। उच्छिष्टमुपलभ्येदित्याशयाऽग्रतो गच्छन् त्रिः परिक्रम्य शिवमद्राक्षम्। मुदा शिवार्चनं च। द्वारं बध्वा ते मां जघ्नुर्बहिर्जहुश्च। प्रदक्षिणापुण्येन शिवपूजाविलोकनाच्च भक्षणालब्ध्योपवासाच्च राजाऽभवम्। श्वजन्मन्यपीदृक्पुण्यं लब्धम्। सोज्वलाः दीपमालाश्च वीक्ष्य शिवरात्र्यां शिवद्वारि प्राणास्त्यक्ताः।।५२-६१।। तेन ज्ञानी राजाऽभवम्। दुराचरणकारणं तु शुनः प्रकृतितो नैव भक्ष्याभक्ष्यादिविचारणा स्त्रीलंपटत्वं च। जीवो हि पूर्वसंस्कारानुसारीति श्रुत्वा राज्ञी प्राह। भवतः पूर्वजन्मोक्तम्। त्वं सर्वज्ञः शैवोऽसि। कृपां कृत्वा ममापि पूर्वजन्म कथयेति पदेऽग्रहीत्। राजाऽऽह। शृणु। पुरा त्वं कपोती आसीः। कदाचिदुदरपूर्त्यर्थं वने प्राप्तं मांसग्रासं चञ्च्वा धृत्वा गच्छन्तीं त्वां दृष्ट्वा कवलं हर्तुं चिल्ली अन्वधावत्। त्वां प्राणरिरक्षया भिया श्रीशैले मल्लिकार्जुनालयशिखरे प्रदक्षिणं भ्रमन्तीं।।६२-७०।। श्रान्तां कण्ठगतप्राणां हत्वा मांसं गृहीत्वा गता। ततस्त्वं प्रदक्षिणपुण्याद्राजमहिषी जाताऽसि।।७१-७२।। राज्ञी आह। अहं त्वदाज्ञया भक्त्या शिवार्चनं करिष्ये। इतोऽग्रतो भवतो मम च क्व जन्म भविष्यति तत्कथय। राजा आह। सिन्धुदेशे राजकुले भविष्यामि त्वं च संजयदेशराजपुत्री भूत्वा सुव्रता मद्भार्या भविष्यसि।।७३-७६।। तृतीये जन्मनि सौराष्ट्रराजोऽहं त्वं कलिङ्गजा मत्पत्नी च। चतुर्थे गन्धारजोऽहं मागधी त्वं मे पत्नी च। पञ्चमेऽवन्तिराजोऽहं दशार्णजा त्वं मम पत्नी च।।७७-७९।। षष्ठेऽनन्ताख्यो राजाऽहं त्वं ययातिकुलजा मे कान्ता च। सप्तमे मदनोपमः पांड्यदेशराजोऽहं पद्मवर्णाख्यः त्वां रूपसौन्दर्यकान्तां विदर्भजां सुमत्याख्यां साध्वीं नलो दमयन्तीव स्वयंवरे वरिष्यामि। वेदशास्त्रज्ञः ख्यातः चिरं राज्यं कृत्वा यज्ञैर्यक्ष्ये। द्विजदेवपरो दानधर्मकर्ताऽहं वार्धक्येऽगस्त्यात्तुर्याश्रमदीक्षां प्राप्यात्मानमपरोक्षीकृत्य देहावसाने त्वया सह पुनरावृत्तिरहितां मुक्तिं यास्ये।।८०-८८।। एवमीशार्चनालोकमाहात्म्यं इत्युक्त्वा राजा पत्न्या सह शैलयात्रां चक्रे। हे तन्तुक ईदृक्क्षेत्रमाहात्म्यम्। यतः सप्तजन्मसु राजा भूत्वाऽन्ते मुक्तः। ते गुरूपदेशो जातः। ईशं पूजय। गन्धर्वपुरे मल्लिकार्जुनसमः कल्लेशोऽस्ति। तन्तुक आह। किं वाच्यम्। मल्लिकार्जुनस्थाने त्वामेवाद्राक्षम्। सर्वव्यापकोऽनेकसूत्रप्रवर्तकस्त्वं कुतोऽन्यपूजां शंससि। श्रीगुरुः सस्मितमाह। नेत्रे निमील्य पादुके धारयेति। ततस्तं क्षणात्सङ्गममानयत्। ग्रामस्थाः श्रीगुरुं सङ्गमेऽदृष्ट्वा खिन्ना ऊचुः। गुरुः क्व गत इति।।८९-९८।। ते ग्रामं ययुस्तावच्छ्रीगुरुस्तानानेतुं तन्तुकं प्रेरयत्स च त्वरयाऽऽगत्य तानाह्वयत्। ते तमूचुः कुतः क्षौरं कृतम्। स सर्वं निवेद्य प्रसादपुष्पादि सर्वं व्यदर्शयत्। केचिदूचुर्मृषा वक्ति। मध्याह्नेऽयं गृहे दृष्टः। स आह। गुरुणा सह श्रीशैलं गत्वा क्षणादागतोऽस्मि। श्रीगुरुस्तत्रैवाद्य तिष्ठति। व आह्वयति। केचित्सत्यं मेनिरे। मूर्खास्तु मिथ्येति। ततस्ते श्रीगुरुमेत्य शिवरात्र्यां तमानर्चुः। मिथ्येति वक्तुः कुम्भीपाक एव। ततः पक्षाद्यात्रिका आगतास्तैः कथितं ज्ञात्वा सर्वे विस्मिताः। एवं सिद्धोक्तं गङ्गाधरज आह ।।९९-१०७।। मुदा सिद्धो बुद्धोऽवददिदमदभ्रभ्रमहरं वरं शिष्यं हृष्यतितदिदमहमेवापि च वदे।। मुदे तद्भक्तानां गुरुवरमहत्त्वामृतमिदं विदं श्रोतृभ्यो यद्वितरति रतिं प्राप्य महति।।१०८।। इति चूर्णिकायां चतुश्चत्वारिंशोऽध्यायः।।४४।।

।।इति चतुश्चत्वारिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ पञ्चचत्वारिंशोऽध्यायः

अथ सारसंग्रहश्लोकोऽयम्-

यद्धीरासीद्भ्रमरविलसिता नन्द्यम्बोक्त्या कुरुगुपमशधीः।। प्राप्येशं द्राक्स शुचिकविरभूद्गुर्वीक्षातोऽक्षयुगमित इह।।४५।।

नामधारक आह। गुरुचरित्रं श्रुतम्, ते वचो धन्यं, साक्षाद्ब्रह्म व्यदर्शितम्। मे देवदुर्लभं सुधापानं लब्धमिष्टं च। कष्टं नष्टं, दैन्यं च। त्वं तारको लब्धः अग्रतश्चरितं कथय। सिद्ध आह। अपरेऽह्नि चित्रं जातं शृणु।।५।। नन्दिशर्मा कुष्ठी तुलजापुरे त्र्यब्दमुपोष्य देवीं कष्टेनापूजयत्स्वप्ने साऽऽह। चन्दलापरमेश्वरीं गच्छेति। तथेति स गत्वा सप्तमासमुपोषितस्तां पुरश्चरणेनानर्च। तयोक्तं गन्धर्वपुरस्थं भिक्षुवेषं त्रिमूर्तिं नृसिंहसरस्वतीं गच्छ। प्रबुद्धः स आह। किमर्थं षण्मासं कष्टं दत्तम्। पूर्वं कथं नोक्तम्। देव्याज्ञया त्वामागमम्। ज्ञातं देवत्वम्। नृदर्शनाय प्रेरयसि। अहो दैवं त्वं जगदम्बाऽपि मर्त्यं गच्छेति वक्तुं न लज्जसे। सप्तमासानुपोष्य दैवी शक्तिर्ज्ञाता।।६-१५।। पूर्वमुक्तं चेत्कुत ईदृक्कष्टं एवं दुःखितः पुनः पुरश्चर्यां करिष्ये। आरोग्यं न चेत्प्राणांस्त्यक्ष्य इति प्रायोपविष्टं तत्स्वप्ने देवी प्राह। त्वमितो गच्छेति। अयं निष्काश्य इति भक्तानप्याह। ते तमूचुर्देव्याज्ञयाऽऽशु गच्छ। नोचेद्बहिर्निष्कासयाम इत्युक्तः स देवीमभ्यर्च्य पारणां कृत्वा ततो गन्धर्वपुरे मठमेत्य क्व यतिरित्यपृच्छत्। लोका ऊचुः। गतेऽह्नि शिवरात्र्यां मठे उपोषितोऽद्याशु सङ्गमाच्छ्रीगुरुरागमिष्यति अत्रान्तरे भगवान्प्राप तदा लोकः कुष्ठिनं दूरीचक्रे। शिष्यः श्रीगुरुमूचुः।।१६-२५।। कुष्ठव्याप्तसर्वाङ्गः कश्चिद्दर्शनार्थमागतः। श्रीगुरुराह। संशयं मनसि धृत्वाऽऽगतस्तमाह्वयत। स आहूतो दूराद्गुरुं वीक्ष्य पदे पदे साष्टाङ्गं प्रणिपतन्गुरुं प्राप। श्रीगुरुस्तमाह। पूर्वं देवसन्निधिं गत्वा नरं ससंशयं कुत आगतोऽसि। इत्युक्तः स हृद्गतमनेन ज्ञातं आत्माऽयमिति निश्चित्य क्षमस्वेति साष्टाङ्ग नत्वाऽऽह। स्वामिन्तमोऽन्धोऽहम्। ते दृष्ट्या पूतोऽस्मि। पापकर्मा पापात्मा मूढोऽहमज्ञानवेष्टितः साक्षात्परब्रह्म त्वां न जाने। अद्य मे सुदिनं सर्वं दुष्कर्माद्य गतम्। त्वं भक्ताधारः शरणागतस्त्राता।।२६-३५।। भक्तकामधुक्त्वं नृरूपेणावतीर्णोऽसि। त्वं त्रिमूर्तिः कस्ते पारं वेद। अद्य मनोरथः पूर्णः। सगरोद्धाराय गङ्गेव नस्त्रातुं भुव्यवतीर्णोऽसि। औपपत्यादहल्या पाषाणत्वं गताऽपि रामस्पर्शाद्यथा पूता तथाऽहमभवम्। उद्वाहोर्ध्वं कुष्ठेन व्याप्तं मां त्यक्त्वा भार्या पितृगृहं गता। दूरं गच्छेति पितृभ्यामपि त्यक्तोऽहं देवीं गत्वोपवासानकरवम्। तयाऽप्यत्र तेऽघनाशो न, चन्दलेश्वरीं गच्छ, ते रोगनिवृत्तिर्भवेदित्युक्तोऽहं तत्रागत्य बहुकष्टमकरवम्। बहिर्हेयोऽयमिति साऽपि देवी वक्ति।।३६-४५।। देवा अबीभत्सन्त चेत्क्वायं नरीनर्ति। कुष्ठिनो मे मुखमपि नेक्षन्तेऽतो मरणं वरम्। ततस्त्वां शरणं गतोऽस्मि। मे निष्कृतिर्भवेन्न वा। शीघ्रं वद। आशया बध्वा मा स्थापय, न मे देहापेक्षा, तेऽग्रतः प्राणांस्त्यक्ष्ये, यथेच्छसि तथा कुरु; इत्थं सकरुणं श्रुत्वा हसन्श्रीगुरुः सोमनाथमाह। एनं सङ्गमं नीत्वा, सङ्कल्पपूर्वकं स्नापयित्वाऽश्वत्थमर्चयित्वा धृतवस्त्राणि हापयित्वा, नवीनं धारयित्वाऽऽश्वानयेत्युक्तः स तथाऽकारयत्। स्नानमात्रात्तद्देहः शुद्धोऽभून्नन्दी अश्वत्थं प्रदक्षिणीकृत्य सुवर्णाङ्गो भूत्वा नवं वस्त्रं परिधाय, जीर्णं यत्र जहौ सा भूः क्षारमृत्तिकाऽभूत्।।४६-५४।। सोमनाथस्तमानीय गुरुपादयोरधात्। सर्वे विस्मिताः। धन्योऽस्मीति

हृष्टं पुलकितं हर्षाप्लुतं नन्दिनं ते कामः सिद्धो न वा, सर्वाङ्गं विलोक्य वदेति गुरूक्तः स जंघयोरेव शिष्टं कुष्ठं दृष्ट्वा भीत आह। ते कृपादृष्ट्येदं कुतः शिष्टं न जाने। परमात्मन्दयस्व। श्रीगुरुराह मर्त्यः किं करिष्यतीति संशयादवशिष्टं अत्रोपायं शृणु। त्वं कवित्वेन मे स्तुतिं कुरु। ते शुद्धिर्भविष्यति। स आह। मंदधीरहं न जाने काव्यव्युत्पत्तिं लिपिमपि न जाने इति पदे दधौ। तदा गुरुस्तज्जिह्वायां भस्म चिक्षेप। स ज्ञानी भूत्वा।।५५-६४।। पदोः शिरो निधाय गुरुं तुष्टाव। स्वामिन्नज्ञानात्ते सेवा न कृता। भवसिन्धौ मग्नो मायाजालवेष्टितोऽहं ते पदे न स्मरामि। भवचक्रे भ्रमन्नानायोनिषु संसरन्कर्म भुञ्जे। स्थावरस्वेदजाण्डजेषु ततो जारजेषु शूद्रादिजातिषु च भ्रमतो मे क्व ते स्मृतिः। श्रेष्ठब्राह्मणजातिष्वपि तथा। पितू रेतो मातू रक्तं चैकीभूय गर्भवासे पञ्चाहे बुद्बुदः, पक्षेण पेशी, मासेन पिण्डो, द्वितीये मासि शीर्षादि, तृतीये सावयवता, तुर्ये छिद्राणि, पञ्चभूतान्येकीभूयैवं पञ्चमे प्राणावेशः।।६५- ७४।। त्वग्रोमनखश्वासाः षष्ठे, सप्तम इन्द्रियाणि, अष्टमे चित्त्वम्। एवं निरयोपमे मातृकुक्षौ कष्टं दृष्टम्। तदा क्व ते स्मृतिः। यथेष्टं क्षारोष्णादि माताऽश्नाति तदाऽतीव वेदना तदा क्व ते स्मरणम्। जरायुवेष्टितः पञ्जरे पक्षीव कष्टान्नवमासानुषित्वा मातृयोनिद्वारा कष्टाद्बहिः पतितस्य मे शीर्ष्णि शतायुर्लिखितं, तत्रार्धं निशि वृथा गतं, शिष्टं बाल्ययौवनवार्धक्यैः पराधीनतया च। मलमूत्रदूषिते पर्यङ्के बाल्ये यत्कष्टं तदवाच्यम्। तत्र स्वयं स्वविष्टाभक्षणम्। मातोदरपीडामज्ञात्वा स्तन्यमदात्।।७५-८४।। क्षुधाक्रान्तो- ऽभवं तदा बलादौषधमपाययत्। क्षुधितमज्ञात्वा दोलायां निधाय स्वपेत्याह। आर्तिं न वेद। रुदतो मुखे कांजिकं सिक्त्वा रक्षां बबन्ध। क्षुधं न वेद। पर्यङ्के वृश्चिकेण दष्टमज्ञात्वा दोलां चालयति तूष्णीं तिष्ठेति लालयित्वा दत्तं स्तन्यमपि दुःखेन न पीतमज्ञात्वा पुनः सवृश्चिकदोलायां शाययित्वा विषार्तिं न वेद। माता क्षाराम्लाद्यश्नाति, तद्दुष्टस्तन्यपानाच्छ्वासादिपीडा, तमज्ञात्वौषधं ददाति, तेन नेत्रपीडा ततोऽञ्जनादिलेपनादतीव कष्टम्। एवं बाल्येऽज्ञानात्पराधीनतयाऽऽयुःक्षयः। ततः क्रीडादिना च परतः।।८५-९४।। तारुण्ये कामपीडया पतङ्गोऽग्नाविव वनितानले आयुःक्षयः। पितरौ गुरुं च तिरस्कृत्य, देवमायां स्त्रियं दृष्ट्वा तद्भावैरवशो भोगबुद्ध्या कार्याकार्येऽज्ञात्वा कुलाद्यविचार्य परस्त्रियं कांक्षे। सेवामकृत्वा वृद्धा निन्दिता विप्राश्चैवं मत्तस्त्वां न स्मृतवान्। मांसाशया मत्स्य इव विषयाशया मर्त्तुं प्रवृत्तोऽभवम्। नानावर्णस्त्रियो भुक्ताः, परद्रव्यं हृतं, साधवो निन्दिता, एवमहं मदान्धः, स्वानुसन्धानवर्जितः कामबाणविद्धः, साधुवचनं तिरस्कृत्य, त्वां विस्मृतोऽस्मि। ततो वार्धक्ये स्त्रीपुत्रादयोऽर्थं गृहीत्वा जहुः। श्वासोच्छ्वासकफाविष्टं पराधीनं बीभत्समातुरम्।।९५-१०३।। पराधीनेन्द्रियं, पलितमुण्डं, धृतदण्डं, च्युतदन्तं, प्रहर्तुं शत्रव इव रोगा उपस्थिताः। अथापि ते सेवा न कृता। ईदृक्शाट्यं त्वां शरणं गतोऽस्मि। जगत्त्रातुं त्वं नारायणोऽवतीर्णोऽसि। हे गुरो! मानुषवेषधृक्त्वं परंब्रह्म दिवान्धोऽर्कमिव विश्वचालकं त्वां न वेत्ति मूढः। ते बालं मां त्राहि एवं स्तुत्वाऽभितो वीक्ष्याह। सर्वे लोकाः शृणुत। मया बहु पापं कृतमपि तत्सर्वमपि साक्षाद्ब्रह्मणो गुरोर्दर्शनादेव नष्टम्। चरणं पवित्रमिति श्रुतिर्वक्ति। तत्सत्यम्। एतं भजत कोऽन्यो देवः।।४-११२।। धात्रा या दुष्टलिपिर्लिखिता साऽपि श्रीगुरुपादस्पर्शाच्छुभा भविष्यति। निधाने समीपे कुतो लोका वृथा भ्रमन्ति। श्रीगुरुर्भजतां कामधेनुः वैकुण्ठोऽयम्। इह परत्र च सुखदः सत्यं नात्र संशयः। एवं तेन स्तुतः श्रीगुरुस्तमाह। त्वं कवीश्वरः। हे लोक अस्मै मे कवीश्वरेत्याख्या दत्ता। तदा नन्दी गुरोः पदे दधौ। अवशिष्टं च कुष्ठं नष्टम्। ततः स गुरुसेवकोऽभूत्। तादृगन्योऽपि कवीश उपागतः। नामधारक आह। द्वितीयः सेवकः कथं जातस्तत्सर्वं कृपया वद। तच्छ्रवणे मेऽतीव वाञ्छाऽस्ति। सिद्धेनोक्तं यत्तद्गङ्गाधरजः सरस्वती सुमतिः। वक्ष्यति मनोहरं श्रीगुरुचरितं कामधुग्वरीवर्ति।।१३-१२२।। इति चूर्णिकायां पञ्चचत्वारिंशोऽध्यायः।।४५।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ षट्चत्वारिंशोऽध्यायः

अथ सारसंग्रहश्लोकोऽयम्-

स्वप्न उपेत्य स आदद ईशो रसकृतयुक्त इहार्चनमग्र्यम्।। केसरिदत्तमभूद्द्रुतमध्यात्मकपददस्य कविः स च शिष्यः।।४६।।

नामधारक आह। नन्दिकवेः कथा श्रुता, को द्वितीयः कविः, कथं गुरुशिष्योऽभूत्कृपां कृत्वा तद्वद। सिद्ध आह। आश्चर्यं शृणु। कविकथान्वितं गुरुचरित्रं वक्ष्ये। तत्र गुरुकीर्तिः प्रसृता ततो बहु भक्ता जाताः। ते च नन्दिकवितां जगृहुस्ततः सा प्रकाशिता। ग्रामान्तरे कश्चिद्भक्तो महोत्सवार्थं गुरुं निन्ये। तत्र हिप्परगिग्रामे स भक्तो विधिनानर्च। तत्र शिवालये कल्लेशाख्यं लिङ्गं ख्यातम्। तत्रागन्तुकः।।१-८।। नृकेसरिसंज्ञः कविः प्रत्यहं नवीनपञ्चपद्यानि कल्लेशाय न्यवेदयत्तं विनाऽन्यं देवं न मेने। शिवसेवारतं तं जन आह। ते कवित्वं साधु। गुरोरतीवप्रीतिरतस्तद्गुणान्वर्णय। स आह। अन्ये सुराः संत्यथापि मे जिह्वा कल्लेशाय दत्ता, नरस्तुतिं न करिष्यामि। इत्युक्त्वा लिङ्गपूजां कर्तुमुपविश्य पूजाकाले निद्रया व्याप्तः। स्वप्ने लिङ्गे उपविष्ट गुरुं भक्त्याऽपूजयत् तत्र लिङ्गं नापश्यत्। श्रीगुरुस्तमाह। कवितानर्हमानुषं कुतोऽर्चसीत्युक्तोऽपि स षोडशोपचारैरानर्चेति दृष्ट्वा वीतनिद्र उत्थाय विस्मितः स स्वगतं आह। श्रीनृसिंहसरस्वती शिव एवात्रावतीर्णो मयाऽर्चितश्च। अतोऽस्य दर्शनं कार्यमित्युक्त्वा।।९-१८।। प्रतिपदं दण्डवन्नमन्गुरुमेत्य पदे धृत्वाऽऽह। दयस्व अज्ञोऽहं त्वां न जाने। मायावेष्टितोऽहं त्वां न वेद्मि। त्वं कल्लेशः साक्षाच्छिवोऽसि। हे जगद्गुरो मे मनस्स्थिरीकृत्य ते पदलग्नोऽस्मि। त्वं विश्वाधारः शरणागतत्राताऽतस्त्वत्पदाब्जरसं पातुं भ्रमरप्रायोऽस्मि। समीपस्थं निधानं त्यक्त्वा को वनमटेत्। कामधेनौ गृहागतायां क्व दैन्यम्। पुराऽनेकवत्सरान्मुनयोऽतपन्। कष्टार्तेभ्योऽपि तेभ्यस्ते दर्शनं न। अनुष्ठानं विनाऽप्यत्र नो दर्शनं त्वया दत्तम्। कल्लेशप्रसादान्मे कामसिद्धिरभूत् त्वमेव कल्लेशोऽसीति निश्चयः। सद्गुरो दयस्वेति पदे दधौ। श्रीगुरुराह। मन्निन्दकस्य ते चित्तेऽद्य कुतोऽसौ भक्तिरागता।।१९-२७।। स आह। अहमज्ञानतमोवृतोऽभवम्। अथाप्यद्य त्वं ज्योतिरुदितोऽसि। कल्लेशार्चनपुण्याद्भवत्पदं लब्धम्। अद्य पूजासमये लिङ्गे त्वामेवाद्राक्षम्। स्वप्ने दृष्टे पदे। दैवादद्यैते प्रत्यक्षमद्राक्षम्। मां शिष्येषु योजयेत्युक्त्वा हृद्यैः पद्यैः षोडशोपचारगुरुपूजां व्यधात्। श्रीगुरुर्भक्तानाह। स्वप्नेऽयं यथा मामपूजयत्तथैवाधुना भक्तियुक्तेन चेतसाऽऽनर्चेति तमुपाहूय वरं ददौ। स पदे धृत्वाऽऽह। शिष्यो भवेयम्। श्रीगुरुराह। कल्लेशो मे सम्मतस्तत्र वसामि तं भक्त्याऽर्चय। स आह। सुदुर्लभं प्रत्यक्षं त्वां हित्वा कुतोऽन्यः पूज्यः। लिङ्गे त्वामद्राक्षम्।।२८-३७।। त्वं त्रिमूर्तिर्लीलयाऽवतीर्णोऽसि। ममायं निश्चयोऽतस्त्वां न जहामि। इति प्रार्थ्य गन्धर्वपुरे गुरुमन्वेत्य कवित्वैः कीर्तनभक्त्योपतस्थे एवं द्वौ कवी गुरुसन्निधौ स्थित्वाभजताम्। यस्मिन्श्रीगुरुप्रसादः स कामितं लभेद्गृहे कल्पवृक्षः। सरस्वतीसंज्ञकविप्रगङ्गाधरार्यपुत्रेण च नौरसङ्गा।। तर्तुं भवाब्धेः सुकथोदिताऽत्र हितप्रदा चापि तथा परत्रः।।३८-४२।। इति चूर्णिकायां षट्चत्वारिंशोऽध्यायः।।४६।। **।।इति षट्चत्वारिंशोऽध्यायः।।**

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ सप्तचत्वारिंशोऽध्यायः

अथ सारसंग्रहश्लोकोऽयम्-

दीपावल्यां संप्रार्थितः सप्तशिष्यैः सप्तग्रामान् तत्क्षेत्रसंस्थोऽप्यगात्सः।। अष्टात्मा भूत्वा सप्तवेदाढ्यसर्गे लोके यन्मूर्तिर्विश्रुता वैश्वदेवी।।४७।।

नामधारक आह। कृपयाऽग्रतः कथां वद। सिद्ध आह। शृणु। यच्छ्रवणादुभयसिद्धिर्मोक्षश्च।।१-२।। ईदृक्पवित्राच्चरित्रात्पतितोऽपि पूतो भवेत्। तत्र दीपावलीक्षणे सप्त प्रियभक्ता गुरुमेत्य नत्वा पृथगूचुः। दीपावल्युत्सवार्थं नो गृहमागच्छेति। एकैकस्य पृथग्ग्राम इति ज्ञात्वा गुरुराह। सर्वालयान्प्रत्येकदैव कथं ममागमो भवेत्। शिष्याधीनोऽस्मि भवन्तो विचार्यैव ब्रुवन्तु। ततस्तेऽन्योन्यं कलहं चक्रुः अहं नेष्याम्यहं नेष्यामीति। तान्निवार्य श्रीगुरुराह। व्यर्थोऽयं कलहः सर्वेषामेकोऽहं गुरुरेकगृहे यास्ये। ते प्राञ्जलय ऊचुः। समर्थोऽयं दुर्बलोऽयं इति भेदं मा प्रेक्ष। समं पश्य, दुर्बलानुपेक्षसे चेद्गङ्गाप्रवेशं कुर्मः। कौरवप्रार्थितोऽपि कृष्णो विदुरभक्तगृहे कदन्नमपि बुभुजे।। ३-१२।। नौदासीन्यं कुरु नस्ते दासाः। शिरसाऽऽज्ञां गृण्हीम, एवमुक्त्वा प्रणेमुः। तान्सर्वान्दृष्ट्वा गुरुराह। एमि गृहं प्रतियात, संशयो माऽस्तु, दिव्यं दद्मि। त ऊचुः। एवं श्रवणात्केन निश्चयः कर्तव्यः। एतेऽज्ञा इति मत्वैकैकं रह आहूय कर्णेऽकथयद्गुरुः। त्वदालयमेष्ये, यस्मै कस्मै न वाच्यमिति हृषीकेशेन गुरुणोक्ताः सप्तापि तेऽन्योन्यं अकथयन्त एव स्वं स्वं गेहं ययुः। श्रीगुरुश्च मठं प्राप। ग्रामस्थास्तच्छ्रुत्वा नत्वा गुरुमूचुः। स्वामिन्नस्मान्हित्वा क्व यास्यसीति।।१३-२३।। श्रीगुरुराह। अत्रैव स्थितोऽस्मि। हे भाविकाश्चिन्तां मा कुरुतेति। ततः सायं धनत्रयोदश्यां मङ्गलस्नानदिने श्रीगुरुरपारमहिमो नारायणरूपोऽष्टरूपो भूत्वा सप्तग्रामान्गत्वा मठेऽपि स्थित्वा पूजां गृहीत्वा मठं प्राप। तद्गुह्यं केऽपि न विदुः। ततः कार्तिक्यां त्रिपुरोत्सवं कर्तुं ते सर्वे गुरुसमीपमेत्योचुः दशदिनैः पुनर्दर्शनमिति। मिथ्या मिथ्या, मद्गृह एव स्थितो, मयेदं दत्तमेतद्वस्त्रादि गुरुनिकटेऽस्तीत्यन्योन्यमूचुः। ग्रामस्था ऊचुः। गुरुरत्रैव दीपावल्यां स्थितः। सर्वे चकिताः। सर्वे ऊचुः नारायणोऽयं श्रीगुरुस्त्रिमूर्त्यवतारो न संशयः।।२४-३२।। इत्युक्त्वा तुष्टुवुः। हे वेदात्मन्गुरुनाथ! ते माहात्म्यं को वेत्ति। हे विष्णो! विश्वव्यापक! तेऽपारमहिमा। हे परात्पर! कार्यार्थं त्रिरूपोऽपि त्वमेक एवेति स्तुत्वा दीपमालाः प्रज्वाल्य विप्रान्भोजयामासुः। एवं भुवि महिमा ख्यातः। गङ्गाधरज आह। अन्तिके कल्पद्रुममज्ञात्वाऽज्ञानान्धा दैन्यभागिनः भो जन! आशु कामसिद्ध्यै गुरुं भज। ममानुभवो लब्धः। यथा अमृतेन तृप्तस्य क्षीरप्रयोजनं न, तथा नामामृतेन तृप्तस्य किं ज्ञानेन प्रयोजनम्। गुरुं भजत्युच्चैर्मे डिण्डिमस्ताड्यते। वेदादिनोक्तं गुरुरेव त्रिमूर्तिः गुरोरन्यो न देवः। गुरुनिन्दको मूढः सौकरीं योनिं गमिष्यति। नेयं मे स्वकपोकल्पना। शास्त्रप्रमाणं चेदङ्गीकुर्वन्तु।।३३-४२।। दुस्तरासारसंसारोत्तारणाय गुरोरन्या न गतिः। सुलभा कथामृतप्रपेयं मयेह स्थापिता। यथासुखं पेया यतोऽमरत्वम्। नृसिंहसरस्वती त्रिमूर्त्यवतारो गाणगापुरे प्रत्यक्षोऽस्ति। ये तत्र गमिष्यन्ति तेषां क्षणात्कार्यसिद्धिः। रोचते चेद्वो हितं वच्मि। गन्धर्वपुरं शीघ्रं गच्छतेति सरस्वती वक्ति।।४३-४७।। इति चूर्णिकायां सप्तचत्वारिंशोऽध्यायः।।४७।। **।।इति सप्तचत्वारिंशोऽध्यायः।।**

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ अष्टचत्वारिंशोऽध्यायः

अथ सारसंग्रहश्लोकोऽयम्-

क्षेत्रं गुरूक्तवदशेषमपक्वधान्यं चिच्छेद शूद्र उपगां विनिवारयन्तीम्।सिंहोन्नताक्ष इव चात्मवधूं निवार्य लेभेऽमितर्धिमिभवेदयुजीशभक्त्या।।

सिद्ध आह। अपूर्वं शृणु। गुरुचरित्रं वक्तुं मेऽतीव हर्षः। तत्र कश्चिच्छूद्रो भक्तोऽभूत्तत्कथां वच्मि।।२।। गुरौ नित्यमनुष्ठातुं याति सति कृषिकर्मरतः स शूद्रस्तं दृ??धावन्नेत्य साष्टा??नत्वा स्वक्षेत्रं व्रजति भूयो माध्याह्ने गच्छन्तमपि तथैव ननाम। श्रीगुरुस्तूष्णीं तिष्ठति न वक्ति। एवं बहुतिथे काले कदाचिन्नमन्तं शूद्रं श्रीगुरुर्हसन्नाह। नित्यं कष्टेन कुतो नमसि। स्फुटं वद। स बद्धाञ्जलिराह। अलं क्षेत्रपाको भवतु। श्रीगुरुराह। अत्र किमुप्तम्। स आह। यावनालाः। ते नित्यं नमनात्सस्यमतीव दृश्यते। ते धर्मान्मासेन भक्षिष्यामि। स्वामिन्क्षेत्रं सुधादृष्ट्या वीक्ष शूद्रोऽयमिति नोपेक्ष्यः। त्वं पाताऽसि।।३-११।। इत्युक्तः श्रीगुरुः क्षेत्रं गत्वाऽऽह। मे वाक्ये विश्वासश्चे??त्या वाक्यं मेऽ??करोषि चेत्ते वक्ष्ये। स आह। गुरुवाक्यं हितम्। नान्यो मे भावस्त्वं साक्षी सर्वदृग्वेत्सि। गुरुराह। मध्याह्ने यावदागमिष्यामि तावत्सर्वं छिन्धीत्युक्त्वा स??ं ययौ। शूद्रो गुरूक्तं कर्तुं निश्चित्य ग्रामे क्षेत्रनाथमेत्याह। गतवर्षात्करं निश्चित्य पत्रं मे देहीति। स आह। अतीव धान्यवृद्धिर्भविष्यत्यतो न दास्ये। इत्युक्तः शूद्र आह। गतवर्षाद्द्विगुणं दातुं निश्चित्य पत्रं देहीति। तथेति स स्वीचकार। शूद्रोऽभयपत्रमादाय शीघ्रं नरानाहूय मुदा सस्यं छेत्तुं यावदारेभे।।१२-२०।। तावत्सपुत्रा स्त्रीरेत्य निवारयामास। स गुरुभक्तस्तान्पाषाणैरहन्। ते भीता राजद्वारमेत्याऽहुः शूद्रः पिशाचवज्जातः। अपक्वं सर्वं धान्यं छिनत्ति। वारणाय प्रवृत्तान्नः पाषाणैर्हन्ति। मुण्डिवाक्याद्वृथा छिनत्ति। मासाल्लभ्यं जीवितं वृथा गतम्। क्षेत्रनाथ आह। स कामं किमपि करोतु। गताब्दाद्द्विगुणं धान्यं दातुं पत्रं दत्तम्। अथापि वारय इति दूतं प्रेरयत्। तमागतं दूतं शूद्र आह। गृहे छन्नं धान्यं दास्यामि। स दूतः परीत्याह। वः कुतो भयमुपस्थितम्। धैर्यं न चेद्द्वारि गाः बध्नामि। दत्तपत्रानुसारेण दास्यामीति शूद्र आहेति। क्षेत्रप आह। त??ऽतीव धान्यं छन्नं ज्ञातं का मे चिन्तेति।।२१-२९।। शूद्रो निःशेषं छित्त्वा, तोत्राणि निधाय, गुरुं ध्यायन्मार्गे तस्थौ। तावदागताय गुरवे छिन्नं दर्शयामास। श्रीगुरुराह। कुतो व्यर्थं छिन्नम्। सोपहासेनोक्तं कुतः सत्यं मतम्। शूद्र आह। ते वाक्यं कामधुक्। श्रीगुरुराह। यथा भक्तिस्तथा फलप्राप्तिर्भविष्यति। चिन्तां मा कुर्विति तमुक्त्वा मठं ययौ। शूद्रोऽपि गृहं गतः। ग्रामस्थाः शूद्रमाहुः। मौढ्यात्किमिदं कृतम्। तत्स्त्री उच्चै रुरोद। नो ग्रासो गत इति। शूद्रः सर्वान्निवार्याह। चिन्ता माऽस्तु गुरुवाक्यं कामधुक्। सुखं भवेन्मूढा न विदुः एकैकधान्यतः सहस्रगुणं धान्यं दास्यतीति मे धैर्यम्। न हानिः स न नरः। शिवमुनिरेव।।३०-३८।। यस्योपरि तत्कृपा तस्य कुतो दैन्यं भयं च। मे निधिर्लब्धः। एवं स स्त्रियं चाह। सुदैवं भावीत्यत एतत्कथितमिति। एवं स हृष्टः स्वेष्टजनानपि दूरदृष्ट्या बोधयामास। सर्वे तूष्णीं तस्थुः। ततोऽतीव शीतो वातो ववौ। यतः सर्वग्रामक्षेत्रपाकक्षयोऽभूत्। ततः सूर्ये मूलर्क्षगतेऽकालेऽप्यतीव वृष्टिरभूत्। ततो ग्रामे धान्यनाशोऽभूत्। शूद्रक्षेत्रे एकैकछिन्नमूलत एकादशैकादशा??ाः प्रादुरासन्। तत्रातीव

यावनालपाकोऽभूत्। लोकाः तदाश्चर्यं मेनिरे। शूद्री तद्दृ?तीवानन्दिता पतिपादौ धृत्वा मञ्जुलं मधुरमाह। प्राणनाथ! दौरात्म्यं क्षमस्व। अज्ञान्निर?मुक्तं गुरुनिन्दां च कृता तत्क्षमस्वेति पतिं क्षमाप्य।।३९-४७।। क्षेत्रदेवं सम्पूज्य, गुरुदर्शनार्थं पत्या सहागमत्। शूद्रस्तया सह गुरुमानर्च। तौ वीक्ष्य गुरुराह। किमेतद?म्। तावूचतुः। स्वामिन्श्रीगुरो जय। त्वमेव कामधुक्कुलदेवश्च। ते वचोऽमृतम्। पादश्चिन्तामणिर्नौ कामः पूर्णः आवां त्वां शरणं गतौ। हे भक्तवत्सल! ते बिरुदावलिः ख्याताऽनुभूता चेति तौ दण्डवत्पतितौ। शूद्री गुरुं नीराज्य बहु तुष्टाव। तुष्टः श्रीगुरुर्मुदा प्राह। ते गृहेऽखंडा श्रीरस्तु ततोऽनुज्ञातौ तौ गृहं गतौ। गताब्दाच्छतगुणं धान्यं जातम्। शूद्रोऽधिपमाहूय धान्यवृद्धिं दर्शयित्वाऽऽह। बहु धान्यं जातम् भवतेऽर्धं ददामि।।४८-५६।। गतवर्षाद्द्विगुणं दातुं निश्चितमपि शतगुणा धान्यवृद्धिर्जाता। अतोऽर्धं दास्ये। संशयो माऽस्तु। स आह। लोभतः कुतो धर्महानिः कार्या। इदं गुरुप्रसादात्ते लब्धं यथासुखं गृहं नीत्वा राज्यं कुरु। तथेत्युक्त्वा स च द्विजेभ्यो बहु धान्यं दत्वा, राजभागं च प्रदाय, बहु धान्यं गृहं निन्ये। ईदृग्गुरुचरित्रम्। यस्य दृढा भक्तिस्तस्य कुतो दैन्यम्। सर्वाभीष्टकरं गुरोः सुचरितं शृण्वन्ति ये त?। श्रीर्नैसर्गिकचापलं च सततं त्यक्त्वैव तिष्ठेत्सदा।। लोको यो गुरुसेवकोऽस्य तु गृहे दैन्यं कुतोऽतोऽनिशम्। सेव्यः स?रित्युपादिशदसौ ग?रस्यात्मजः।।५७-६२।। इति चूर्णिकायां अष्टचत्वारिंशोऽध्यायः।।४८।।

।।इति अष्टचत्वारिंशोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ एकोनपञ्चाशत्तमोऽध्यायः

अथ सारसंग्रहश्लोकोऽयम्-

सर्गेऽकवाक्सम्मित इन्द्रवज्रालेपोपमाघक्षतिकृद्भगिन्याः।

तत्क्षेत्रमाहात्म्यमुवाच सोऽष्टतीर्थानि चादर्शयदत्र सद्भ्यः।। ४९।।

नामधारकः सिद्धपदे धृत्वा नत्वाऽऽह।।१।। वेषधारी नर इव त्रिमूर्त्यवतारोऽयं भूमिष्ठासंख्यतीर्थानि त्यक्त्वा कुतोऽत्र स्थितः, किन्नाम, क्व चैतत्क्षेत्रम्। तन्माहात्म्यं विस्तराद्वदेति तद्वचः श्रुत्वा तुष्टः सिद्ध आह। समाहितः शृणु। अत्र गन्धर्वनामकक्षेत्र आश्विनकृष्णचतुर्दश्यां दीपोत्सवे श्रीगुरुः शिष्यानाह। अद्य त्रिस्थलीयात्रां कुरुत। त ऊचुः। संभारान्संभरिष्यामः पाथेयानि च। प्रहसन्श्रीगुरुराह। सन्निधौ त्रिस्थली विद्यते। किं पाथेयप्रयोजनम्। सकुटुम्बा निर्गच्छत। अहं चागमिष्यामीत्युक्त्वा तैः सह सङ्गमं गत्वा स्नात्वाऽऽह। प्रयागेन समोऽयं सङ्गमोऽस्यामितमाहात्म्यम्। ततोऽप्यधिकं षट्कूलतीर्थम्।।२-१०।। भीमामरजासङ्गमादधिकस्तीर्थराजोऽत्र स्नानादनन्तपुण्यम्। उत्तरवाहिन्यां त्वतोऽधिकम्। अत्र पावनान्यष्टतीर्थानि। एकैकस्य माहात्म्यं किं वाच्यम्। भक्ता ऊचुः। कुतोऽसावुत्पन्नाऽमरजानदी। श्रीगुरुराह। सम्यक्पृष्टम्। शृणु। पुरा देवदैत्ययुद्धं जातम्। जालंधरासुरेण देवा हताः। इन्द्रः शिवं गत्वा सर्वं न्यवेदयत्। हे शिव! युद्धे विद्धदैत्यानां यावन्तो रक्तबिन्दवो भुवि पतति तावन्तो दैत्या जातास्तैस्त्रिभुवनं व्याप्तम्।।११-२०।। इतीन्द्रवचः श्रुत्वा क्रुद्धः शिवो लोकं दहन्निवोग्रमूर्त्या दैत्यान्हन्तुं प्रतस्थे। तदेन्द्र आह। देवजीवनोपायं तावत्कुरु। तदा शिवो देवसञ्जीवनार्थमिन्द्रायामृतघटं ददौ। तमादायेन्द्रो हतदेवशरीरेषु सिषेच। ततस्ते मृता अपि मुक्तनिद्रा इवोत्थिताः। शिष्टामृतं कुम्भाद्भुवि निःसृतम्। सेयं महाप्रवाहा सञ्जीवन्यमरजानदी त्रिविधपापहर्त्री। येऽत्र भक्त्या स्नास्यन्ति न तेषां कालमृत्युः कुतोऽपमृत्युः स शतायुर्दुःखदोषरोगहीनश्च स्यात्। ब्रह्महत्यादिहृन्नदीयं भीमायां सङ्गता त्रिवेणीसङ्गमोऽयम्।।२१-२९।। अत्र वैशाखकार्तिकमाघस्नानादिह सुखमन्ते मोक्षश्च। नित्यस्नानासम्भवे ग्रहणसंक्रान्तिपर्वैकादशीषु स्नानादनन्तफलम्। नित्यस्नाने दोषनाशः शतायुश्च। अश्वत्थसन्निधौ मनोहरतीर्थम्। स्नानमात्रात्तु मनोरथपूर्णता। यत्र कल्पद्रुमोऽश्वत्थस्तत्र किं सिद्ध्येत्। चिन्तितकामाप्तिर्भवत्येव सत्यम्। अहं सदाऽत्र तिष्ठामि। ये भक्त्याऽर्चन्ति तेषां कलियुगेऽपि मे दर्शनम्। कल्पद्रुं सङ्गमेशं शिवं च संपूज्य त्र्यम्बकमंत्रं जपेत्।।३०-३९।। श्रीशैले मल्लिकार्जुन इवायं सङ्गमेशः। पूर्वं नन्दिकेशं नत्वा चण्डस्थानमेत्य नत्वा सव्येन परीत्य नन्दीशं नत्वा सोमसूत्रेण चण्डं चागत्य नत्वा पुनः शिवसमीपमागच्छेदेवं त्रिः शैवीः प्रदक्षिणाः कृत्वा, वामहस्तेन नन्दिनोऽण्डं धृत्वा शृङ्गयोरङ्गुष्ठतर्जन्यौ निधाय, तन्मध्यतः शिवं पश्येत्स इन्द्रवत्तस्य गृहे धनधान्यादिसम्पदखण्डश्रीः पुत्रपौत्रादिवृद्धिश्च। ततोऽग्रतो महातीर्थं साक्षाद्वाराणसीयं नागेशाख्यग्रामादुद्गताऽस्या आख्यानं शृणु। पुरा कश्चिद्भारद्वाजगोत्रजो ब्राह्मणो विरक्त ईशभक्तसत्यक्तसर्वसङ्गः।।४०-४८।। तस्येशः समक्षं दृश्योऽभूत्तद्दर्शनाज्जाताल्हादः स देहं विस्मृत्य चचार। जनस्तं पिशाचं मेने। ईश्वरः पाण्डुरङ्ग इति

तद्भ्रातरौ पाथेयं सम्पाद्य ब्रह्मनिष्ठं तं प्रोचतुः। हे पिशाच। काशीमेष्यसि किम्। स आह। काशी विश्वेश्वरश्च मे निकटेऽस्ति। तौ साश्चर्यमूचतुः। कुतः प्रयासात्तर्हि यात्रा कार्याऽत्र नो दर्शय। तथेति स स्नात्वा समाहित ईशं दध्यौ। तदा तस्य समीपे ईशोऽप्यागतः स ईश्वरं प्रार्थयत्। हे शिव! अत्र नित्यं काश्यपेक्षा, विश्वेश्वरदर्शनं नित्यमस्तु। तदा भक्तवत्सल ईशः प्रसन्नो भूत्वा काशीं दर्शयामास।।४९-५८।। कुण्डे मणिकर्णिका तन्मध्ये विश्वेशमूर्तिराविर्भूता यत्रोदग्वाहिनी गङ्गा तत्र काशी प्रकाशिता। कुण्डाद्भागीरथीजलवत्प्रवाहो निर्गतः। सर्वकाशीचिह्नानि चासन्। तत्सर्वे दृष्ट्वा विधिना स्नात्वा पिशाचं ज्ञानिनं मेनिरे। स बन्धून्प्राह। काशीयं विश्वेशेन दत्ता। अत्र स्नानादि कर्तव्यम्, नान्यत्र गन्तव्यम्। भ्रान्तोऽहं गोस्वामी। हे भ्रातरौ! ईश्वरार्चनं कुरुत। प्रतिवर्षमत्रादरेण काशीयात्रा कर्तव्येति। एवं गुरुवाक्यं श्रुत्वा सर्वे स्नानादि चक्रुः। काशीयं पुण्यराशिर्नात्र संशय इत्युक्त्वा गुरुः पापविनाशतीर्थमग्रतोऽदर्शयत्स्नानमात्रादग्निस्तृणाद्रिमिव पापराशिं दहति।।५९-६७।। तत्र पूर्वाश्रमस्वसा रत्ना प्राप्ता तां श्रीगुरुराह। मे दर्शनायागता त्वं पूर्वपापानि स्मरसि किम्? सा नत्वाऽऽह। योषा मूढाऽहम्, कुतो मे ज्ञानं, त्वं ज्ञानदीपो विश्वात्मको विश्वसाक्षी सर्वं वेत्सि। विस्तराद्वद। श्रीगुरुराह। मार्जारी भाण्डे पञ्चपोतानसूत। तानदृष्ट्वा तत्र जलं क्षिप्त्वा पात्रमग्नौ स्थापितम्। ततः पञ्चमार्जारघातो जातोऽन्यानपि पापानीति गुरौ वदति सति तद्देहः कुष्ठव्याप्तोऽभूत् सा भीता गुरुपदलग्नाऽऽह। दयाब्धे! गुरुनाथ! जयस्व यथा पापानि कृत्वा जनो वाराणशीं याति तथाऽहमागता। श्रीगुरुराह। पापराशिस्त्वयाऽर्जित एतज्जन्मान्तरे भोक्ष्यसेऽत्रैव वा वद।।६८-७७।। साऽऽह। अलं जन्मभिर्बहुकष्टं दृष्टं मुक्त्यर्थं त्वामुपागता ते पदौ धृतौ। अत्रैव विपापां कुरु। श्रीगुरुराह। अत्र पापनाशतीर्थे नित्यं स्नानं कुरु। स्नानात्सद्यस्ते पापं नश्येत्सप्तजन्मार्जितदोषा अपि। कुष्ठस्य तु का कथा। सिद्ध आह। हे नामधारक। स्नानात्सद्य एव तत्कुष्ठशान्तिर्जाताऽस्माभिर्दृष्टा। ईदृक्पावनं पापनाशतीर्थम्। यत्स्नानात्सप्तजन्माघक्षयः। हृष्टा रत्ना तीर्थमाहात्म्यं दृष्ट्वा तत्र मठं कृत्वाऽस्थात्। गुरुस्ततोऽग्रे दर्शयित्वाऽऽह। इदं स्नानमात्रात्सर्वदोषहृत्। जम्बुद्वीपस्थसर्वतीर्थान्यत्र वसन्ति।।७८-८६।। ग्रहणपर्वक्रान्तिस्नानात्सालङ्कृत- सवत्सकोटिधेनुदानफलम्। तीर्थमाहात्म्यादेकैकदानं कोटिगुणफलमं भवेत्। ततोऽग्रे रुद्रपादतीर्थं गयासमम्। गयातीर्थोक्तवदत्र कर्म कार्यम्। रुद्रपादार्चनात्कोटिजन्मार्जितं पापं नश्येत्। ततोऽग्रे केशवसन्निधौ पुण्यराशिचक्रतीर्थे, हीनोऽपि यत्स्नानाज्ज्ञानी भवेत्। यत्रास्थि चक्राङ्कितं भवति। द्वारिकातश्चतुर्गुणं पुण्यमिति श्रुत्वा सर्वे स्नात्वा दानानि ददुः। यथा गोकर्णे महाबलेश्वरस्तथा ग्रामपूर्वभागे कल्लेश्वरस्तत्सन्निधौ मन्मथतीर्थम्। तत्र स्नात्वा विधिना कल्लेशं सम्पूज्याष्टैश्वर्यं लभेन्न संशयः।।८७-९६।। श्रावणेऽखण्डाभिषेकात्कार्तिके दीपोत्सवाच्चेशोऽष्टसिद्धिसहितं मोक्षं दद्यात्। इत्यष्टतीर्थमाहात्म्यं पुरुषोत्तमः श्रीगुरुः प्रेम्णाऽवदत्। सर्वे हृष्टा ऊचुः। नेदं ज्ञातम्। स्वामिन्त्वयाद्य प्रकाशितम्। ते कृपया पुनीताः स्मः। समीपस्थेषु तीर्थेषु कः कष्टाद्दूरं यायात्। इत्युक्त्वा ते दानादि चक्रुः एवं ख्यापयन्गुरुर्मठं प्राप। हृष्टा भक्ता विप्रान्भोजयामासुः। एवं गुरूक्तं ते कथितम्। अत एव सरस्वती द्विजो द्विजगङ्गाधरजो रजोहरे। सुरतीर्थयुतेऽवसद्वरे सति गन्धर्वपुरे मनोहरे।।९७-१०३।। इति चूर्णिकायामेकोनपञ्चाशत्तमोऽध्यायः।।४९।।

।। इति एकोनपञ्चाशत्तमोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ पञ्चाशत्तमोऽध्यायः

श्रीदत्त। अथ सारसंग्रहश्लोकोऽयम्-

खशरयुते पुरोक्त रजकोऽभवद्यवनराज आस वृषकृत् पृथुपिटकस्तदङ्क उदितस्तदीयशमकृद्द्विजो नृपकथाम्।
अवददथो ययौ स गुरुं स्मृतिं प्रथमजन्मनोऽलभदथो गतरुगसौ सुयानगमजं गजाश्वललितं पुरं स्वमनयत्।।५०।।

सिद्ध आह नवमाध्याये उक्तो रजको गुरुसेवकोऽभूत्।।१।। एष्यजन्मनि राज्यं दास्यमिति गुरुणा वरश्च दत्तः स वैडूर्यनगरे सर्वसम्पत्तियुतो म्लेच्छजातीयोऽखिलसुखपुत्रादियुतो राजाऽभूत्। स नित्यतुष्टो गजाश्वधनयुतश्च। यस्यासंख्यातं पदातिसैन्यं स हीनोऽपि प्राक्संस्कारात्पुण्येच्छुर्दानधर्मरतो विशेषाद्विप्रभक्तश्च देवालयतीर्थादौ नोपद्रवं चक्रे तद्गुरवस्तमूचुः भवान्म्लेच्छोऽतो देवद्विजा निन्द्याः। तद्भजनान्महापापम्। यस्य यो धर्मः स तस्यातीव पुण्यदः द्विजा मन्दा अज्ञा येषां काष्ठपाषाणा अपि देवाः। धेनुरग्निसूर्यनदीजलाद्यपि कथं दैवतम्।।२-१० ।। एवं निराकारेशं साकारं मन्वानानां भजनादधोगतिः। तच्छ्रुत्वा पूर्वसंस्काराद्धर्मे दृढमती राजाह। तृणकाष्ठादिषु सर्वत्रेश्वरः स्वयं स्वात्मनः स्थावरजङ्गमादि सृष्ट्वाभूद्भेदबुद्ध्या मताग्रहः तस्मात्पञ्चभूतात्मकं धर्ममर्यादासहितं जगद्देव एव सर्वत्रानुस्यूतः। कुम्भादयो यथा हेतुरूपं न त्यजन्ति तथा विकाराः सत्त्वं न त्यजन्ति। नानावर्णगोषु क्षीरमेकमिव सर्वत्र चिदेका। यथा भूषणैर्न स्वर्णहानिस्तथा जगता भूम्नो न हानिः। घटैराकाश इवात्मा देहैर्न भिद्यते। घटोदकस्थ चन्द्र इवात्मा बुद्ध्या विकारं नैति। दीपाद्दीपान्तरेऽपि यथैकत्वं निर्बाधं तथाखण्डैकरसं ब्रह्म प्रत्यग्रूपेण न भिद्यते।।११-१९।। सूत्राधीना नानामणय इवेदं नामरूपविभागात्मकं तस्मिन्प्रोतं तदधीनमेव। एवं नानाजातिगत एक एव विभुराकाशवदसङ्गः। तज्ज्ञाने चित्तशुद्ध्यपेक्षा, तदर्थमश्मादिकृतदेवप्रतिमाभावना। ध्यानार्थमेवाल्पधियाम् प्रतिमार्चनम्। सुधीनामात्मभावना सर्वत्र विश्वात्मापि ध्यानार्थं मनःस्थैर्याय प्रतिमादिषु भावयन्ति तत्र नारायणोऽस्ति हि यत्र यस्य यथा निष्ठा तत्र तस्य तथा फलम्। ततः स्वमतनिष्ठा न निन्द्या न द्वेष्याश्च। येषां यो मार्गः स तस्य हितदः। एवं तानुक्त्वा देवविप्रभक्तः स्वयं धर्ममाचरन्राज्यं शशास। दैवात्तस्याङ्के राजस्फोटकोऽभूत्।।२८।। वैद्यैश्चिकित्सितोऽपि न शशाम। तेन सोऽतीव कष्टं प्राप। श्रीगुरुर्मठे विचारयामास। म्लेच्छराजोऽत्रागमिष्यति। ततो द्विजानां पीडा स्यान्माहात्म्यं प्रकटितम्। नात्र स्थेयम्। ख्यातिः प्रसिद्धा। म्लेच्छा अप्यागमिष्यन्ति, ततोऽन्तर्धानं वरं, बहुधान्यवर्षेऽत्र गुरुः सिंहराशिं गतः, गौतमीयात्राप्रसङ्गेन यास्यामीति विचार्य शिष्यानाह। म्लेच्छराजोऽत्रागमिष्यति ततो गौतमीं यास्ये। तच्छ्रुत्वा ते प्राहुः। अहो म्लेच्छ एष्यति चेन्नो धर्महानिरलं नो विचारेण श्रीगुरुः साक्षाद्दत्तोऽत्र तिष्ठति स नस्त्रातेत्युक्त्वा ते तूष्णीं स्थिताः। पूर्वसंस्काराज्जातसन्मती राजा।।३७।। अतीव दुःखितः नानौषधलेपैर्यद्व्यथा न शान्ता। तदा पीडितो राजाह। वैद्या अप्यारोग्यं दातुं न शक्ताः अतो विप्राः प्रष्टव्या इति विप्रानाहूयापृच्छत्। त ऊचुः। प्राग्जन्मपापं व्याधिरूपेण बाधते तीर्थदेवार्चनदानैस्तच्छान्तिः। यद्वा साधोर्भजनाद्दर्शनाच्च न संशयः। सत्कृपादृष्टिर्भवेत्तर्हि षष्टिजन्मपापनाशः, स्फोटकस्य तु का कथा। राजाह। म्लेच्छोऽयमिति

नोपेक्ष्यः। भवद्दासोऽहं प्राग्जन्मनि गुरुसेवा कृताऽत ईदृग्राज्यं लब्धम्। पापात्तु म्लेच्छकुले जन्म। सद्दृष्ट्या पुरा कस्य रोगो गत इति विश्वासार्थमेकं निदर्शनं भवन्तः कथयन्तु।।३८-४६।। त आहुरेतद्रहो वाच्यम्। सर्वे म्लेच्छं निन्दन्ति। वयं तु द्विजाः। राजाह। किं जात्या। द्विजदासं मां कृपयोद्धरत। एवं तमनुत्तमं ज्ञात्वा त ऊचुः। पापविनाशतीर्थं रहःस्थानं तत्र केनापि निमित्तेन गत्वा स्नात्वा रहस्तिष्ठ। तत्र ते कार्यं भवेत्। इति श्रुत्वा स तुष्टः सर्वान्निवार्यैकः पापनाशतीर्थं गत्वाऽस्थात्। तत्रैको विप्र आप। राजा तं नत्वा स्फोटकं दर्शयित्वाह। कथमस्य शान्तिर्भवेत्। विप्र आह! साधुदृष्ट्या शान्तिर्भवेत्। तदर्थं शृणु।।४६-५५।। पुरावन्तीपुरे कश्चिज्जन्ममात्रेण द्विजः, स्वधर्महीनः, मत्तः, स्नानादिवर्जितो, दुराचारः, पिङ्गलावेश्यालये स्थित्वाऽहोरात्रं तयारीरमत्। निर्भयं तदन्नञ्च बुभुजे। कदाचिद्दैवात्तत्र ऋषभयोगी प्राप। तं दृष्ट्वा तौ साष्टङ्गं नत्वा, भक्त्या प्रार्थ्य, गृहमानीयोत्तमासने उपवेश्य, नानागन्धपरिमलादिभिः पूजयित्वा, तत्पादोदकं पीत्वा, मिष्टपक्वान्नैर्भोजयित्वा, हस्तौ क्षालयित्वोत्तमं ताम्बूलं दत्वा, कोमलास्तरणपर्यङ्के तं शाययित्वा।।५६-६६।। देवबुद्ध्योभौ तत्पादसेवनादि चक्रतुः। गाढं निद्रितं तं ज्ञात्वोभौ बद्धाञ्जली तस्थतुः। स मुनिः प्रातरुत्थाय तौ समापृच्छ्य स्वैरं ययौ। कञ्चित्कालं तत्र स्थितो विप्रो गततारुण्यः साधुसङ्गाच्छुद्धधीर्दैवान्ममार। सापि वेश्या मृता। कर्मवशात्तौ राजकुले जातौ। स विप्रो दशार्णेशवज्रबाहुभूपस्य ज्येष्ठपत्न्याः कुक्षिं प्राप। राजा महोत्सवेन जातकर्माद्यकरोत्। तद्दृष्ट्वा सपत्नी क्रुद्धा मात्सर्येण यत्नाद्गर्भिण्यै सर्पगरलं ददौ।।६७-७६।। सर्वाङ्गेषूल्बणं विषं विद्धम्। तथाऽपि सा दैवान्न मृता। ततः कष्टेन सा पुत्रं प्रासूत। सर्वाङ्गव्रणो बालोऽतीव दुःखितो निद्राहीनोऽहोरात्रं भृशं रुरोद। विषव्याप्तं सुतं पत्नीं च वीक्ष्य, चिन्ताक्रान्तो राजा धनं व्ययीकृत्य, देशान्तरादपि वैद्यानानीय, चिकित्सां कारयामास। अथापि न शान्तिर्जाता। सर्वाङ्गेषु कृमियुक्ता व्रणा जाताः। ततस्तौ भृशदुःखितौ खानं पानं च त्यक्त्वा क्षीणौ जातौ। राजा गलद्व्रणौ बीभत्सौ तौ वीक्ष्याह। नानौषधादिभिरारोग्यं न प्राप्तौ।।८६।। नातःपरं आरोग्यशङ्कापि द्रष्टुमप्यनर्हौ पापौ यत्नात्त्याज्यौ। पापी जीवन्मृतोऽपि दुःखभाक्। भोगं विना कथं पापलयः। इति विचार्य सूतमाहूयाह। मदाज्ञया स्त्रीपुत्रौ गृहीत्वा, निर्जनारण्यं नीत्वा, तत्र निःशङ्कं त्यजेति। स तथेति रथे तावादाय पुराद्बहिर्ययौ। राज्ञ्या बान्धवा दास्यो दासाश्च विरहार्ता भृशं रुरुदुः। लोका दुःखिता ऊचुः। अहो राजाऽयं क्रूरः स्त्रीपुत्रौ कुतो मारयतीति।।९६।। सूतस्तौ गहनं निर्जनं वनं नीत्वा तत्र त्यक्त्वा पुनरेत्य राज्ञे न्यवेदयत्। तच्छ्रुत्वा राजान्यपत्न्यै तच्छशंस। साऽपि जहर्ष। वने सपुत्रा राज्ञी सौकुमार्यादज्ञातपादगतिः कण्टकाश्मभिः पीडितान्नपानवर्जिताऽपि कटे बालमादाय स्वकर्म स्मारं स्मारं प्राह। निर्जने वने एकलाबलाहं किं करोमि। सर्पव्याघ्रादयो दृश्यन्ते। जीवितेनालम्। एते मां भक्षन्तु। पापिन्या दुष्टायाः क्वोपयोग इति मूर्छितापि पुनरुत्थाय मन्दं मन्दमग्रे गत्वा तृषिता जलं न लेभे। व्रणार्तापि पदे पदे।।१०६।। व्याघ्रसालावृकवेतालब्रह्मराक्षसादीन्दृष्ट्वा मुक्तकेशी रुरोद। ततोऽग्रे गाः दृष्ट्वात्मानमाश्वास्य, मन्दं मन्दं गत्वा गोरक्षानाह। तृषितो बाल उदकं क्वेति। त ऊचुः। समीपेऽयं ग्रामस्तत्रान्नं जलं च लभ्यतेति मार्गं दर्शयामासुः। सा च ग्राममेत्य तत्र नारीर्मनोहरान्नरांश्च दृष्ट्वा समाहितापृच्छत्। कोऽत्र राजा? प्रजा हृष्टा भान्ति। त ऊचुः। महाधनः पुण्यात्मा दयालुः पद्माकराख्यो वैश्यः। स ससुतां त्वां रक्षयिष्यति। अत्रान्तरे राजदास्यस्तत्रागत्य सर्वं पृष्ट्वा तां स्वामिसमीपं नीत्वा न्यवेदयन्।।११६।। स च तामन्तर्गृहं नीत्वा। तद्वृत्तान्तं ज्ञात्वा, कृपालुः कृपयान्नवस्त्रादि दत्वा, मातृवद्ररक्ष। तत्राप्यौषधैर्व्रणा न शान्ताः। एकस्मिन्दिवसे व्रणपीडितः पुत्रो ममार। राज्ञी भुवि पतिता दुःखिता मूर्छिताऽभूत्। बुध्वा च पूर्वसुखं स्मृत्वा महाशोकाविष्टाभूत्। वणिक्स्त्रियो

दुःखशामकवाक्यैस्तां बोधयामासुः। अथापि सा दुःखिताह। हा तात बाल राजकुलपूर्णचन्द्रानन्दकन्द। मां विहाय क्व यास्यसि। पतिपितृबन्धूंस्त्यक्त्वा त्वं मे त्रातेति निश्चयेन त्वदाशया स्थितामनाथां मां त्यक्त्वा क्व गच्छसि।।१२५।। को मां त्रातेति दुःखिता। तां दृष्ट्वा नागरिकस्त्रियोऽपि दुःखिताः। सर्वशोकेभ्यः पुत्रशोको महानलो जीवत्पितरावपि भस्मसात्करोति। अत्रान्तरे पूर्वोपकारज्ञो ज्ञानी ऋषभयोगी तत्र प्राप्तः। वैश्यस्तं सम्पूज्य तोषयामास। मुनिराह। केयं महास्वरा किमर्थं शोचति। ततो वैश्यः सर्वं न्यवेदयत्। कृपालुर्ऋषभस्तस्याः समीपमागत्य तां प्राह। हे राज्ञि। मौढ्यादयं शोकः। को जातः। को मृतः। कुत आयातः। क्व वा गतः। नैदृगात्माऽदृश्यः। दृश्यो देहस्तथाविधो भौतिको जलफेनवत्।।१३५।। पञ्चभूतविकारः स्थूलदेहो यावदारब्धं लिङ्गेन सहात्र तिष्ठति। कर्मात्यये तद्वियुक्तो जडोऽत्र पतति। ईदृशः शोच्यः किम्? लैङ्गोऽपि गुणोत्थनिजकर्मतः वासनामयः कालवेगाद्भ्रमते। प्रकृतिगुणा एव कर्मसङ्गतो जीवं बध्नन्ति। सत्वेन देवत्वम्। रजसा नरत्वम्। तमसा तिर्यक्त्वम्। गुणात्यये तु नैर्गुण्यम्(मुक्तिम्)। अन्ते प्रवृद्धगुणो नश्वरं दैवं मानुषमासुरं वा जन्म प्रापयति। एवं कर्मानुसारेण स्वार्जितं सुखं दुःखं वा भोग्यम्। कल्पायुषोऽप्यन्ते मरिष्यन्ति। नृणां तु का कथा। अतो बुधो जातस्य हर्षं मृतस्य शोकं च न करोति।।१४४।। मृत्युः सहैवायातः। बाल्ये तारुण्ये वार्धक्ये वावश्यं मृत्युः। यावदारब्धं जीवितस्य पुत्रादिसम्बन्धेन मायामोहाल्लोको बध्यते। यद्धात्रा लिखितं तल्लङ्घने कः शक्तः। हे मातः शवं धृत्वा कुतः शोचसि। स्वहितेच्छा चेत्तर्हीशं शरणं व्रज। सम्बन्धो नियतश्चेत्त्वं पूर्वं कस्य का वासीः। के वा ते सम्बन्धिनः। इदं विचार्य शोकं मा कुर्विति श्रुत्वा नत्वा साह। प्रभो। राज्यभ्रष्टाहमिदृशीं दशां प्राप्ता। अरण्ये पतिता। पित्रादिवियुक्तापि पुत्राशयात्र स्थिता, तस्येदृग्गतिश्चेत्किमिति तत्पदे दधौ।।१५३।। निर्विण्णां तां दृष्ट्वा दयालुर्योगी पूर्वोपकारवशात्प्रसन्नः, प्रेतमूर्ध्नि मन्त्रितं भस्म चिक्षेप। ततः सहसा गतप्राणोऽपि स जीवन्नुत्थितः। तस्य राज्ञ्याश्च व्रणा नष्टाः। सपुत्रा राज्ञी मुनिं ननाम। स भस्म ददौ। तद्धारणात्तौ देवदिव्यकान्ती जातौ। योगीश आह। वां दृढदेहे न जरा भवेत्। भद्रायुः सुतोऽयं कीर्तिमान्जनकाद्गुणैरधिकश्चिरं राज्यं करिष्यतीति स वरं दत्वा ययौ। एवं साधुदृष्ट्यारोग्यं जातम्। हे राजन्स्फोटकशान्तिर्भवेत्। चिन्ता माऽस्तु। दृढं साधुपादं धारय।।६२।। राजाऽऽह। क्वास्ते सत्पुरुषः कृपया वद। तद्दर्शनार्थं यास्यामि आरोग्यं भवेदिति मे निश्चयः। विप्र आह, भीमातीरे गन्धर्वपुरे सत्पुरुषोऽस्ति तद्दर्शनमात्रात्तवारोग्यं भविष्यतीति श्रुत्वा, राजा श्रीगुरुदर्शनार्थं चतुरङ्गसैन्यैः सह प्रतस्थे। गाणगापुरमेत्य लोकमाह। कश्चित्तापसोऽत्र कुत्रास्ते तन्मे शशंस इति श्रुत्वा भीतो लोकोऽन्योन्यमाह। म्लेच्छः श्रीगुरुं पृच्छति किमतोऽत्र भविष्यतीति। राजा कुपित आह। तद्दर्शनायागतोऽस्मि स कुत्रास्ते मे कथय। लोक आह। अनुष्ठातुं सङ्गमं गतो मध्याह्ने मठमेष्यति।।७२।। तच्छ्रुत्वा राजा सर्वान्निवार्य स्वयं गत्वा दूराच्छ्रीगुरुं दृष्ट्वा पादचारी व्रजन्भक्त्या तमुपेत्य नत्वा दूरे स्थितः तं दृष्ट्वा श्रीगुरुराह। हे सेवक रजक! क्व तिष्ठसि। चिराद्दर्शनायागतोऽसि। स तद्वाक्यं श्रुत्वा, पूर्वजन्म स्मृत्वा, साष्टाङ्गं नत्वा, गद्गदवाग्रोमाञ्चितः, सानन्दाश्रुस्तत्पादुकोपरि लोलदङ्गः पूर्वजन्म स्मृत्वातीव विह्वलो रुदन्नत्वा गुरुं प्राह। कुतो मामुपेक्षसे। सेवापराङ्मुखो विदेशस्थोऽभवम्। गृहान्धकूपे पतितः। प्रमत्तस्ते पदं विस्मृत्य मायाजालावृतोऽस्मि। तेऽङ्घ्रिस्मृतिर्दुर्लभा जाताऽज्ञानहृत्ते पदं समीपस्थमपि न जाने।।१८१।। त्वं भक्तान्नोपेक्षसे। अथापि कुतोऽज्ञानसिन्धौ मां क्षिपसि। जन्मनालम्! तेऽङ्घ्रिदासो भवामि। मामुद्धर। एवं स्तुत्वा नमन्तं श्रीगुरुराह। ते कामसिद्धिर्भवेत्। राजाह। अङ्के स्फोटको नितरां व्यथयति। कृपादृष्ट्या पश्य। श्रीगुरुराह। क्वास्ते दर्शय। स राजाऽङ्के स्फोटकमदृष्ट्वा नत्वा चकित आह। स्वामिन् ते प्रसादात् समृद्धं राज्यमनुभूतं, पुत्राः पौत्राश्च

दृष्टा, मनो मे तृप्तम्। हे भक्तवत्सल! ममैश्वर्यं विलोकय। अमुं मे कामं पूरय। ततः सर्वं सन्न्यस्य ते पदलीनो भवेयम्। श्रीगुरुराह। संन्यासिनो मे म्लेच्छराज्ये गमनं कथम्। यत्र महापापानि।।१९१।। हिंस्रा गोहत्याः कुर्वन्ति। हत्यां मा कुरु। स तथेत्यङ्गीकृत्याह। दूरतो वीक्ष। अहं ते पुरातनो दासः। योऽहं रजकः स एव स्वामिवाक्याद्राजाऽभवं मे सुखं चानुभूतम्। कर्मवशाज्जातिरेवैका गर्हिता। त्वद्दर्शनात्तुष्टोऽस्मि। पुत्रादीन्दर्शयित्वा ततस्ते दासो भवामीति विनयेन प्रार्थ्य पुनः पुनर्ववन्दे। श्रीगुरुर्विचारयामास। प्रकाशो मेऽभून्नीचा अपि दर्शनायायान्ति, नात्र स्थेयं, सिंहस्थे गुरौ गौतमीं गत्वाऽदृश्यो भवेयम्। यतो वर्तमानः कलिः। इति विचार्य तथेति नृपमाह। स पादचारी गुरुं शिबिकायामुपवेश्य पादुके गृहीत्वाऽन्वगाद् गुरुस्तमाह। अश्वमारुह। त्वां लोको निन्दति।।२००।। हे म्लेच्छ! राष्ट्राधिपं त्वां द्विजदासं दृष्ट्वा हसन्ति। जातिदूषणमपि भवेत्। स आह। को राजा? ते दासो रजकोऽहं स्पर्शस्पर्शाल्लोहमिव ते दृष्ट्या पूतोऽस्मि। त्वमेव सर्वेषां राजाऽहं ते भृत्यः, पुनर्दर्शनं दत्तम्। मनोरथाः पूर्णाः। इत्युक्त्वा चतुरङ्गसैन्यमैश्वर्यं च गुरवे व्यदर्शयत्। स तमाह। दूरे गन्तव्यम्, मदाज्ञयाऽश्वमारुहेति। ततः शिष्येभ्यो वाहान्दत्वा, सोऽश्वमारुह्य, गुरुदर्शनेनातीवानन्दितोऽभूद् गुरुस्तमाह। त्वं भक्तोऽसि। संन्यासिनो मे त्रिकालमनुष्ठानम्, त्वत्सङ्गात्कथं भवेत्।।२१०।। अग्रतो व्रजामि। त्वं पश्चाद्यथासुखमेहि, पापनाशतीर्थे मे दर्शनं भवेदित्युक्त्वा गुरुस्तिरोदधे। स विलीय मनोवेगाच्छिष्यैः सह वैडूर्यनगरान्तिके पापनाशतीर्थेऽनुष्ठातुमुपाविशत्। तं दृष्ट्वा सायन्देवसुतो नागनाथ एत्य सम्प्रार्थ्य, सशिष्यं तं स्वगृहं नीत्वाऽभ्यर्च्य, सादरं भोजयामास। सायङ्काले गुरुराह। म्लेच्छायोक्तं पापनाशतीर्थमेहीति। तस्मादितो गमिष्याम्यन्यथाऽत्र म्लेच्छा आगमिष्यन्तीत्युक्त्वा श्रीगुरुः शिष्यैः सह तीर्थमेत्य भद्रासननेनोपविष्टः स्वात्मानं दध्यौ। राजा श्रीगुरुं सैन्येऽदृष्ट्वा चिन्ताविष्ट आह। ।।२२०।। बत गुरुर्मामुपेक्षते किम्? किमपराद्धमित्युक्त्वा तीर्थे दर्शनं दास्य इत्युक्तं स्मृत्वाऽऽह। कोऽस्य माहात्म्यं वेत्ति। मे दैवमुत्तमं ततस्तद्दर्शनं जातम्। स्फोटार्तिशान्त्यर्थमेत्य महापुण्योदयात्कृपाब्धिर्दृष्टः। नूनमग्रे गतस्ततोऽहं शीघ्रं यास्य इत्यश्वमारुह्य, राजैकदिनेन द्वाविंशतिगव्यूतिमितिदेशे पापनाशतीर्थमेत्य, श्रीगुरुं दृष्ट्वाऽतीव हृष्टो नत्वा, मे पुरं पावयेति भक्त्या प्रार्थयत्। गुरुणा तथेत्युक्तः स मुक्ताजालालङ्कृते पताकाध्वजसङ्कीर्णे पुरे शिबिकास्थं गुरुं प्रविश्य स्वयं पादचारी सन्रत्नदीपैर्नीराज्य, महोत्सवेनान्तःपुरं निन्ये।।२२९।। विस्मिता म्लेच्छा ऊचुः। अहो स्वधर्मं त्यक्त्वाऽनाचारो राजा द्विजमर्चति। यन्मुखं न वीक्ष्यं तं सेवतेऽयं भ्रष्टः। द्विजा ऊचुः। पुण्यात्माऽयं राजा विप्रसेवकोऽभूदतः साधु भविष्यति। नायं ब्रह्मद्वेषी ज्ञानी पुण्यश्लोकः। नागरिका गुरुं भक्त्या प्रणम्य, पादचारिभूपं दृष्ट्वा विस्मिता आहुः। नायं गुरुर्नरः किं तु देववरोऽतो राजाऽर्चति चित्रं कलौ दृष्टम्। राजा बन्दिषु स्तुवत्सु वाद्यघोषैर्गुरुं गोपुरं निन्ये। ततो दिव्यवस्त्राच्छादितमार्गेण गुरुमनीनयत्। तत्समन्ताद्बहुरत्नानि भ्रामयित्वाऽत्यजत्तेन दरिद्राः सुखिनो जाताः। एवं शनैर्गुरुमन्तर्निन्ये।।२३८।। श्रीगुरुर्योगिध्येयपादाभ्यां दिव्यवस्त्राच्छन्नमार्गमाभूषयन्वाद्यनादघुष्टं पुरं विवेश। सर्वान् बहिः संस्थाप्य चतुर्भिः शिष्यैः सह श्रीगुरुमन्तर्नीत्वा रत्नाञ्चितसिंहासने उपवेश्य नत्वा राजा स्वयं वीजयामास। ततः सुशीला भूषिताः ससुता राजस्त्रिय एत्य भक्त्या प्रणेमुः। प्रणतो राजा सर्वान्प्रणमय्याह। शास्त्रगर्हितोऽप्यहं तवागमनेन कृतार्थोऽस्मि। तुष्टो गुरुः प्रीत्याऽऽशिषो दत्वा तमाह। ते मनो हृष्टं, वाऽन्यत्किमपीच्छति, निःशङ्कं वद।।२४६।। स आह। चिरं राज्यं भुक्तं नातस्तोषोऽन्तरितां ते पादसेवां देहि। नान्यद्दयस्व। श्रीगुरुराह। राज्यधुरं पुत्राय दत्वा श्रीशैलं गच्छ। तत्र मे दर्शनं भविष्यति। पुनः सान्द्राश्रुर्विरहाक्षमो राजाऽऽह। भगवन्ज्ञानं देहि। यतस्ते सततं स्मृतिः स्यात्। तथेत्युक्त्वा सशिष्यः श्रीगुरुर्गोदावरीमेत्य, तां पुनान इव

विमले तज्जले स्नात्वा, भीमामरजासङ्गमं प्राप। तं दृष्ट्वाऽस्तविरहार्तिः सारार्तिको भक्तजनः प्राप्तं प्राणमिव तं नत्वा पुरं नेतुं प्रार्थयत्। तं श्रीगुरुराह। अतीव ख्यातिर्जाता, कलौ तिरोभविष्ये।।२५३।। श्रीशैलं गत्वाऽपि भक्तहितायात्र सदैव प्रतिष्ठामि। इदं गन्धर्वपुरं मेऽतिप्रियम्। अत्र भजतां प्रत्यक्ष एवाहम्। कलिकालहन्ताऽहमेकान्तभक्तानुद्धर्तुं गुप्तस्तिष्ठे। अग्रे कष्टदिनानि, धर्म-हासः, क्रूराः कुकर्म कुर्वन्ति। मद्दर्शनायागतं नृपं ज्ञात्वाऽन्ये हीना अप्यागमिष्यन्ति, नैतत्साधु। एवं गुरुवाक्यं श्रुत्वा ते चिन्तार्दिताश्चित्रवत्तस्थुः। अतोऽग्रेऽन्ये भूपा हीनाः, दिनानि कष्टानि, हीना अप्यत्रागमिष्यन्तीतस्तिरोधानं वरम्।।२६०।। इति श्रीगुरुः शैलयात्रामिषेण गत इति प्रदर्शयन्नत्रैवास्थात्। गङ्गाधरपुत्र आह। मुक्तिदः श्रीगुरुः साक्षादत्रास्तीति मया दृष्टम्। भाविककामदोत्रास्तीत्यसंशयं भजत। शीघ्रं कामसिद्धिः स्यात्। यो युगान्तरे कष्टादप्यलभ्यः सोऽत्र कल्पवृक्षो जागर्ति। सङ्कल्पयत्यत्र हि कोऽपि यद्यत्तत्तल्लभेद्धान्यधनर्धियुक्तः। भक्तः सुखी तस्य भवेत्सदैव भुक्तिं स मुक्तिं च लभेन्मुदैव।।२६५।।

।।इति चूर्णिकायां पञ्चाशत्तमोऽध्यायः।।

।।श्रीगुरुःशरणम्।।

श्रीगुरुसंहिताचूर्णिका

अथ एकपञ्चाशत्तमोऽध्यायः

।।अथ सारसंग्रहश्लोकोऽयम्।।

राजपुरादेत्य स च निजपीठं कीर्तिरभून्मम सुशुचिरतन्वी। स्थेयमिहातः परमिह न साक्षादित्यवनीषुयुजि स च विचार्य।।
स्वानपि चाश्वास्य बहुवरदानैः पुष्पकृतासन गत इदमाह। मद्भजनाद्वः सुगतिरिह तिष्ठे सत्यमितीडरमभवददृश्यः।।५१।।

नामधारक आह। म्लेच्छपुरं गत्वा गुरुरग्रे गत इति श्रुतम्। ततोऽग्रतः कथय। सिद्ध आह। दोषघ्नं कामदं तच्चरितं शृणु। राज्ञे वरं दत्वाऽऽगत्य गुरुर्वर्तमानकालं ज्ञात्वा, तिरोधानमैच्छत्। महिमा सुदूरं प्रकटितो, हीना अपि भजनायान्ति, ततः शैलयात्रामिषेण यास्यामीति निश्चित्य सङ्गमं ययौ। तदा दुःखिता भक्ता ऊचुः।।७।। अहो जीवनभूत सद्गुरो! नश्चिन्ताग्नौ त्यक्त्वा क्व यास्यसि? वयं पदसक्ता भक्ताः त्वं निकटस्थं परमं निधानम्। हे कामधेनो! वत्सकल्पानज्ञान् हित्वा क्व यास्यसि। हे पावन! सदा ते दर्शनं नः पापहारि। हे भयत्रातः कामपूरक! बालान्नस्त्यक्त्वा क्व यास्यसि। त्वं नो माता पिता गुरुश्च निःस्नेहो मा भवेति सानुकम्पं प्रार्थयतस्तानाश्वास्य, सहासमाह। सङ्गमे नित्यकृत्यं कृत्वा मध्याह्ने मठे तिष्ठामि।।१४।। भाविकभक्तानामहमत्र प्रत्यक्षोऽस्मि। सत्यम्। चिन्तामणौ अभयदे कुतो दैन्यचिन्ता। त्रिवारमाश्वासनं दद्मि। संशयो माऽस्तु गन्धर्वपुरेऽत्र स्वभक्तयोगक्षेमकर्तुर्मम पादसक्तानां भक्तानां विशुद्धिः कार्यसिद्धिश्च। अश्वत्थोऽयं कल्पवृक्षः शीघ्रं प्रसीदेत्। सङ्गमे स्नात्वा, अश्वत्थं भक्त्याऽभ्यर्च्य, सर्वानर्थभ्रमहरेऽत्राश्रमे संस्थापितयोर्मे पादुकयोरर्चनात्सर्वभ्रमशान्तिर्भवेत्।।२१।। विघ्नहरश्चिन्तामण्यर्चनाद्विघ्न- शोकनाशः। अष्टतीर्थस्नानात्सर्वसिद्धिर्मुक्तिश्च। त्रिकालं पादुके सम्पूज्य मत्सन्तोषदमारार्तिकं च कृत्वा स्मरेत्तस्य कामसिद्धिः। इत्युक्त्वा श्रीगुरुः शैलयात्रायै प्रतस्थे। तत्पादपद्मं ध्यायन्तो भक्ता मठमेत्य तत्र श्रीगुरुं दृष्ट्वा विस्मिता आहु। अहो! अयमत्राप्यास्ते। असौ त्रिमूर्तिः योऽमुं नरमिति वक्ति स नरकं गमिष्यति। अस्यानन्तो महिमाऽयं विभोरवतारः। एवं दर्शनं दत्वा, तत्र गुप्तरूपेण तस्थौ। ततोऽत्र नेति न वाच्यम्।।२८।। गुरुः श्रीशैलं गत्वा, पातालगङ्गायां स्नात्वा, शिष्यानाहूयाह। पुष्पासनं कुरुत, इतो व्रजामि। तथेति शिष्याः पद्मादिपुष्पाण्यानीय, तैः कदलीदलवेष्टितैः सुखासनं कृत्वा, गङ्गायां निदधुः। गुरुस्तानाह। सुखं ग्रामं प्रतियात। पुनस्तान्दुःखितान्दृष्ट्वाऽऽश्वास्याह। गन्धर्वपुरं प्रतियात सदा मे तत्र वासः। अभाविकानामदर्शनाय, भाविकानां दर्शनाय चायं सूपायः कृतः। मद्भक्तगेहे सदाऽस्मि। एवं चरित्रं विधाय।।३५।। श्रीगुरुर्बहुधान्यसंवत्सरे। कन्यागते गुरौ, कुम्भस्थेऽर्के, उत्तरायणे, शिशिरर्तौ, माघमासे असिते पक्षे, प्रतिपत्तिथौ, शुक्रवारे, पुष्यनक्षत्रे, देवेषु पुष्पाणि वर्षत्सु सत्सु पुष्पकासन उपविश्य नदीमध्यस्थ आह। चत्वारि प्रसादपुष्पाणि प्रेरयामि तानि गृहीत्वा भक्त्या मत्पादुके अर्चत। अभीष्टसिद्धिः स्यात्। मे गानप्रीतिः ये मधुरं गायन्ति तद्गृहे स्थास्यामि तत्राखण्डा श्रीः सम्पच्च। न तत्र भीतिः। मद्भक्ते मे प्रसादो न तत्र दैन्याधिव्याधयः।।४२।। ते पुत्रपौत्रयुक्ताः श्रियान्विताः शतायुषश्च। ये मच्चरितं पठन्ति शृण्वन्ति वा सत्यं तत्कुले श्रीर्नन्दते। इत्युक्त्वाऽदृश्योऽभूत्। विस्मिता भक्ताः यावच्चिन्तान्वितास्तावन्नाविका एत्योचुः। नद्यां

साक्षाद्देवो दृष्टः। पुष्पासनस्थो, दण्डकमण्डलुधरो यतिर्न आह। नृसिंहसरस्वत्याख्योऽहं कदलीवनं यास्ये इति पुरस्थशिष्येभ्यो निवेदयत्। गन्धर्वपुरं प्रतियात। भ्रान्तिं दुःखं च त्यक्त्वा सुखं प्रतियातेति चोक्तम्। तत्पदयोः सौवर्णपादुके।।४९। तेन भवद्भ्यः भुक्तिमुक्तिप्रदा मद्भक्तिरास्थेया प्रसादपुष्पाण्यागच्छन्ति तानि गृहीतव्यानीति तत्संदेशो वः कथित इत्युक्त्वा ते जग्मुः। शिष्यास्तच्छ्रुत्वा प्रसादपुष्पाणीक्षमाणा यावत्स्थितास्तावच्चत्वारि पुष्पाण्यागतानि मुख्यशिष्या एकैकं जगृहुः। सिद्ध आह। बहवोऽस्य शिष्याः। तत्र यात्रायै प्रेरिताः संन्यासिनः प्राधान्याद्ब्रच्मि।।५६।। बालसरस्वती, कृष्णसरस्वती, माधवसरस्वत्युपेन्द्रसरस्वती च। प्राप्ताभया गृहस्थास्त्वाज्ञया सुखं गृहानीयुः। शैलयात्रासमये सायन्देवो नन्दिनरहरिकवी सिद्धोऽहं चेति चतुर्भिश्चत्वारि पुष्पाणि गृहीतानि। तत्रैकमिदं पश्य। मया सम्पूज्य रक्षितम्। एवं संक्षेपतो गुरुमहिमोक्तः सर्ववर्णने न मे शक्तिः। कामधुग्गुरुचरित्रं मयेदमुक्तम्। दारिद्र्यपापरोगहरं शान्तिदं चेदं पवित्रं, मनोहरम्, यो लिखति, पठति, शृणोति वा, स चेह परत्र च मोदते।।६३।। तत्कुलं पुत्रपौत्रादियुङ्नन्दते। धर्मार्थकामदं मोक्षदं चेदमिति श्रुत्वा नामधारकः पूर्णमनोरथः पुलकाङ्कितो मुदिताऽऽत्माऽभूत्। स कविः शतायुर्लब्धगुरुभक्तिः सम्पत्सन्ततियुक्तो जातः। य इदं सन्तोषदं कामधुक्चरितं शृणोति स कामितं प्राप्नुयात्। अतो वरदमिदं नित्यं श्राव्यम्। भवारण्येऽमृतप्रपेयं स्थापिता। अस्याः पानाच्चतुर्विधपुरुषार्थावाप्तिर्निगमे गतिः। सन्मतिः, सद्गतिश्च भविष्यति। पुत्रपौत्रादीच्छुरिदं शृणुयात्। तद्धाम्न्यखण्डा लक्ष्मीर्वसेत्।।६९।। श्रवणात्पुरुषार्थदं सर्वानर्थहरं चेदं यः शृणोति तं श्रीनृसिंहसरस्वती सर्वानर्थतो रक्षति। गङ्गाधरात्मजः श्रोतॄन्प्रार्थयते शीघ्रं सर्वार्थदोऽयं ग्रन्थः सेव्यः। प्रपञ्चादपि परमार्थसिद्धिदः, प्रवृत्तितोऽपि निवृत्तिदोऽखिलकामपूरको- ऽनर्थनिवारक एष ग्रन्थो नित्यः सेव्यः। आरम्भतत्समाप्तिकृन्नरसिंहसरस्वती। ततोऽन्यो नाऽधारोऽतो याचामि। सन्मार्गं मे देहीति (ॐ) इति वासुदेवानन्दसरस्वतीकृता श्रीसमश्लोकी गुरुचरितचूर्णिका कावेरीतीरे समाप्ता। श्रीदत्तात्रेयार्पणमस्तु।।७३।।

।।इति चूर्णिकायां एकपञ्चाशत्तमोऽध्यायः।।